BEHIND (adv.): (1) पृष्ठतः (= on or from the back), *shuts the king's eyes from b.* पृष्ठेनागत्य राज्ञो लोचने संवृणोति, V. iii.; (2) पश्चात्, *from b.* पश्चादेत्य. V. iii.; *putting b.* पश्चात्क्रिया, Ki. xviii. 42.

BEHOLD (v.t.): (1) पश्यति (दृश्, c. 1); (2) अव-लोकयति, वि-, (लोक्, c. 10); v. To see, look at.

BEHOLD (interj.) पश्य *or* पश्य पश्य (imper. dual sing).

BEHOLDEN (part. adj.): v. Obliged, indebted.

BEHOLDER: (1) प्रेक्षकः; (2) दर्शकः; (3) द्रष्टृ (m.)

BEHOOF (subs.) लाभः: v. Advantage, benefit.

BEHOVE (v. impers.): Expr. by the future pass. part: *it b. s you to forgive this fault* अयमपराधो भवता मर्षयितव्यः, Sa. iv.: v. Ought.

BEING (subs.): I. Existence: (1) अस्तित्वम्; (2) सद्भावः; (3) सत्त्वम्, (4) सत्ता, *endowed with b. by birth* जन्मना लब्धसत्ताकस्य, S. i. 2. II. That with exists: (1) भूतम्, *of mortal and immortal b. s* मर्त्यामर्त्यस्य भूतग्रामस्य, U. vii.; (2) सत्त्वः; (3) विवेकिन् (m.) (= rational b.); (4) चेतनः (= sentient b.); (प्राणिन्, प्राणभृत् (m.) (= one endowed with life); (6) शरीरिन्, देहिन् (m.) (= corporeal b.) Ph. *the Supreme B.* परमेश्वरः.

BEING (part.): when = from the fact of being ...., expr. by the abl.: v. From, since, in as much as.

BELABOUR: ताडयति (तड्, c. 10): V. To beat, cudgel.

BELAY: I. To block up: q.v. II. To fasten: q.v.

BELCH (v.): (1) उत्-वमति (वम्, c. 1); उत्-गिरति (गॄ, c. 6).

BELCH, BELCHING (subs.): (1) उद्वमः; (2) उद्वमनम्; (3) उद्गारः; (4) उद्गिरणम्.

BELDAM: वृद्धा: v. Old woman, hag.

BELEAGUER (v.t.): रुणद्धि, अव-, उप, (रुध्, c. 7): v. To besiege, blockade.

BELFRY: *घण्टागृहम्; यस्मिन् प्रासादशृङ्गे वादनाय घण्टा स्थाप्यते.

BELIE (v.t.): I. To show to be false: expr. by (1) व्यनक्ति (व्यञ्ज्, c. 7); (2) वि-वृणोति (वृ, c. 5); (3) प्रकाशयति (nomi.) etc. (= to show: q.v.) *the (wanton sword of) language of bad men b. s their heart* हृदयं निगूहतः स्फुरदसाधोर्विवृणोति वागसिः, Ki. xiv. 12. II. To calumniate, misrepresent: q.v.: अप-वदति (वद्, c. 1).

BELIEF (subs.): I. Credence: (1) विश्वासः, *worthy of b.* विश्वासयोग्यः (ग्या, ग्यं): v. Credible; (2) प्रत्ययः. II. Religious faith: (1) श्रद्धा; (2) विश्वासः; (3) आस्तिक्यम्; (4) आस्तिक्यबुद्धिः III. Doctrine, opinion: q.v. मतम्. IV. The object of belief: expr. by the verb: *ghosts are the belief of fools* *मूर्खा भूतेषु विश्वसन्ति.

BELIEVE (v.i.): I. To have faith in: (1) विश्वसिति (श्वस्, c. 2.) (with loc.) *when does a virgin b. in man* पुंसि विश्वसिति कुत्र कुमारी, N. v. 100. (2) प्रत्येति (इ, c. 2.) (with acc.) *every body b. s in the existence of his self* सर्वो ह्यात्मास्तित्वं प्रत्येति, S. II. To think, suppose: q.v.: (1) सम्भावयति; (2) मन्यते (मन्, c. 4.).

BELIEVE (v.t.): (1) प्रत्येति, *if you don't b. me* यदि मम वचने न प्रत्येषि, Ra.; (2) विश्वसिति, *so that his Highness would b. me* यथा मां विश्वसेद् विभुः, A. r.; (3) श्रद्दधाति *or* श्रद्धत्ते (धा, c. 3) *who will b. the real fact* कः श्रद्धास्यति भूतार्थम्, Mr. iii.; (4) सम्भावयति (c. of भू: = to think possible), *who will b. that the Maurya king sold the ornament* मौर्ये भूषणविक्रयं नरपतौ को नाम सम्भावयेत्, Mr. v. Ph. *I dont b. this* अत्र मेऽप्रत्ययः.

BELIEVER (subs.): (1) श्रद्धालुः; (2) विश्वासिन् (m.); (3) आस्तिकः (a religious b.).

BELL: घण्टा, *to ring a b.* घण्टां वादयति (c. of वद्); *small tinkling b. s* किङ्किणी, *B. man*: v. Bell-ringer.

BELL-FOUNDER: *घण्टाकारः.

BELL-FOUNDRY: *घण्टासन्धानशाला.

BELL-METAL: *घोषः; ताम्रत्रपुमिश्रितोपधातुभेदः, कांस्यम् (properly an alloy of copper and zinc).

BELL-RINGER: (1) घण्टावादकः; (2) घण्टाताडः; (3) घाण्टिकः.

Belle : (1) सुन्दरी ; (2) मत्तकाशिनी ; (3) वरवर्णिनी.

Belles-letters : अलङ्कारादिशास्त्रम् : v. Literature.

Belligerent : (1) युध्यमानः (ना, नं) ; (2) रणाभियुक्तः (क्ता, क्तं).

Bellow (v.i.) ; नर्दति (नर्द्, c. 1.) : v. To roar, sound.

Bellowing (subs.) : (1) नर्दितम् ; (2) नर्दनम् ; (3) गर्जनम् : v. Roaring.

Bellows : (1) भस्त्रा, *a black-smith's b.* कर्मकारभस्त्रा, H. ; (2) दृतिः ; (3) चर्मप्रसेविका.

Belly (subs.) : I. Of an animal : (1) उदरम् ; (2) कुक्षिः ; (3) तुन्दम्, A. ; (4) पिचिण्डः, A. *One who has a big b.* तुण्डिलः *or* पिचिण्डिलः (ला, लं). II. The womb : q.v. : कुक्षिः. III. The stomach : q.v.

Belly, belly out (v.i.) : v. Swell out, project.

Belly-ache : उदरशूलम्, *Śr.* ; उदरवेदना.

Belly-band : उदरत्राणम् : v. Girth.

Belly-ful (adv.) : आकण्ठम् (- up to the neck), *they ate b.* अमीभिराकण्ठमभोजि, N. xvi. 92.

Belong (v.i.) : I. To be the property of : expr. by the gen. with भू gen. understood : *it is said that a field b. s to him who clears the jungle* स्थाणुच्छेदकस्य केदारमाहुः, M. ix. 44 : v. Belonging to, have. II. To relate to, concern : q.v.

Belonging to (as adj.) : (1) by- ईय deriv. *b. to another* अन्यदीयः (या, यं) : *b. to a king* राजकीयः ; (2) by- अ der. : *b. to the season* आर्तवः (वी, वं) ; *b. the next world* पारलौकिकः (की, कं) ; (3) by- य der. : *b. to one's father* पित्र्यः (त्र्या, त्र्यं) ; *b. to a cow* गव्यः (व्या, व्यं).

Beloved (adj.) : (1) प्रियः (या, यं), *o, my b.* अयि प्रिये, N. ; (2) इष्टः (ष्टा, ष्टं) ; (3) वल्लभः (भा, भं) ; (4) दयितः (ता, तं) ; v. Dear (II).

Below (prep.) : I. Of place : (1) अधः *or* अधस्तात् (with gen.) ; (2) तले (with gen.), *b. the bed* पर्यङ्कतले, H. : v. Beneath, under. II. Less than : Ph. : *b. two years* ऊनद्विवार्षिकः, M. v. 68. ; v. Under. III. Of rank or dignity : अनु (with acc.) : v. Beneath.

Below (adv.) : I. Of place : (1) अधस् ; (2) अधस्तात् (from b.) (3) अधोभागे (not of motion) ; (4) नीचैः : v. Down. II. In the regions of the dead : (1) अधोलोके ; (2) अधोभुवने. III. To those regions : अधोलोकम् etc.

Belt (subs.) : मेखला (also=sword-belt) : v. Girdle.

Belt (v.t.): v. To encompass.

Bemoan (v.t.) : (1) वि- लपति (लप्, c. 1.), *b.s. the loss of his son* पुत्रशोकेन विलपति ; *b.s. the death of his brother* भ्रातृमरणात् विलपति *or* भ्रातृमरणशोकेन विलपति ; (2) अनुशोचति (शुच्, c. 1.) (rare) *I b. my fate* भाग्यमनुशोचामि ; (3) परिदेवयति (देव्, c. 10.) (rare) v. To lament, bewail. N.B. Observe that only (2) takes a direct object.

Bench I. A seat : no equiv. : पीठः ; पट्टः ; फलकः, etc. may be used. II. The seat of justice : (1) धर्मासनम् (the personal seat); (2) अधिकरणमण्डपः, Mr. ix. ; (3) व्यवहारमण्डपः, Mr. ix.

Bencher (of an inn of law) : *सभासद्.

Bend (v.t.) ; I. To inflect : (1) नमयति, आ-, अव-, (c. of नम्), *a bow not bent before* धनुरनमितपूर्वम्, R. xi. 72. ; (2) आवर्जयति (वृज, c.10), *b.ing the boughs* आवर्ज्य शाखाः, R. xvi. 19. ; (3) वक्रीकरोति (कृ, c.8) (to curve) ; (4) भुजति, आ-, वि-. (भुज्, c.6.), *b.ing his neck* विभुज्य कण्ठं, N. xi. 12. ; (5) जिह्मयति (nomi.) (rare), Ph. *(a bow that has been) bent* : चक्रीकृतम्, Ku. ; मण्डलीकृतम् *or* आविर्मण्डलम्, Ki. (धनुः). II. Fig. : To subdue : q.v. : (1) नमयति, R. ; (2) आवर्जयति, D. III. To apply or exert : q.v. Ph. *to b. one's mind* मनो ददाति (दा, c. 3.) ; *to b. the brow* भ्रूभङ्गं करोति.

Bend (v.i.) I. To crook or be curving : (1) नमति, अव-, आ-, (नम्, c. 1.) (2) by भवति and any one of the adj.s given under crooked, curved. II. To bow : q.v. : नमति. III. To be closely directed. Ph. *bent on revenge* प्रतिचिकीर्षु (mfn) ; *bent on mischief* जिघांसु (mfn.) *or* हिंसापरायणः (णा, णं) ; *bent on religion* धर्मपरायणः (णा, णं).

Bend down : I. Trans. : अव-नमयति, आ-, (c. of नम्). II. Intrans. : अव-नमति आ-, (नम्, c. 1.),

head much bent down with sorrow दुःखेन भृशानतं शिरः, Si.

BEND (subs) : of a river : (1) वक्रम् ; (2) वङ्कः ; (3) पुटभेदः (वक्रीकरणम्).

BENDING (subs) : (1) नतिः ; (2) नमनम् ; अव-, आ-, ; (3) आवर्जनम्.

BENDING (adj.) : i. e. overhanging : प्रलम्बः (म्बा, म्बं).

BENEATH (prep) : I. Under : (1) अधः *or* अधस्तात् (with gen.) or by the adj. अधस्थः (स्था, स्थं), *b. the banyan tree* न्यग्रोधस्याधस्तात्, P. iii. 4. ; (2) तले in comp., *b. the bed* पर्यङ्कतले, H. Ph. *b. a. tree* वृक्षमूले, V. s. II. Fig. : Ph, *our country sinks b. his yoke* *तस्य पीडनेनाधोगच्छत्यस्मद्देशः. III. Lower in rank etc. : अनु (with acc.) *the gods are b. Vishnu* अनुहरिं सुराः, S. k. : v. Low, inferior. IV. Unbecoming, unworthy of : expr. circum. : *he thinks it b. his dignity to converse with me* *स मां सम्भाषणस्यायोग्यं मन्यते.

BENEATH (adv.) : (1) अधः ; (2) अधस्तात् : v. Below.

BENEDICTION : (1) आशिस् (f.) ; (2) आशीर्वादः : v. Blessing.

BENEFACTION : v· Benefit, donation.

BENEFACTOR : (1) उपकर्तृ (m.) ; (2) उपकारकः ; (3) उपकारिन् (m.) ; (4) हितकारिन् (m.) ; (5) प्रियकृत्.

BENEFACTRESS : (1) उपकर्त्री ; (2) उपकारिणी ; (3) हितकारिणी.

BENEFICE : वृत्तिः. *A b. d. clergy man* : वृत्तिभुक् पुरोहितः (?).

BENEFICENCE : (1) परोपकारिता ; (2) दानशीलता (= magnificence : q.v.).

BENEFICENT : I. As applied to men : (1) परोपकारिन् (f. णी) ; (2) परोपकारकः (का, कं) ; (3) दानशीलः (ला, लं) (munificent : q.v.). II. As applied to acts etc. : (1) हितकरः (री, रं) ; (2) हितकारिन् (f. णी).

BENEFICENTLY : v. Benevolently, kindly, liberally.

BENEFICIAL : Ph. *b. results* शुभफलानि ; *b. exertions* हितचेष्टितानि : v. Profitable, useful. *To be b. to or for* : हिताय (with gen.) : *agriculture is b. for the whole human race* कृषिः सर्वलोकहिताय : v. Good (subs.)

BENEFICIALLY : v. Profitably, usefully.

BENEFICIARY : (1) वृत्तिभुज् (mfn.) (?) ; (2) वृत्तिभोगिन् (f. नी) (?).

BENEFIT (subs.) I. An act of kindness, a favour conferred : उपकारः, *like b. s. conferred on bad men* उपकार इवासति प्रयुक्तः, Ki. xiii. 33. II. Advantage, profit : q.v. : (1) उपकारः ; (2) हितम्, *for public b.* प्रकृतिहिताय, Sa. vii.

BENEFIT (v.t.) : उपकरोति (कृ, c. 8.) : v. To profit.

BENEFIT (v.i.) : v. To profit.

BENEVOLENCE : (1) हितैषिता ; (2) परोपकारिता : v. Generosity.

BENEVOLENT : I. As applied to persons : (1) हितैषिन् (f. णी) ; परोपकारिन् (f. णी) : v. Generous. II. As applied to acts, institutions, etc. (1) हितकरः (री, रं) ; (2) हितकारिन् (f. णी.)

BENEVOLENTLY : (1) हितेच्छया ; (2) कृपया (= kindly : q v.).

BENIGHTED : I. Lit : Ph. *we were b. in the wood* वन एवास्माकं निशा जगाम. II. Fig., of mind etc. . (1) तिमिरावृतः (ता, तं) ; (2) तमोवृतः (ता, तं).

BENIGN, BENIGNANT : दयालु (mfn.) : v. Kind, generous.

BENIGNITY : I. Kindness : q.v. दयालुता. II. Salubrity : q.v.

BENIGNLY : (1) सदयम् (kindly : q.v.) ; (2) सौजन्येन (graciously).

BENISON : आशिस् (f.) : v. Blessing.

BENT (subs.) : I. Flexure, curvity : (1) नतिः ; (2) जिह्मता ; (3) वक्रता. II. Slope, declivity : q.v. III. Inclination, disposition : q.v. : भावः. IV. Particular direction or tendency q.v. v. Bent grass : दूर्वा.

BENUMB : (1) जडीकरोति *or* जडयति (nomi.) ; (2) स्तभ्नाति (स्तम्भ्, c. 9.).

BENZOIN : (1) कपितैलम् ; (2) अश्मपुष्पम्; (3) शैलेयम्.

BEQUEATH : (1) ददाति *or* यच्छति, प्र- (दा, c. 3 *or* 1.) ; (2) प्रतिपादयति (c. of पद्) ; (3) समर्पयति

(c. of ऋ). N.B. These words simply mean *to give* : when precision is wanted, some qualifying words must be added : *b. ed all his personal property to me* *सर्वां अस्थावरसम्पत्तीर्मामिच्छापत्रेण प्रदत्तवान्.

BEQUEST : दानम् (= gift : q.v.) ; (or precisely) *इच्छापत्रेण दानम्.

BEREAVE (v.t.) : (1) (वियोजयति (युज्, c. 10.), *you will be bereft of your dear wife* वियोक्ष्यसे वल्लभया, N. i. 138. ; (2) विश्लेषयति (c. of श्लिष्). v. To deprive.

BEREAVEMENT : (1) वियोगः ; (2) विप्रयोगः : v. Deprivation, separation.

BEREAVER : (1) वियोजकः ; (2) विप्रयोजकः ; (3) वियोक्ता ; (4) विश्लेषकः.

BERGAMOT : जम्बीरजातीयवृक्षविशेषः.

BERRY : no equiv. : *सारफलम्.

BERTH : I. Anchorage : q.v. II. Cabin : q.v. : कोष्ठः (?). III. A place, situation: q.v.: पदम्.

BERYL : मणिविशेषः ; गोमेदः (?).

BESEECH : प्रार्थयते (अर्थ, c. 10.) : v. To beg, entreat, implore.

BESEEM : युज्यते : v. To become (v.t.).

BESET : I. To besiege, block up : q.v. : रुणद्धि (रुध्, c. 7.). II. To harass, perplex : q.v. : बाधते (बाध्, c. 1.). III. To encompass : q.v. वेष्टते, परि-, (वेष्ट्, c. 1.). VI. To set on or in : q.v. : छुरति, (छुर्, c. 6.).

BESHREW : v. To curse.

BESIDE (prep.) : I. Near, by the side of : q.v. : पार्श्वे (with gen.) *b. her father* पितुः पार्श्वे, Ku. vi. 84. II. Over and above : v. Besides. III. Not belonging to : बहिः (with abl.), *b. my theme* प्रबन्धाद्बहिः *or* प्रबन्धस्य बहिर्भूतः (ता, तं).

BESIDE ONE'S SELF : (1) हतज्ञानः (ना, नं) ; (2) विगतचेतनः (ना, नं).

BESIDES (prep.) : (1) by a comp. with भिन्नः (न्ना, न्नं) *or* व्यतिरिक्तः (क्ता, क्तं) *b. this, another misfortune has befallen us* एतद्भिन्नं *or* एतद्व्यतिरिक्तं व्यसनमपरमस्माकमापतितम् ; (2) विहाय, अपहाय, etc. (with acc.), *I have no other friend b. you* त्वामपहाय ममापरो बन्धुर्नास्ति.

BESIDES (adv.) : expr. by अन्यः (न्या, न्यत्) *or* अपरः (रा, रं) *or* by the prep. : *are there any here b.* किमन्यापरे सन्ति, *I. give you a horse b.* एतद्व्यतिरिक्तं घोटकं तुभ्यं ददामि v. Also, moreover.

BESIEGE (v.t.) : रुणद्धि, उप-, अव-, (रुध्, c. 7.), *b. d Champā* रुरोध चम्पाम्, D. ii. ; *let (the Yadavas) b. Māhishmati* माहिष्मतीमुपरुन्धन्तु, Si. ii. 64.

BESIEGER : (1) अवरोधकः ; (2) अवरोद्धृ (m.) (?) ; (3) रोधिन् (m.) (?).

BESIEGING (subs.) : (1) रोधः ; (2) अवरोधः ; (3) उपरोधः ; (4) रोधनम्.

BESMEAR (v.t.) : लिम्पति, वि-, आ-, समा-, उप-, अनु-, (लिप्, c. 6.) : v. To anoint.

BESOM (subs) : सम्मार्जनी : v. Broom.

BESOT (v.t.) : मोहयति (c. of मुह्) : v. To stupefy, infatuate.

BESPATTER (v.t.) : (1) अभ्युक्षति (उक्ष्, c. 1.) ; (2) अभिषिञ्चति (सिच्, c. 6.).

BESPEAK (v.t.) : I. To order before hand : Ph. *I bespoke a vessel to carry me to London* *पूर्वमेव मयादेशि यानं यानाय लण्डने : v. To encage, hire. II. To be taken : q.v. : (1) कथयति Śr. ; (2) वदति (वद् c. 1.), *(these signs) b. this death* तं वदन्ति गतायुषम्, Śr. ; (3) आवेदयति (c. of विद्), K. III. To address : q.v. भाषते (भाष्, c. 1.)

BESPREAD : v. To spread.

BESPRINKLE (v.t.) : (1) अभिषिञ्चति ; (2) अभ्युक्षति : v. To sprinkle.

BEST (adj.) : Super. of good : q.v. Ph. : *to the b. of one's ability* यावच्छक्तिः.

BEST (adv.) : v. Well.

BESTIAL (adj.) : v. Beastly.

BESTIALITY : i.e. unnatural connection with a beast: (1) पशुगमनम्; (2) पशुषु मैथुनाचरणम्, V.s.

BESTIR ONESELF : (1) यतते, प्र-, (यत्, c. 1.) ; (2) घटते (घट्, c. 1.) : v. To exert.

BESTOW (v.t.) : I. To give, grant : q.v. : ददाति (दा, c. 3.). II. To give in marriage : ददाति, प्र-: *she should be. b. ed on him whom she fancies* यं चाभिलषेत् तस्मै देया, D. vi. III. To

apply, use : q.v. : प्र-युनक्ति (युज्, c. 7.). IV. To deposit, store : q.v. : नि-दधाति (धा, c. 3.).

Bestowal : (1) दानम् ; (2) प्रदानम् ; (3) प्रतिपादनम्.

Bestower : (1) दातृ *or* प्रदातृ (f. त्री) ; (2) द *or* प्रद (f. दा), in comp. ; *b. of money* धनद: (दा, दं).

Bestrew (v.t.) : स्तृणोति (स्तृ, c. 5.) : v. To strew.

Bestride (v.t.) : Ph. *to b. a horse* अश्वमारोहति (रुह्, c. 1.) : v. To stride.

Bet (sub.) : (1) पण: ; (2) ग्लह: (rare).

Bet (v.t.) पणं करोति (कृ, c. 8.) ; (2) पणतां नयति (नी, c. 1.), Ki. xi. 47.

Betake (v.i.) : (1) आ-श्रयति, समा-, उपा-, (श्रि, c. 1.), *b. n to Malayaketu* मलयकेतुमाश्रित: (ता, तं), Mu. iii. (2) भजति,-ते , (भज्, c. 1.), *shall I b. to quiet* शान्तिं भजामि, Ma. n. IV. 50. : v. Recourse to, have.

Betel (subs.) : (1) ताम्बूली ; (2) नागवल्ली ; (3) नागलता ; (4) कुवली. *The prepared b.* ताम्बूलम्. *B. -seller* ताम्बूलिक:. *B. -box= -bearer* ताम्बूलकरङ्कवाहिनी, K.

Betel-nut : (1) पूगम् ; (2) गुवाकम् ; (3) ताम्बूलम्. *B. tree* : (1) पूग: ; (2) क्रमुः ; (3) गुवाक:.

Bethink oneself : संचिन्तयति (चिन्त्, c. 10) : v. To remember, reflect.

Betide (v.t.) : v, To happen, befall.

Betimes (adv.) : I. Seasonably : q.v. : समये. II. Soon : q.v. : शीघ्रम्.

Betaken (v.t.) : सूचयति, आ-, वि-, (सूच्, c. 10.) : v. To forebode.

Betray (v.t.) : I. To give up treacherously : Ph. *b. ed the fleet to the pirates* *सविस्रम्भघातं पोतावलीं दस्युहस्ते समर्पयामास (c. of ऋ) ; *do not b. your trust* मा विश्वासं वधी: (हन्, c. 2.) *or* मांक्षी: (भञ्ज्, c. 7.). II. To disclose : q.v. : भिनत्ति (भिद्, c. 7.), *b. ed the secret* रहस्यं बिभेद. III. To mislead, expose, or indicate : q.v. IV. To deceive : q.v.

Betrayal : Ph. *the b. of a city* शत्रुहस्ते नगरसमर्पणम् : v. To betray.

Betrayer : (1) विश्वासघातक: (= traitor) ; (2) वञ्चक: (=deceiver). Ph. *where is the b. of the city* क स विश्वासघातक:, यो नगरं शत्रुहस्ते समर्पयामास. N.B. Note that in such cases (1) or (2) simply will not do.

Betroth (v.t.) : (1) ददाति (दा, c. 3.) (only of b. al by the father or guardian of the girl), *I apprehend she is already b. ed* दत्तपूर्वेत्याशंक्यते, Ma. ; (2) प्रतिपादयति (c. of पद्), Si.

Betrothal : (1) वाग्दानम् (= verbal b. of a girl by her father or guardian) ; (2) विवाहसम्बन्ध:.

Betrothed (adj.) : (1) दत्ता *or* वाग्दत्ता (a girl b. by her father or guardian) Da. com. ; (2) प्रतिपादिता, *b. ed wife* प्रतिपादिता वधू:, Si. xvi. 49. (3) प्रतिश्रुत: (ता, तं) (= engaged, promised). N.B. The person to whom one is b. is put in the dat.

Better (adj.) : I. Comparative of good : q.v. II. Preferable ; Ph. *b.* (*to have*) *a learned enemy than a stupid freind* पण्डितोऽपि वरं शत्रुर्न मूर्खो हितकारक:, P. i. 21. ; *b. to die than to mix with low people* वरं प्राणत्यागो न पुनरधमानामुपगम:, H. i. ; *b. to keep silence than to utter a lie* वरं मौनं कार्यं न च वचनमुक्तं यदनृतम् ; H. III. In improved health : Ph. : *are you b.? Oh, yes, a little b.* अपि ते लघुसन्तापान्यङ्गानि ? अहो अस्ति विशेष:, Sa. iii.

Better off, be : v. Well off, be.

Better (subs.) : I. Advantage or victory : q.v. : Ph. *to get the b. of an enemy* शत्रूमभिभवति (भू, c. 1.). II. Improvement : q.v. III. In pl. superiors गुरव: (m. pl.) : Ph. *your b. s in knowledge* त्वदधिकज्ञानसम्पन्ना:.

Better (v.) : To mend, improve.

Better (adv.) : v. Well. Ph. : *I love you b. than self* *त्वय्यहं प्राणेभ्योऽधिकमनुरक्त:.

Between, betwixt (1) by the gen. (not of time), *the distance b. the Hemakūta and the Vindhyas is very great* विप्रकृष्टमन्तरं हेमकूटविन्ध्याचलयो:, K. ; *the space b. the divine rivers Sarasvati and Drishadvati* सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम्, M. ii. 17. ; *enmity b. us* तस्य च

मम च वैरम्, D. ii. ; *the conflict b. the two important duties* विप्रतिषेधं तं गुरुणोरथ कार्ययोः, Si. ii. 6. ; (2) मध्ये *or* अन्तरे (with gen.) (of time and occasionally of other relations) : *middle age is b. sixteen and seventy years* षोडशसप्तत्योरन्तरे मध्यं वयः, Śr.

BEVERAGE : पानीयम् : v. Drink.

BEVY : I. Of ladies etc. : गणः. II. Of birds : कुलम् : v. Flock.

BEWAIL (v.) : वि-लपति (लप्, c. 1.), *what are you b. ing for* किमर्थं विलपसि : v. To lament, weep, grieve.

BEWAILING (subs). : (1) विलापः ; (2) परिदेवनम् ; (3) क्रन्दनम् : v. Lamentation.

BEWARE : no exact equiv. : *b. of him* तस्मिन् बहुविश्वासो मा भव ; *b. of your servants that they may not deceive you* तथा प्रयतेथाः यथा न वञ्चयसे सेवकैः ; *b. of your steps* सावधानं परिक्राम : v. Care.

BEWILDER : (1) सं-मोहयति (c. of मुह्) ; (2) जडीकरोति (कृ, c. 8.) *or* जडयति (nomi.) ; (3) संभ्रमयति (c. of. भ्रम्) ; (4) विह्वलीकरोति (कृ, c. 8.).

BEWILDERED : (1) सम्भ्रान्तः (न्ता, न्तं) ; (2) विह्वलः (ला, लं) ; (3) किंकर्तव्यतामूढः (ढा, ढं) (=not to know what to do) ; (4) संमुग्धः (ग्धा, ग्धं).

BEWILDERMENT : (1) सम्भ्रमः ; (2) वैक्लव्यम् ; (3) सम्मोहः : v. Perplexity.

BEWITCH : I. To charm or fascinate : (1) मोहयति, परि-, वि-, सं-, (c. of मुह्,), *let not Cupid b. you* मा मूमुहत् खलु भवन्तमनन्यजन्मा, Ma. i. ; (2) मदयति (c. 10. मद्), *which b. the heart* मनो मदयन्ति ये, Ma. i. II. To fascinate by magic : (1) मोहयति ; (2) मन्त्रेण वशीकरोति (कृ, c. 8.).

BEWITCHER : v. Enchanter.

BEWITCHING (adj.) : मोहनः (नी *or* ना, नं) : v. Charming.

BEYOND (prep.) : I. On the further side of : Ph : *b. it a desolate forest and b. that the mount Kailāsa* ततः परतो निर्मानुषमरण्यं, तच्चातिक्रम्य कैलासगिरिः, K. ; *b. the range of speech and mind* अतीत्य वाचां मनसां च गोचरम्, Ki. xviii. 41. II. Further than, past : Ph. *this is b. us* इदमस्माकमसाध्यम् ; *it was even b. my expectations* मनोरथानामप्यभूमिः, Sa. vii. ; *b. measure* अतीव ; *who is b. our senses* अतीन्द्रियाय, M. n. ; *naturally b. any one's comprehension* निसर्गदुर्बोधः (धा, धं) Ki. Ph. : *b. the seas* : i.e. out of the country : द्वीपान्तरे (not समुद्रपारे, which=on the coast of the sea).

BEYOND (adv.) : i.e. yonder : q.v. : दूरे, *from b.* दूरात्.

BEYOND, GO or PASS : (1) अतिक्रामति (क्रम्, c. 1.) (with acc.) ; (2) अत्येति (इ, c. 2.) (with acc.).

BEZEL : *रत्नाधारः ; अङ्गुरीयकस्य रत्नप्रणिधानभागः.

BIAS (subs.) : I. Inclination : q.v. प्रवणता. Partiality : q.v. : पक्षपातः.

BIAS (v.t.) : (1) आवर्जयति (c. of वृज्), M. n. ; (2) प्रह्वीकरोति (कृ, c. 8.), *my heart is b. ed by (your) good qualities* प्रह्वीकृतं मे हृदयं गुणौघैः, Ki. iii. 12.

BIB : *(बालकस्य) उरश्छदः.

BIBBER (subs.) : (1) सुरापः (पा, पं) ; (2) मद्यपः (पा, पं) : v. Drunkard.

BIBLE : *कृष्टीयधर्मपुस्तकम्.

BIBLICAL (adj.) : expr. by comp., *b. erudition* *बाइबलपाण्डित्यम्.

BIBLIOGRAPHER : पुस्तकविद्याविशारदः and sim. comp.s.

BIBLIOGRAPHY : पुस्तकविद्या ; पुस्तकानां मुद्राङ्कनादिनिर्णायकशास्त्रम्.

BIBLIOMANIA : *दुर्लभपुस्तकसंग्रहणोन्मादः and sim. comp. s.

BIBLIOMANIAC : *दुर्लभपुस्तकसंग्रहणोन्मादिन् (f. नी) and sim. comp. s.

BIBLIOPOLIST : *पुस्तकविक्रेतृ (f. त्री) : v. Bookseller.

BIBULOUS : (1) जलशोषकः (का, कं) ; (2) जलचोषकः (का, कं) (?).

BICKER (v.i.) : वि-वदते (वद्, c. 1.) : v. To wrangle.

BICKERING (subs.) : (1) कलहः ; (2) विवादः ; (3) द्वन्द्वम्.

BID (v.t.) : I. In auction : *वदति (वद्, c. 1.) :

I. will b. even hundred rupees for the horse *शतरूप्यमुद्रयाप्यश्वं क्रीणामिति वदामि. II. To request, tell : q.v. : Ph. *to b. defiance* : v. To defy ; *to b. welcome* स्वागतमिति वदति ; *to b. adieu* : v. Adieu.

BIDDER (subs.) : (1) *वादिन् (f. नी) ; (2) चिक्रीर्षु (mfn.).

BIDDING (subs.) : *वादः ; चिक्रीषावादः.

BIENNIAL (adj.) : (1) द्विवर्षीणः (णा, णं) ; (2) द्विवार्षिकः (की, कं).

BIER (subs.) : (1) शवयानम्; (2) शववाहनम्; (3) कटः

BIESTINGS (subs.) : (1) पीयूष (mn.) ; (2) पेयूष (mn.).

BIFURCATION : Ph. *near the b. of the river* यत्र नदी द्वयोः प्रवाहयोः प्रविभक्ता तस्य समीपे.

BIG (adj.) : I. Large, huge : q.v. : (1) बृहत् (f. ती) (not applicable to men) ; (2) बृहत्-कायः *or* महाकायः (या, यं) (=large-bodied) ; (3) महाप्रमाणः or अतिप्रमाणः (णा, णं) (=of large height), *a b. man* महाप्रमाणः पुरुषः K., *saw the b. (horse) Indrāyudha* अतिप्रमाणमिन्द्रायुधमद्राक्षीत्, K. II. Pregnant (Lit. and Fig.) : q.v. : III. Boastful : q.v.

BIGAMIST : I. The man : (1) द्विभार्यः ; (2) द्विपत्नीकः. II. The woman *द्विभर्तृका ; वर्तमाने पत्यौ या स्त्री पुनर्विवाहं करोति.

BIGAMY : (1) *द्विस्त्रीकरणम् (of men ; (2) *द्विपती-करणम् (of women).

BIGHT : v. Bay.

BIGNESS : v. Bulk, size.

BIGOT : *धर्मनिर्बद्धः (द्धा, द्धं) ; यः (या, यं) अविचारेणान्य-मतानि प्रत्याख्याय स्वमतमनुवर्तते.

BIGOTED (adj.) : v. Bigot. Ph. *this is a b. country* *अत्र पुरुषाः अविचारेण स्वमतासक्ताः *or* परधर्म-विद्वेषिणः.

BIGOTRY : *धर्मनिर्बन्धः ; स्वमताग्रहः ; अविचारेण स्वमतासक्तिः.

BILE : पित्तम्. *To stir one's b.* (Fig.) वायुं प्रकोपयति (c. of कुप्).

BILGE-WATER : नौकातलजलम् (?).

BILIARY (adj.) : *the b. duct* पित्तवाहिनी (?).

BILIOUS (adj.) : पैत्तिकः (की, कं) : *b. fever* पित्त-ज्वरः.

BILK (v.t.) : वञ्चयते (वञ्च्, c. 10.) : v. To cheat.

BILL (sub.) : I. A declaration in writing लेखः, *a b. of indictment* अभियोगलेखः. II. A bill of exchange : *हुण्डिः, *a b. payable at sight* *दर्शन-देयो हुण्डिः. III. Proposed law : *पाण्डुलिपिः, *the House of Commons rejected the b. by a great majority* *बहुसम्मतानामैकमत्येन साधारणसभा पाण्डुलिपिं प्रत्यादिदेश. IV. A written or printed notice : घोषणापत्रम् : v. Advertisement, placard. V. An account (rendered) of money due : *देयपत्रम्, *make out a b. for me.* मया यत्तुभ्यं देयं तस्य गणनां कुरु. Miscell. : *a. b. of sale* विक्रयपत्रम् ; *a b. of lading* *प्रेरणपत्रम्. VI. The beak of a bird : (1) चञ्चुः ; (2) चञ्चुपुटः. VII. A mattock, a hatchet : q.v. : दात्रम्.

BILL (v.i.) : Ph. *the pigeons are b. ing and cooing* अन्योन्यस्य चञ्चुं संघट्य कपोताः कूजन्ति.

BILLET (subs.) : I. A note : q.v. : पत्रम्. II. A ticket : q.v. निदर्शनपत्रम्. III. A log of wood : काष्ठम् : v. Log, stick.

BILLET (v.t.) ; i.e. to quarter as soldiers : निवेशयति (c. of विश्).

BILL-HOOK : फणिमुखः ; D. : v. Hatchet.

BILLIARD (adj.) : Ph. *a b. ball* *अण्डम् ; *b. room* *अण्डागारम्.

BILLIARDS : *अण्डक्रीडा. *To play at b.* *अण्डैः क्रीडति.

BILLION : खर्वम्.

BILLOW : (1) महोर्मिः ; (2) कल्लोलः ; (3) उल्लोलः ; (4) लहरिः : v. Wave.

BILLOWY : (1) तरङ्गितः (ता, तं) ; (2) ऊर्मिमालिन् (f. नी) ; (3) कल्लोलमालाकुलः (ला, लं) ; (4) उद्वेलः (ला, लं).

BIN (subs.) : Ph. *corn-b.* धान्यकोष्ठः ; *wine-b.* मदिराकोष्ठः.

BINARY (adj.) : Ph. *a b. compound* *द्विभूतजं द्रव्यम् ; *b. scale* *द्विकमूला गणनापद्धतिः.

BIND (v.t.) : I. Lit., to tie : q.v. : (1) बध्नाति, नि-, (बन्ध्, c. 9.) *b. ing firmly to a post* स्थूणया सह दृढबन्धनेन बद्ध्वा, P. i. 4. ; (2) सं-यच्छति (यम्, c. 1.) (=to restrain : q.v.), *as if bound by chains* निगडैरिव सं-यताम्, K. II. Fig., to restrain, hold in check : बध्नाति, नि-, (बन्ध्,

c. 9.), *bound by affection* स्नेहनिबद्धः (द्धा, द्धं), Ki. ii. 44., *b. s my sight* बध्नाति मे चक्षुः, R. xiii. 47. ; (2) नियन्त्रयति (यन्त्र्, c. 10), *laws do not b. him* *विषयस्तं न नियन्त्रयन्ति. Ph· *b. him by an oath* शपथेन तमाबद्धं कुरु III. To render costive : (1) बध्नाति, नि-, *b. ing of the bowels* बद्धविट्कता, Śr. ; (2) आनह्यति (नह्, c. 4.) IV. To bind books : (चर्मादिना) बध्नाति (?). V. To protect with a border : बध्नाति (?) : V. To border, fringe.

BIND OVER : आबध्नाति *or* आबद्धः (द्धा, द्धं) करोति (?). Ph. *b. him over in 100 Rs. recognizance to keep the peace* *शान्तिरक्षार्थं शतरूप्यमुद्रादानप्रतिज्ञया तमाबद्धं कुरु.

BIND UP : बध्नाति, नि-, (बन्ध्, c. 9.) : *the snakes as if b. ing up the wounds of the branches* शाखानां व्रणमिव निबध्नन्ति फणिनः, Mu. vi. 13.

BIND UP IN OR WITH : only in *pass.* : Ph. *my love for you is bound up with my nature* त्वयि मे भावनिबन्धना रतिः, R. viii. 52.

BINDER : i.e. book- b. : (1) *पुस्तकबन्धनकारी ; (2) *पुस्तकपिधाता.

BINDING (subs.) : I. In gen. : (1) बन्धः ; (2) बन्धनम्. II. Of a book : Perh पिधानम् : v. Covering. III. Of a dress : v. Border, fringe.

BINDING (adj.) : Of medicines : ग्राहिन् *or* संग्राहिन् (f. णी), Śr.

BIND-WEED : क्षीरविदारी (a species of convolvulus).

BINOCULAR (adj.) : (1) द्विनयनः (ना, नं) ; (2) द्विनेत्रः (त्रा, त्रं).

BINOMIAL : *द्विपदः (दा, दं). *B. theorem* *द्विपदवृद्धितत्त्वम्.

BIOGRAPHER : (1) *चरितलेखकः ; (2) जीवनचरितरचकः ; (3) *जीवनचरितकृत् (m.).

BIOGRAPHICAL : Ph. *b. writer* : v. Biographer ; *b. work* : v. Biography.

BIOGRAPHY : (1) चरितम्, *b. of Śriharsha* श्रीहर्षचरितम्, C. ; (2) जीवनचरितम् ; (3) जीवनवृत्तान्तः.

BIPARTITE (adj.) : Perh. द्वैधः (धी, धं).

BIPED (adj.) : (1) द्विपदः *or* द्विपादः (दा, दं) ; (2) द्विपाद् (m.), पदी (f.) पद्, (n.) (?).

BIRCH OR BIRCH-TREE : भूर्जः भूर्जपत्रः *or* (a species of b.)

BIRCHEN (adj.) : (1) by tat. comp. ; (2) भूर्जमयः (यी, यं).

BIRD : (1) विहगः ; (2) विहङ्गः ; (3) विहङ्गमः ; (4) पक्षिन् (m.) ; (5) पतत्रिन् (m.) ; (6) पतगः ; (7) खगः ; (8) शकुन्तः ; (9) शकुनः ; (10) विष्किरः ; (11) गरुत्मत् (m.) ; (12) द्विजः.

BIRD-CAGE : पिञ्जरम् *or* पञ्जरम्.

BIRD-CALL : पक्षिरुतानुकारिणी वंशी यया प्रलोभ्य पक्षिणो बध्यन्ते.

BIRD-CATCHER : (1) शाकुनिकः ; (2) पाक्षिकः.

BIRD-KEEPER : (1) विहगपालः ; (2) पक्षिपालः (?).

BIRD-LIME : पक्षिबन्धनार्थं श्यानोद्लेपम्.

BIRTH (subs) : I. Coming into life : (1) जन्मन् (n.) (the best equiv.), *blind from b.* जन्मान्धः (न्धा, न्धं) ; (2) जन्यम् ; (3) जननम् ; (4) जनिः ; (5) उद्भवः ; (6) उत्पत्तिः ; (7) भवः ; (8) सम्भवः ; (9) सूतिः ; Ph. *lordship from b.* गर्भेश्वरत्वम्, K. II. Lineage, discent : q.v. : (1) कुलम्, (2) अन्वयः ; Ph. *proud of one's b.* कुलाभिमानिन् (f. नी), Ki. ; *of high b.* अभिजनवत् (f. ती), Sa iii. The act of giving birth : (1) प्रसवः ; (2) प्रजननम्. IV. That which is born : v. Creature.

BIRTH, TO GIVE : (1) सूते (सू, c. 2.) ; (2) जनयति (c. of जन्) : v. To bring forth.

BIRTH-DAY : (1) जन्मदिनम् ; (2) जनिदिवसम्, Vi. vi. ; and sim. comp.s

BIRTH-PLACE : (1) जन्मभूमिः ; (2) जन्मस्थानम् ; and sim. comp.s.

BIRTH-RIGHT : (1) जन्मनः स्वत्वम् *or* अधिकारः ; (2) by circumlo., *sold his b. for a morsel of bread* *अपूपखण्डार्थं पितृसम्पत्स्वाद्यौ सर्वं स्वत्वं व्यक्रीणीत.

BISCUIT : *युरुपीयपिष्टकविशेषः.

BISECT : (1) द्वैधीकरोति *or* द्विधाकरोति (कृ, c. 8.) ; (2) समांशद्वयेन विभजति (भज्, c. 1.).

BISECTION : (1) द्विधाकरणम् ; (2) द्वैधीकरणम् ; (3) समांशद्वयेन विभागः.

BISHOP : *कृष्टीयसम्प्रदायेषु प्रधानाचार्यः.

BISHOPRIC : I. A bishop's office : प्रधानाचार्यत्वम्. II. Bishop's district *प्रधानाचार्यस्याधिकारः ; *b. of London* *लण्डनस्य प्रधानाचार्यस्याधिकारः.

BISMUTH : आलोहितशुक्लधातुप्रभेदः.

BISON : एमेरीकादेशीयो महिषाकारोऽरण्यजन्तुविशेषः.

BISSEXTILE : वैवुवत्सरैक्यार्थं पाश्चात्यपण्डिताश्चतुर्थे चतुर्थे वर्षे फेब्रुवारीमासमेकाधिकदिवसमूनत्रिंशद्दिवसात्मकमिति परिगणयन्ति। स च एकाधिकदिवसो वर्षस्तैर "बिसेक्स्टाइल्", "लिपइयार" चाभिधीयते.

BIT (subs.) : I. Of the bridle : (1) खलीन (mn.) ; (2) कविकः *or* कविका ; (3) वल्गा. II. A small piece : (1) खण्डः ; (2) ग्रासः (=a mouthful). *Not a b.* न मनागपि.

BIT (v.t.) ; *To b. a horse* अश्वस्य मुखे खलीनं ददाति, Mu. *or* खलीनं प्रक्षिपति (क्षिप्, c. 6.), P. iv. 7.

BITCH : I. Lit. : (1) कुक्कुरी ; (2) शुनी ; (3) सरमा. II. As a term of reproach : बन्धकी.

BITE (v.t.) : I. With teeth etc. : दशति, वि-, सं-, (दन्श्, c. 1.) : Ph. *one should not b. off one's nails* दन्तैर्नोत्पाटयेत् (c. of पट्) नखान्, M. iv. 69. ; *one who b. s his nails* नखखादी, M. ; *to b. the lips* ओष्ठौ दशति *or* खण्डति, वि-, (खण्ड् c. 1.), Si. xvii. 2., *or* निर्विभुनक्ति (भुज्, c. 7.) (poet) II. To produce a keen, pungent sensation : ज्वलयति (c. of ज्वल्,) III. To adhere to : q.v.

BITE (subs.) : I. The act of biting : दंशः ; *poisonous b.* सविषो दंशः, U. II. The wound made by biting : दंशः. III. A cheat or one who cheats q.v.

BITING (adj.) : i.e. sharp, severe, sarcastic : q.v.

BITTER (adj.) : I. Of the taste : तिक्तः (क्ता, क्तं). II. Harsh, stern : (1) कटु. (mfn.) *even by the b. words of Śishupāla* कटुनापि चैद्यवचनेन. Si. xv. 40. ; (2) मर्मविध् (mfn.) (Lit. piercing the vital parts) ; (3) निष्ठुरः (रा, रं) (prop= cruel.), *we are very b. ly reviled* अति निष्ठुरमुपालब्धाः स्मः, U. iv. III. Painful, severe : q.v. : उद्वेजनकरः (री, रं) : Ph. *b. cold* अत्यन्तशीतम्. IV. Mournful, distressing, pitiable : q.v.

BITTERLY : I. Severly, cruelly : q.v. : निष्ठुरम्. II. Sorrowfully, piteously : q.v. : Ph. *wept b.* भृशं *or* अत्यन्तं रुरोद.

BITTTERN : क्रौञ्चजातीयपक्षिभेदः.

BITTERNESS : I. Of taste : (1) तिक्तता ; (2) तिक्तत्वम्. II. Keenness of reproach, sarcasm : (1) कटुता ; (2) निष्ठुरता. III. Deep distress of mind : दुःखम्. IV. Impious feeling : पापण्डबुद्धिः. v. Malice, hatred : q.v. : विद्वेषः.

BITUMEN : (1) शिलाजतु (n.) ; (2) गिरिपुष्पकम् ; (3) शिलाद्रुः.

BITUMINOUS : शिलाजतुशालिन् (f. नी) (?) (=containing bitumen).

BIVOUAC (sub.) ; v. Watch, guard.

BIVOUAC (v.) : Ph. *"determined to b. there for the night"* अप्रमत्तास्तत्रैव यामिनीं यापयितुं कृतसंकल्पाः.

BLAB, BLABBER : वावदूकः : v. Babbler, tell-tale.

BLAB (v.t.) : भिनत्ति (भिद्, c. 7.) : v. To divulge : v. Also, to babble.

BLACK (adj.) : I. Of colour : (1) कृष्णः (ष्णा, ष्णं) ; (2) कृष्णवर्णः (र्णा, र्णं) ; (3) श्यामः (मा, मं) *or* श्यामलः (ला, लं) (=dark blue) ; (4) नीलः (ला, लं) (prop.=blue) ; (5) कालः (ला, लं) ; (6) मेचकः (का, कं) ; (7) मलिनः (ना, नं) ; *your heart must be very b. like your exterior* बहिरिव मलिनतरं तव मनोऽपि भविष्यति नूनम्, Gi. viii. 7. II. Fig., dismal, gloomy, calamitious, horrible, wicked : q.v. *B. and blue* : v. Livid.

BLACK (subs.) : I. The colour : (1) कृष्णः ; (2) कृष्णवर्णः. III. Black dress : (1) कृष्णवस्त्रम्, (2) कृष्णवसनम्. III. A black man : (1) कृष्णकायः (या, यं) ; (2) श्यामाङ्गः (ङ्गी, ङ्गं).

BLACK-ART : (1) इन्द्रजालम् ; (2) कार्मणम् : v. Magic.

BLACK-BALL (subs.) : (प्रत्याख्यानप्रदर्शनी) कृष्णगुटिका.

BLACK-BALL (v.t.) : प्रत्याख्याति (ख्या, c. 2.) : v. To reject.

BLACK-BERRY : फलविशेषः. In India, sometimes applied to जम्बु (n.)

BLACK-BIRD : पक्षिभेदः. In India, the term is applied to कोकिलः. (= Cuckoo).

BLACK-CATTLE : मांसार्थं पालिता गावः.

BLACKEN : I. To make black : (1) कालीकरोति, *b. s his face* मुखं कालीकरोति, Na. iii. ; (2) कृष्णीकरोति (rare) ; (3) श्यामीकरोति (=to make dark blue). II. To darken : q.v. III. To sully : q.v.

BLACKGUARD : (1) दुर्वृत्तः (त्ता, त्तं) ; (2) दुराचारः (रा, रं) : v. Rake.

BLACKING (subs.) : काली (?).

BLACKISH : (1) ईषत्कृष्णः (ष्णा, ष्णं). ईषत्कालः (ला, लं).

BLACK-LEAD : लोहभेदः ; *अङ्गारलोहः.

BLACKNESS : (1) कालिमन् (m.) ; (2) कृष्णत्वम् ; (3) कृष्णिमन् (m.) : v. Also, darkness.

BLACKSMITH : (1) कर्मकारः ; (2) कर्मारः ; (3) लोहकारः.

BLADDER : (1) क्लोमन् (m.) ; (2) मूत्राशयः ; (3) तिलकम् (rare).

BLADE : I. The cutting part of a knife etc. ; धारा. II. Of grass : (1) दल (mn.) ; (2) काण्डम् (?). III. A rake : q.v.

BLADE-BONE : v. Shoulder-bone.

BLAMABLE or BLAMEABLE : (1) निन्दनीयः (या, यं) ; (2) निन्द्यः (न्द्या, न्द्यं) ; (3) निन्दार्हः (र्हा, र्हं) : v. Faulty, culpable.

BLAMABLENESS or BLAMEABLENESS : निन्द्यता : v. Culpability.

BLAME (subs.) : I. Censure, reprehension : q.v. : निन्दा. II. Fault, crime दोषः, *he lays the b. on another's shoulders* अन्यस्मिन् or अन्यस्य स्कन्धे स दोषं न्यस्यति (अस्, c. 4.). *Without b.*= blameless : q.v.

BLAME (v.t.) : निन्दति, वि-, (निन्द्, c. 1.) : v. To censure.

BLAMELESS : (1) अनिन्द्यः (न्द्या, न्द्यं) ; (2) अनिन्दनीयः (या, यं) ; (3) निर्दोषः (षा, षं) (=faultless : q.v.) ; (4) निष्कलङ्कः (ङ्का, ङ्कं) (=spotless : q.v.) ; (5) विशुद्धः (द्धा, द्धं) (pure : q.v.).

BLAMELESSLY : v. Innocently, faultlessly.

BLAMELESSNESS : (1) अनिन्द्यता ; (2) निर्दोषता (=faultlessness) ; (3) विशुद्धता (=purity).

BLAMEWORTHY : (1) निन्दार्हः (र्हा, र्हं) ; (2) निन्दनीयः (या, यं) : v. Censurable.

BLAMER : निन्दकः : v. Censurer.

BLANCH (v.) ; I. To whiten : q.v. : धवलयति (nomi.). II. To peel : q.v. त्वचयति (nomi.).

BLAND : मृदु (द्वी, दु) : Mild, gentle.

BLANDISHMENT : I. Of love : (1) हावः ; (2) विलासः ; (3) विभ्रमः. N.B. Applied only to women. II. Sweet words : (1) प्रियवाक्यम् ; (2) मधुरभाषितम्.

BLANK (adj.) : I. Not filled or written on : शुद्धः (द्धा, द्धं) (?). II. White pale or dismayed : q.v. : Ph. *b. verse* : अमित्राक्षरछन्दः ; *b. cartridge* *केवलचूर्णकोषः ; *b. endorsement* लेखकनामविरहितं हुण्ड्यादौ पृष्ठलिखनम्.

BLANK (subs.) : I. A void space : Ph. *don't leave so much b.* एतावदलिखितं or शुद्धं (?) मा रक्षीः. II. A b. ticket *शुद्धनिदर्शनी. III. A b. ballot *शुद्धगुटिका.

BLANKET : (1) कम्बलः ; (2) रल्लकः ; (3) ऊर्णायुः.

BLASPHEME : निन्दति (निन्द्, c. 1.) : v. To revile.

BLASPHEMER : (1) ईश्वरनिन्दकः ; (2) पाषण्डः (=heretic).

BLASPHEMOUS : (1) ईश्वरनिन्दकः (का, कं) ; (2) comp. with पाषण्ड-.

BLASPHEMOUSLY : (1) अभक्त्या (=irreligiously) ; (2) अवज्ञया (=contemptuously).

BLASPHEMY : (1) ईश्वरनिन्दा ; (2) पाषण्डता (=heresy).

BLAST (subs.) : I. A gust of wind : (1) वात्या ; (2) जवानिलः : v. Gale. II. The blowing of a wind instrument : v. Blowing. III. A blight : q.v.

BLAST (v.t.) : I. To blight : q.v. II. To destroy, frustrate : q.v. उन्मूलयति (मूल्, c. 10.). III. To rend open by explosion ; विदारयति (c. of दृ) (?).

BLAZE (subs.) : I. Lit. : (1) प्रभा ; (2) अर्चिस (m.) : v. Flame, light. II. Fig. : Ph. : "*b. of fame*" यशःप्रभा.

BLAZE (v.i.) : (1) (ज्वलति, प्र-, सम्प्र-, (ज्वल्, c. 1.), *b. ing powers* ज्वलत्प्रतापावलिः ; N. i. 2. ; (2) दीप्यते, प्र-, सं-, (दीप्, c. 4.) *the Raghu-chief b. ed with rage* क्रुद्धोऽदीपि रघुव्याघ्रः, B. vi. 32. : v. To kindle.

BLAZON (v.t.) : I. To display : q.v. : प्रथयति (c. of प्रथ्). III. To deck, embellish : q.v. : मण्डयति III. To explain coat of arms व्याख्याति (ख्या, c. 2.).

BLAZON, BLAZONRY (subs.) : I. A coat of

arms : q.v. II. Publication, display : q.v. : आडम्बरः (?).

BLEACH : I. To whiten : q.v. : धवलयति (nomi.) II. To make pale : विवर्णयति (nomi.).

BLEACHING-POWDER : *विरञ्जकचूर्णम्.

BLEAK (adj.) : I. Bold, frigid : q.v. : अतिशीतः (तां, तं). II. Exposed to cold : expr. by circum. : *these wastes are so b.* *एषु खिलप्रदेशेषु हिमस्यैकक् प्रादुर्भावः.

BLEAK (subs.) : नादेयः शुक्लवर्णः क्षुद्रमत्स्यभेदः.

BLEAKNESS : I. Exposure to the wind : by circum. : v. Bleak (II). II. Coldness : q.v. : शीतता.

BLEAREDNESS : (1) क्लिन्नाक्षता ; (2) चुल्लता.

BLEAR-EYED : (1) क्लिन्नाक्षः (क्षी, क्षं) ; (2) चुल्लः *or* चिल्लः (ल्ला, ल्लं) ; (3) पिल्लः, (ल्ला, ल्लं).

BLEAT (v.i.) : रेभते (रेभ्, c. 1) : v. To make noise.

BLEAT, BLEATING (subs.) : (1) रावः *or* रेभणम् : v. Noise. (2) मेषरुतम् (the cry of a sheep).

BLEED (v.t.) : रक्तं *or* रुधिरं *or* शोणितं स्रावयति, वि-, आ-, परि-, (c. of स्रु) ; *or* मोक्षयति (मुक्ष्, c. 10) ; *or* मोचयति (c. of मुच्) *or* अवसेचयति (c. of सिच्). N.B. These verbs are cons. with gen. of the person who is bled.

BLEED (v.i.) : रक्तं *or* रुधिरं *or* शोणितं स्रवति (स्रु, c. 1) ; *or* च्यवते (च्यु, c. 1), Ki. ; *or* क्षरति (क्षर्, c. 1). M. n. ; *or* गच्छति (गम्, c. 1) (rare), *when it stops itself after sufficient b. ing* सम्यग् गत्वा यदा रक्तं स्वयमेवावतिष्ठते, Śr. ; *or* प्रवर्तते (वृत्, c. 1) (rare), *if it does not b.* अप्रवर्तमाने रक्ते. N.B. These verbs are cons. with gen. of the person and abl. of the part which b. s : *his hand b. s* तस्य हस्तात् शोणितं स्रवति.

BLEEDING (subs.) : I. Letting of blood ; (1) रक्तस्रावः, -वं ; (2) रक्तमोक्षणम् ; (3) रक्तावसेचनम्, etc. II. Flowing of blood : (1) रक्तस्रुतिः ; (2) रक्तच्युतिः ; (3) रक्तक्षरणम् etc.

BLEMISH (v.t.) : (1) मलिनयति (nomi.) ; (2) दूषयति (c. of दुष्) : v. To stain.

BLEMISH (subs.) : दोषः : v. Stain, defect, fault.

BLEND, BLENDING : v. To mingle, mingling.

BLESS (v.t.) : I. To pronounce a blessing on : (1) often by sim. आशीर्लिङ् *or* लोट् when any particular blessing is specified, *I b. you that you may have a son like yourself,* पुत्रं लभस्वात्मगुणानुरूपम्, R. v. 34. ; (2) आशिषं ददाति (दा, c. 3) *or* प्रयुनक्ति (युज्, c. 7) (with dat.), R. v. 35. (3) आशास्ते (शास्, c. 2), *I b. you by the Rig Veda* ऋक्छन्दसाशासे, Sa. iv. ; (4) आशंसते (शंस्, c. 1) (rare), M. n. : Ph. *God b. you* ईशस्ते कल्याणं *or* शुभं वितरतु. II. To glorify or praise : q. v. : Ph. *b. the Lord, b. his holy name* *ईशो गीयतां, तस्य पवित्रं नाम गीयताम्. III. To consecrate : q.v. IV. To favour, endow liberally : q.v.

BLESSED : I. Happy, highly favoured : (1) धन्यः (न्या, न्यं), Si. xiv. 87. ; (2) महाभाग्यवत् (f. ती), Vi. II. Enjoying heavenly felicity : लब्धमोक्षः (क्षा, क्षं) ; (3) सिद्धः (द्धा, द्धं). Ph. *b. foot* श्रीचरणकमलम् ; *b. shore* श्रीमत्कूलम्.

BLESSEDNESS : v. Happiness, felicity. "*In single b.* अनुद्वाहसुखेन (?)

BLESSING : I. A benediction : (1) आशिस् (f.) ; (2) आशीर्वादः ; (3) आशीर्वचनम्. II. A gift, benefit, or advantage : q.v.

BLIGHT (v.t.) : (1) उत्सादयति (c. of सद्) (=to destroy) ; (2) वृद्धिं स्तभ्नाति (स्तम्भ्. c. 9) (=stop the growth) (with gen.).

BLIGHT (subs.) : (1) उपद्रवः (?) ; (2) व्याघातः (?); (3) क्षयः (=decay).

BLIND (adj.) : अन्धः, (न्धा, न्धं), *born b.* जन्मान्धः (न्धा, न्धं) *or* जात्यन्धः (न्धा, न्धं) (rare) M. ; (2) अन्धदृश् (mfn.) and sim. comp.s., *naturally b. to their own improprieties* सहजान्धदृशः स्वदुर्नये, Si. xvi. 29. Ph *b. of one eye* काणः (णा, णं) ; *b. at night* रात्र्यन्धः (न्धा, न्धं) ; *a b. well* अन्धकूपः, Va. ; *love is b.* *प्रेम भद्रं न पश्यति *or* गणयति.

BLIND (v.) : अन्धयति (nomi.) *or* अन्धीकरोति (कृ, c. 8), *b. ed by sensual pleasures* विषयान्धीकृतेक्षणः, Ka. Ph. *b. ed by passion* कामान्धः (न्धा, न्धं) *b. ed by rage* क्रोधान्धः (न्धा, न्धं).

BLIND (subs.) : तिरस्करिणी : v. Screen.

BLINDFOLD (v.t.) : नेत्रे *or* लोचने *or* दृशौ बध्नाति (बन्ध्, c. 9) *or* अभिनह्यति (नह्, c. 4).

BLINDFOLDED (adj.) : (1) बद्धचक्षुस् (mfn.), S.c.; (2) अभिनद्धाक्ष: (f. क्षी). Up. Fig. *"fate's b. reign"* *दैवस्य तिमिरावृतमाधिपत्यम् : v. Also blindly.

BLINDLY : (1) अन्धवत् ; (2) असमीक्ष्य (=inconsiderately) ; (3) सहसा (=suddenly).

BLINDMAN'S BUFF : नेत्रबन्ध:,—क्रीडा, B. p.

BLINDNESS : I. Lit. (1) अन्धता ; (2) अन्धत्वम् II. Fig. ; मोह:.

BILNK : v. To wink, twinkle.

BLISS : परमसुखम् v. Happiness, felicity, beatitude.

BLISSFUL : आनन्दमय: (यी, यं) : v. Happy, blessed.

BLISTER (subs.) : I. A watery tumour : जलपूर्ण व्रणम् (?). *A b. on the foot* : विपादिका. II. A plaster for raising b. s : *दाहालेप:, जलपूर्णव्रणोत्पादकालेप:.

BLISTER (v.t.) : I. To apply a blister : *दाहालेपं प्रयुनक्ति (युज्, c. 7.). II. To raise blisters: जलपूर्णानि व्रणानि उत्थापयति (c. of स्था) (?). III. Fig. v. To burn.

BLISTER (v.i.) : Ph, *"let my tongue b."* *मम जिह्वायां जलपूर्णानि व्रणानि भवन्तु.

BLITHE, BLITHESOME : v. Cheerful, gay, merry.

BLITHELY : (1) सहर्षम्; (2) सोल्लासम्: v. Cheerfully, merrily.

BLITHENESS : (1) स्फूर्ति: ; (2) उल्लास: : v. Cheerfulness, sprightliness.

BLOAT : v. To swell.

BLOATED (adj.) : (1) स्फीत: (ता, तं) ; (2) शून: (ना, नं) ; (3) स्फात: (ता, तं).

BLOCK (subs.) : I. Of wood : काष्ठम्. II. Of stone : शिला. III. For beheading criminals : वध्यकाष्ठम् (after वध्यशिला, of Na.). Ph. *whose heads were brought to the b.* येषां शिरांसि वध्यकाष्ठं स्पर्शितानि *or* sim. छिन्नानि. IV. Any mass : पिण्ड (mn.). V. A row : q.v. : श्रेणी. VI. Any obstruction or hindrance : q.v. VII. A blockhead : q.v.

BLOCK UP : (1) रुणद्धि, अव-, नि-, सं-, उप-, प्रति-, (रुध्, c. 7.) *b. ing up the path* मार्गमवरुध्य Mah.; (2) आवृणोति (वृ, c. 5.), *b. ing up the road* आवृत्य पन्थानम्, R. vii. 31. (3) आच्छादयति (c. of छद्) (rare), *b. ing up the way of the chariot* आच्छाद्य रथपन्थानम्, Mah.

BLOCKADE (subs.) : (1) रोध: ; (2) अवरोध: ; (3) उपरोध: ; (4) संरोध:.

BLOCKADE (v.t.) : (1) रुणद्धि, अव-, उप-, (रुध्, c. 7.) ; (2) परिवेष्टते (वेष्ट्, c. 1.) (=to surround: q v.) (to be used only when the context determines the meaning).

BLOCKADER : अवरोद्धा : v. Besieger.

BLOCKHEAD : (1) स्थूलबुद्धि: ; (2) बर्बर: : v. Fool.

BLOOD : I. Lit. : (1) रक्तम् ; (2) रुधिरम् ; (3) शोणितम् ; (4) असृज् (n.) ; (5) अस्रम् ; (6) क्षतजम् (rare), *the cascade of fresh b* ; प्रत्यग्रक्षतजक्षरी, Vi. vii. (7) कीलालम् (rare), *quenched by b. flowing* सरत्कीलालनिर्वापित, Vi. iii. Ph. : *to lose b.* रक्तं मुञ्चति (मुच्, c. 6.) ; *to take one's b.* हन्ति (हन्, c. 2.) v. To murder. II. Kindred, lineage : q.v. : Ph. *related by b.* सनाभि (mfn.); *of whole b.* सोदर: (रा, रं); *half-b.* q.v. III. Bloodshed: q.v. IV. Temper of mind, passion : Ph. *their b. was up for revenge* *प्रतीकारार्थं तेषां क्रोधाग्निरुद्दिदीपे ; *do not rouse my b.* मा मां प्रकोपय ; *murdered the child in cold b.* *शान्तो बालं जघान.

BLOOD (v.t.) : I. To bleed : q.v. II. To stain with blood : रुधिरेण लिम्पति (v. To. annoint) *or* कलुषयति (v. To stain) : Ph. *b. ed scimitars* खड्गा: शोणितसन्दिग्धा:, Ku.

BLOOD-HOUND : कुक्कुरभेद: : v. Hound.

BLOODINESS : जिघांसा : v. Cruelty.

BLOODLESS : I. Without blood : (1) रक्तहीन: (ना, नं) (?) ; (2) गतासु (mfn.) (=dead). II. Without shedding of blood : रक्तपातं विना Ph. *by which the discharger obtains a b. victory* यत: प्रयोक्तुर्न चारिहिंसा विजयश्च हस्ते, R. v. 53.

BLOOD-LET : (v.) : v. To bleed.

BLOOD-RED : रक्त: (क्ता, क्तं) : v. Red.

BLOOD-SHED : रक्तपात: : v. Slaughter.

BLOOD-SHOT : (1) अतिरक्त: (क्ता, क्तं) (=very red) ; (2) रक्ताभिष्यन्दिन् (f. नी) (?).

Blood-stained : (1) रक्ताक्तः (क्ता, क्तं) ; (2) रुधिरसंलिप्तः (प्ता, प्तं) ; (3) शोणितसन्दिग्धः (ग्धा, ग्धं) ; (4) असृग्दिग्धः (ग्धा, ग्धं), R. ; and sim. comp.

Blood-sucker : (1) रक्तपायिन् (f. नी) ; (2) असृक्पः (पा, पं).

Blood-thirsty : (1) रुधिरप्रियः (या, यं) ; (2) जिघांसु (mfn.) : v. Sanguinary, murderous.

Blood-vessel रक्तवाहिनी *or* असृग्वहा नाडी.

Bloody : I. Blood-stained : q.v. II. Sanguinary, murderous : q.v. III. Attended with blood-shed : Ph. *it was a b. battle* अस्मिन् युद्धे बहु रक्तं पपात (?) ; *that day was most b. for the Romans* *तस्मिन् दिवसे रूमीयाणां बंहिष्ठं रक्तं पपात.

Bloom (subs.) : I. Blossom : q.v. II. Fig., *the b. of youth* नवयौवनम् ; *the b. (of a maiden's) cheek* कपोलरागः.

Bloom (v.i.) : v. To blossom.

Blooming, blossoming (adj.) : (1) प्रफुल्लः (ल्ला, ल्लं), *b. face* प्रफुल्लवदनम् ; (2) विकसत् (f. न्ती) ; (3) स्फुटत् (f. न्ती) ; (4) कुसुमितः (ता, तं) ; (5) पुष्पितः (ता, तं).

Blossom (v.i.) : (1) स्फुटति (स्फुट्, c. 6) ; (2) फुल्लति (फुल्ल्, c. 1) ; (3) विकसति (कस्, c. 1) ; (4) पुष्पति (पुष्प्, c. 4) (rare) : v. To flower.

Blossom (subs.) : (1) पुष्पम् (=flower : q.v.); (2) मुकुल (mn.) (=an opening bud.) ; (3) प्रसवः (rare), *mango b. s* चूतप्रसवः, Ku. ; (4) प्रवालः (?).

Blot (subs.) : कलङ्कः : v. Spot. stain, tarnish.

Blot out : v. To erase, efface, obliterate.

Blotch : (1) किलासम् (?) ; (2) कच्छपिका (?).

Blotting-paper : *मसीशोषकं कागजम्.

Blow (subs.) : I. With the fist : (1) मुष्टिप्रहारः, *gives a b. on the nose* घोणायां मुष्टिप्रहारं ददाति, Mr. ii. (2) मुष्टिघातः ; (3) मुष्टाहतिः, Ki. *To strike a b.* : मुष्टिना हन्ति (हन्, c. 2.) *or* ताडयति (तड्, c. 10.). II. B. in general : प्रहारः : v. Stroke. III. Fig. Infliction of evil : Ph. "*gave a death-b. to the constitution* *शासनप्रणाल्या विनाशं कल्पयामास ; "*fortune's b. s*" दैवनिर्घातः, U.

Blow (v.i.) : I. To blossom : q.v. : स्फुटति, प्र-, (स्फुट्, c. 6.). II. As air : (1) वाति, प्र-, (वा, c. 2.) ; (2) वहति, प्र-, (वह्, c. 1.), Ku. xvii. 26. III. To breathe hard or quick : v. To breathe, to part. IV. To sound as a wind instrument : Ph. *horns blew* पूर्णाः पेटारवः सस्वनुः : B. : v. To sound.

Blow (v.t.) : I. To b. the fire : धमति, समा-, प्र-, उप-, (ध्मा, c. 1.) M. iv. 53. II. To drive, to impel : q.v. : Ph. *the tempest blew the ship ashore* *वात्या पोतं विचिक्षेप (क्षिप्, c. 6.) तटे ; *dust b. n by the wind* अनिलोद्धतं (धू, c. 9.) *or* अनिलोत्थापितं (c. of स्था) रजः. III. To sound a wind instrument : (1) धमति, समा-, *blew the shell* जलजं दध्मौ R. ; (2) पूरयति *or* मुखमारुतेन पूरयति (पूर्, c. 10.), *blew horns* काहलाः पूरयाञ्चक्रुः, B. xiv. 3. IV. To spread, publish : q.v. : Ph. : *to b. the nose* नासिकां धमति ; *one who does so* नासिकन्धमः. *To b. hot and cold* : अनुग्रहनिग्रहौ प्रकटयति (nomi.).

Blow away : वि-धूनोति *or* धूनयति *or* धूनाति (धू, c. 5., 10. & 9.) : v. To drive away.

Blow into : फूत्करोति.

Blow out : निर्वापयति (c. of वा) : Ph. *if you allow me, I will b. the dust from your eye* यद्यनुमन्यसे तदहमेनां वदनमारुतेन विशदां करवाणि, Sa. iii.

Blow over : शाम्यति, प्र-, उप-, (शम्, c. 4) : v. To cease, pass away.

Blow up : I. To swell, inflate : q.v. II. By explosion : no equiv. : उद्धूनयति (धू, c. 10) may be used. III. To destroy : उन्मूलयति (मूल्, c. 10).

Blow upon : v. To destroy, to taint.

Blower : (1) धमकः ; (2) ध्माता.

Blowing (subs.) : I. Of a wind instrument : (1) ध्मातम् (rare) : (2) नादः : v. sound : II. Of a flower, etc. : (1) विकाशः ; (2) फुल्लिः. In other senses, v. To blow.

Blow-pipe : धमनी.

Blubber (subs.) : तिम्यादियादसां मेदस् (n.) : v. Fat.

Blubber (v.i.) : v. To weep.

Bludgeon : लगुडः : v. Club.

Blue (adj.) : (1) नीलः (ला, लं) ; (2) श्यामः (मा, मं) (=dark b.) ; असितः (ता, तं) (poet).

Blue (subs.) : (1) नीलः ; (2) नीलवर्णः. B. s. ; i.e. low spirits : v. Melancholy.

BLUE-BIRD : *नीलपक्षी.

BLUE-BOTTLE : लताभेदः ; मक्षिकाभेदश्च.

BLUE-EYED : नीलाक्षः (क्षी, क्षं).

BLUFF (adj.) : v. Uncouth, steep.

BLUISH : (1) आनीलः (ला, लं) ; (2) ईषन्नीलः (ला, लं).

BLUNDER (v.i.) : प्रमाद्यति (मद्, c. 4) : v. To err, mistake.

BLUNDER (subs.) : (1) प्रमादः ; (2) स्खलितम् ; (3) भ्रमः : v. Mistake.

BLUNDERBUSS : *आयतच्छिद्रविशिष्टः क्षुद्रबन्दुकविशेषः.

BLUNDERER : (1) प्रमादिन् (f. नी) ; (2) प्रमत्तः (त्ता, त्तं) ; (3) भ्रान्तचित्तः (त्ता, त्तं).

BLUNDERING (adj.) : (1) प्रमत्तः (त्ता, त्तं) ; (2) भ्रान्तः (न्ता, न्तं).

BLUNDERINGLY : (1) प्रमादेन (2) by the adj. *he talks b.* प्रमत्तः प्रलपति.

BLUNT (adj.) : I. Not sharp : (1) निस्तेजस् (mfn.) ; (2) कुण्ठः (ण्ठा, ण्ठं) ; (3) कुण्ठितः (ता, तं) ; (4) प्रखरः (रा, रं). *To become b.* : कुण्ठीभवति. II. Fig. Of understanding, etc. : (1) स्थूलः (ला, लं) (2) निस्तेजस् (mfn.). III. Plain but unceremonious : सरलः (ला, लं) *or* अजिह्मः (ह्मा, ह्मं), (किन्तु) अविनीतः (ता, तं) *or* अशिष्टः (ष्टा, ष्टं) : *by his b. remarks* *तस्य सरलाभिरविनीनाभिरुक्तिभिः ; *be frank not b.* सरलो भव नाविनीतः.

BLUNT (v.t.) : (1) कुण्ठीकरोति (कृ, c. 8) ; (2) निस्तेजयति (तिज्, c. 10) ; (3) तैक्ष्ण्यं *or* प्राखर्यं नाशयति (c. of नश्) *or* लुम्पति (लुप्, c. 6) (with gen.).

BLUNTLY : Frankly, rudely, plainly.

BLUNTNESS : Of manners : सहजाविनीतता (?) ; ग्राम्यता (?).

BLUR (subs.) : v. Smear, blot.

BLUR (v.) : v. To smear, stain.

BLUSH (v.i.) : (1) लज्जां नाटयति (नट्, c. 10), *Mālavikā b. s* मालविका लज्जां नाटयति, Mal. iii. (2) जिह्रेति (ह्री, c. 3) *putting the sun to b. in splendour* ह्रेपयन्नहिमतेजसं त्विषा, Ki xiii. 41. N.B. Redness of the face is not used to indicate b. ing.

BLUSH (subs.) : I. A rosy tint : रक्तिमन् (m.) II. A red colour suffusing the cheeks or face : expr. by (1) लज्जा, (2) व्रीडा *or* (3) ह्रीः (=shame) : *a b. came upon her face* तस्यानन-मालोहितं बभूव *or*, as gen. represented in Sanskrit व्रीडयाधोमुखी बभूव. III. Glance, view: q.v. Ph. *at the first b.* प्रथमदर्शने.

BLUSHING (adj.) : प्रफुल्लः (ल्ला, ल्लं) : v. Ruddy, also blushful.

BLUSHFUL : (1) लज्जावनम्रः (म्रा, म्रं) ; (2) ह्रीपरिगतः (ता, तं) ; (3) व्रीडावनतः (ता, तं).

BLUSTER (v.i.) : To be boisterous : व्याक्रोशति (क्रुश्, c. 1.). II To brag : q.v. III. To bully : q.v.

BLUSTER (subs.) : v. Noise, tumult, boasting.

BLUSTERER : v. Boaster, swaggerer.

BOA-CONSTRICTOR (a serpent) : (1) अजगरः ; (2) वाहसः ; (3) शयुः (rare).

BOAR : (1) वराहः ; (2) शूकरः ; (3) कोलः ; (4) पोत्री, A. ; (5) घृष्टिः, A.

BOARD (subs.) : I. A plank : फलक (mn.). II. A table for food : भोजनफलकः. III. Food, diet : q.v. : आहारः : Ph. *but b. and clothing should be given* ग्रासाच्छादनन्तु देयमेव, K. b. IV. For playing games : (1) अष्टापदम्, (2) शारिफलम्. V. A council : सभा. A member of it : सभ्यः *or* सभासद् (m.) Ph. *to get on b. a vessel* नावमारोहति (रुह्, c. 1.), Raj. ; *to leap over b.* v. Overboard.

BOARD (v.t.) : I. To cover with b. s : फलकैः आच्छादयति (c. of छद्.) *or* आवृणोति (वृ, c. 5.). II. To enter a ship by force : बलात् (नावं) आरोहति (रुह्, c. 1). III. To furnish with food : अर्थं गृहीत्वा) भोजयति (c. of भुज्).

BOARD (v.i.) : (अर्थं दत्वा) (परगृहे) अत्ति (अद्, c. 2.) *or* अभ्यवहरति (हृ, c. 1.) : *I b. here with my master* *अत्रोपाध्यायेन सह भोजनं करोमि.

BOARDER : expr. by the verb : v. Board (v.i.) and (v.t.) (III).

BOARDING-SCHOOL : यस्मिन् विद्यालये छात्रा वासं भोजनञ्चाधिगच्छन्ति.

BOAST (v.i.) : (1) कत्थते, वि-, (कत्थ्, c. 1.), *you b. for nothing* त्वं कत्थसे मृषा, A. r. : (2) दृप्यति (दृप्, c. 4.), *he does not b. himself* स नात्मना दृप्यति, U. vi. : (3) आत्मानं (one's self) *or*

आत्मचरितं *or* आत्मकर्म (one's acts) श्लाघते (श्लाघ्, c. 1), *why are you so b. ing of your acts* किमेवमात्मकर्म श्लाघसे, Ve. v.

BOAST (subs.) : v. Boasting.
NONENTITY : (1) असत्, *there is nothing out of n.* : नासतो विद्यते भावः, G. ; (2) अभावः, G.

NONES : in Roman calendar : *नवमः.

NON-ESSENTIAL : अनावश्यकः (की, कं) (=needless).

NONEXISTENCE : नास्तित्वम् : v. Existence.

NONJUROR : नवराज्यविद्वेषिन् (f. णी).

NONPAREIL : (1) अप्रतिमः (मा, मं) ; (2) अनुपमः (मा, मं).

NON-PAYMENT : expr. by verb., *to pay* and *not*.

NONPLUS (v.) : मोहयति, वि-, (c. of मुह्) : v. To confound.

NON-RESIDENT : स्थानान्तरवासिन् (f. नी) and sim. comp.s.

NON-RESISTANCE : अप्रतिरोधः and sim. comp.s.

NONSENSE : I. Subs. : expr. by adj., *talking n.* : असम्बद्धप्रलापिन् (f. नी), Sa. i. II. As exclam. : धिक् प्रहसनम्, U. iv.

NONSENSICAL : (1) निरर्थकः (का, कं) (without sense) ; (2) असम्बद्ध (f. द्धा) (=inconsistent, improper) ; (3) मृषार्थकः (का, कं).

NONSUIT (v.) : *to be n.ed* : अर्थात् हीयते (pass. of हा).

NOODLE : अल्पबुद्धि (mfn.) : v. Simpleton, blockhead.

NOOK : (1) कोणः (=corner : q.v.) ; (2) विविक्तम् (=secluded retreat).

NOON : (1) मध्याह्नः ; (2) मध्यन्दिनम् ; (3) दिनयौवनम् (poet.), R.

NOONDAY : माध्याह्निकः (की, कं) : v. Midday.

NOONTIDE : (1) मध्याह्नवेला ; (2) मध्याह्नकालः ; etc.

NOOSE (subs.) : पाशः, *to cut (i. e. remove) n.s.* : पाशान् छिनत्ति, H. : v. Halter, snare.

NOOSE (v.t.) : पाशे पातयति (c. of पत्) : v. To ensnare.

NOR : न···न च : v. Neither, not.

NORMAL : युक्तः (क्ता, क्तं) (?) : v. Regular. *N. school* : *शिक्षकशिक्षानिवेशः.

NORTH (subs.) : (1) उत्तरा दिश् (f.) ; उत्तराशा (f.) ; etc., *on the n.* : उत्तरस्यां दिशि, K. ; *to the n.* : उत्तरतः, V. m. ; *to the n. of Kuvera's dwelling* : धनपतिगृहादुत्तरेण, Me. ii. 14. ; (2) उदिची, *facing the n.* : उदङ्मुख (f. खी), V. m. ; (3) कौवेरी दिश्, etc., *from the n.* : कौवेर्याः ककुभः, Vi. ; (4) (poet.) कुबेरगुप्ता-, Ku. ; धनदपालिता-, Mah. ; सप्तर्षिताराशबला-, K., दिश्.

NORTH (adj.) : उत्तरः (रा, रं), *the n. Kurus* : उत्तरान् कुरून्, Ki. ; *what is n. of the ocean* : उत्तरं यत् समुद्रस्य, V. p. ; *n. wind* : उत्तरो वायुः, V. m. ; (rarely) उदीचीनः (ना, नं) *or* उदीच्य (f. च्या) *or* कौवेरः (री, रं), *the n. quarter* : कौवेरदिग्भागः, Si. *N. star.* : ध्रुवः.

NORTH-EAST : I. Adj. : (1) पूर्वोत्तरः (रा, रं), *the n. wind* : पूर्वोत्तरो वायुः, Mah. ; *to the n. of Kailāsa* : प्रागुत्तरेण कैलासात्, Mat. ; (2) उत्तरपूर्वः (र्वा, र्वं) ; (3) प्रागुदीच्य (f. च्या) *or* -चीनः (ना, नं). II. Subs. : (1) पूर्वोत्तरा *or* उत्तरपूर्वा *or* ऐशानी दिश् (f.), *towards the n.* : ऐशानीं दिशं प्रति, V. ; (2) पूर्वोत्तरो दिग्भागः, *to the n. of the mount Kailāsa* : कैलासशिखरिणः पूर्वोत्तरे दिग्भागे, R. ; (3) प्रागुदीची.

NORTH-EASTERLY, NORTH-EASTERN : v. North-east (I.)

NORTHERLY (adv.) : I. Northwards : q.v. : II. From the north : उत्तरतः.

NORTHERLY, NORTHERN (adj.) : उत्तरः (रा, रं) v. North. *N. lights* : *उत्तरप्रकाशः : v. Aurora borealis. *N.-most* : सर्वोत्तरः (रा, रं).

NORTHWARDS : उत्तराभिमुखम् ; उत्तरां दिशं प्रति and sim. comp.s.

NORTH-WEST (subs.) : पश्चिमोत्तरा *or* उत्तरपश्चिमा *or* वायवी दिक्, आशा, etc.

NORTH-WEST, NORTH-WESTERLY, NORTH-WESTERN : (1) पश्चिमोत्तरः (रा, रं) ; (2) वायव्य (f. व्या) (rare) (of the n. wind), V. m.

NOSE (subs.) : (1) नासा *or* नासिका, *through the n.* : नासिकया, N. ; *tip of the n.* : नासाग्रम्, J. ; *diseases of the n.* : नासारोगाः, Sr. ; *running of the n.* : नासापरिस्रावः, Sr. ; *n.-string* : (for cattle) : नास्यम् ; (2) नासिक्यम् (rare) ; (3) घ्राणम् (poet.), *with a long elevated bridge of the n.* : आयतोत्तुङ्गघ्राणवंश (f. शा), K. *To lead by the n.* : यथेच्छं वाहयति (?). *To thrust one's n. into* : अन्यायचर्चां करोति (?).

NOSE (v.) : I. To scent : q.v. II. To affront, abuse : q.v.

NOSEGAY : (1) कुसुमस्तवकः ; (2) पुष्पगुच्छः ; (3) प्रसूनप्रकारः (rare).

NOSOLOGY : रोगविज्ञानम्, Sr.

NOSTRIL : (1) नासारन्ध्रम् ; (2) नासाकुहरम् ; (3) नासाविवरम्.

NOSTRUM : मिथ्यौषधम् ; गुप्तौषधम् (?), etc.

NOT : (1) न, *there the sun does n. shine, the*

moon does n. gleam : न तत्र सूर्यस्तपति न विराजति चन्द्रमाः, Mat. ; (*it is*) *lightning n. my darling Urvaśī*...विद्युत्, प्रिया मम नोर्वशी, V. ; *there was n. a (single) prince of high birth who did n. go* : नासीदगन्ता कुलजः कुमारः, N. x. 2. ; *n. that he was n. beautiful nor that she did n. know to see well* : नासौ न काम्यो न च वेद सम्यग् द्रष्टुं न सा, R. vi. 30. ; *n. so much...as* : न तथा...यथा, Ki. xiii. 32. ; *n. only with (their) hearts* : न केवलं हृदयेन, N. xi. 2. ; *n. even death can strike on me* : प्रभुः प्रहर्तुं मयि नान्तकोऽपि, R. ii. 62. ; *for......n.* : नहि : v. For ; (2) मा (prohibitive), *do n. boast of wealth, men or youth* : मा कुरु धनजनयौवनगर्वम्, J. ; *let n. your sense-horses carry you astray* : मा भूवन्नपथहरास्तवेन्द्रियाश्वाः, Ki. v. 50. ; (3) अ-, (अन्-, before vowels) *or* निर्-, in comp., *n. able* : अशक्त (f. क्ता) ; *n. kind* : निर्दयः (या, यं) ; *there is nothing mine which is n. yours* : अमवदीयं नैव किञ्चिन्मत्सम्बद्धम्, D.

NOTABLE : प्रसिद्ध (f. द्धा) : v. Remarkable, memorable.

NOTABLY : विशेषेण (=specially) : v. Also remarkably.

NOTARY : लेखकप्रमाणकः.

NOTATION : अङ्कप्रणाली (?). *Musical n.* : प्रस्तरः, Wilson.

NOTCH (subs.) : (1) छेदः (=cut) ; (2) कुन्दकः (?).

NOTCH (v.) : छिनत्ति (छिद्, c. 7.) (=to cut) (?). *N.ed extremity of a bow* : अटनी.

NOTE (subs.) : I. A mark : लिङ्गम्. II. A sign : संज्ञा. III. A memorandum : no equiv. : सारलेखः. IV. Explanatory : (1) टीका ; (2) व्याख्या. V. A short letter : पत्रिका. VI. Musical symbol : चिह्नम्,. VII. Musical tone : स्वरः. VIII. Reputation : *of n.* : विश्रुतः (ता, तं), : v. Renowned, famous. IX. Heed : *take n. of* : अवेक्षते. X. Of birds : रुतम्. XI. Commercial : पत्रम् (when the sense is clear). *Promissory n.* : *प्रतिज्ञापत्रम्.

NOTE (v.) : I. To observe, remark : q.v. : वर्णयति, निर्-, (वर्ण्, c. 10.). II. To record, write : q.v. : लिखति (लिख्, c. 6.). III. To charge. stigmatize : अभिशंसति (शंस्, c. 1.).

NOTE-BOOK : *सारलेखबन्धः ; स्मरणपत्रिका.

NOTED : i.e. celebrated : q.v. : प्रसिद्ध (f. द्धा).

NOTEWORTHY : expr. with परिग्रहीतव्य (f. व्या) ; अवेक्षणीयः (या, यं) ; etc.

NOTHING (subs.) : I. Non-entity : (1) अभावः ; (2) असत्, *there is n. out of n.* : नासतो विद्यते भावः, G. ; (3) शून्यम्, San. II. Not anything : (1) न किञ्चित्, *for there is n. which he cannot do from shame* : न हि किञ्चिन्न क्रियते ह्रिया, K. ; *beyond which there is n. else* : यस्मात्परं किञ्चिदन्यन्नास्ति, S. iii. 13. ; *it is n. to Rāvaṇa* : दशकन्धरमधिकृत्य न किञ्चिदेतत्, An. vi. ; *said n., only with the feet......*न किञ्चिदूचे चरणेन केवलं..., Ki. viii. 14. ; (2) न किञ्चन (rare), Mah. *For n.* : (a) without any cause : अकारणम् ; अकारणे ; अकाण्डे ; अवस्तुनि (rare), Ra. iv. ; (b) in vain : q.v. : वृथा. *N. but* : (=only : q.v.) : नान्यत् किञ्चित् (with abl.). *To make n. of* : न किञ्चित् मन्यते.

NOTHING (adv.) : किञ्चिदपि *or* मनागपि...न *or* अ- in comp.

NOTHINGNESS : (1) अभावता ; (2) शून्यत्वम्, San.

NOTICE (v.) : I. To observe, see : लक्षयति, आ-, सं, अभि-, समा- (लक्ष्, c. 10.), *did not n.* : नालक्षयत्, Ku. iii. 51. II. To remark upon : विवृणोति (वृ, c. 5.) (=to explain) : निर्दिशति (दिश्, c. 6.)

NOTICE (subs.) : I. Heed, observation : (a) *to take n. of* : v. Notice (v) (I) ; (b) *to attract n.* : मनो हरति *or* आकर्षति (कृष्, c. 1.) ; (c) *to escape n.*, expr. with लक्षयति and न ; (d) *worthy of n.*, expr. by circumlo. : v. Noteworthy. II. Information, intelligence : q.v. : विज्ञापनम्, *to give n.* : विज्ञापयति (c. of ज्ञा). III. Allusion, mention : उल्लेखः ; निर्देशः. IV. Notification : (1) विज्ञापनम् (?) ; (2) घोषणा (=proclamation). V. Attention : आदरः. VI. With a view to punishing : *I will take n. of your conduct* : perh. चेष्टितं ते स्मरिष्यामि : v. Also chastise.

NOTICEABLE : i.e. remarkable : q.v. : विशेष- in comp.

NOTIFICATION : (1) घोषणा (?) ; (2) विज्ञापनम्, -ना (=notice).

NOTIFY : expr. by subs : v. Also to announce, proclaim.

NOTION : I. Conception : भावः. II. Idea : q.v. : बुद्धिः. III. Opinion, belief : q.v. : विश्वासः.

NOTORIETY : (1) प्रसिद्धिः ; (2) दुर्नामन् (n.) (=bad name).

NOTORIOUS : (1) प्रसिद्ध (f. द्धा) (in good or bad sense) ; (2) प्रकाशः (शा, शं) (=open, manifest), *to get n.* : प्रकाशीभवति, Mu.

NOTORIOUSLY : (1) by adj. or comp. ; (2) प्रकाशम् (=publicly).

NOTORIOUSNESS : (1) प्रसिद्धता ; (2) प्रकाशता : v. Notoriety.

NOTWITHSTANDING : I. As conj. : तथापि. II. As prep. : by gen. or loc., *n. Bala* : पश्यतो बलस्य ; *her cries n.* : रुदत्यास्तस्याः *or* रुदत्यामपि तस्याम्; *n. my advice* : ममोपदेशमनादृत्य : v. Despite.

NOUGHT : v. Naught, nothing.

NOUN : प्रातिपदिकम्, Pāṇini.

NOURISH (v.) : (1) पोषयति *or* पुष्णाति, परि-, (पुष्, c. 10. and 9.), *he also attentively n.ed (the child), considering as if his brother had returned* : सोऽपि सोदरमागतमिव मन्यमानो विशेषेण पुपोष, D. ; *n.ed (developed) the lovely parts* : पुपोष लावण्यमयान् विशेषान्, Ku. i. 25. ; (2) वर्धयति, वि-, (c. of वृध्) : v. To bring up. : (3) पालयति, प्रति- (पाल्, c. 10.) : v. To protect.

NOURISHER : (1) पोषकः, परि- ; (2) पोषयितृ (m.) ; (3) पालयितृ (m.).

NOURISHING (adj.) : (1) पुष्टिकर (f. री) *or* कृत् (mfn.) ; (2) बृंहण (f. णी), *all meat is phlegm-removing and n., promoting strength and growth* : मांसं वातहरं सर्वं बृंहणं बलपुष्टिकृत्, Bha.

NOURISHMENT : I. The act : (1) पोषणम्, परि-, (2) पुष्टिः, परि-. II. Food : q.v. : perh. पोषणम् (as in the expr. भरणपोषणम्).

NOVEL (adj.) : अभिनवः (वा, वं) : v. New, strange.

NOVEL (subs.) : no eqiv. : आख्यायिका would do.

NOVELIST : nearest equiv. : आख्यायिकाकारः, "कथमाख्यायिकाकारा न ते वन्द्याः कवीश्वराः", C. 2.

NOVELTY : I. Newness : q.v. : अपूर्वता. II. Anything novel : (1) expr. by adj. ; (2) अपूर्ववस्तु (n.), etc.

NOVEMBER : उत्तराग्रहायणपूर्वकार्त्तिकसंवादीयुरपीयवर्षस्यैकादशो मासः.

NOVICE : expr. with : नवः (वा, वं) (=new) *or* अलब्धवैदग्ध्य (f. ग्ध्या) and sim. comp.s. (=untrained, unskilled.).

NOVITIATE : अन्तेवासित्वम्, after Vri.

NOW : I. At the present time : (1) इदानीम्, *just n.* : इदानीमेव ; *enmity of n.* : इदानीन्तनं वैरम्, A. r. ; (2) सम्प्रति *or* साम्प्रतम्, *but n. my only wish is* : साम्प्रतं पुनर्मम मनोरथ एष एव, Ma. ; (3) अधुना, *where are you going now* : काधुना गम्यते, Vi. ; (4) अद्य (=today), *even n.* : अद्यापि, U. i. II. As correl. ; now......now : (1) अन्तरा...अन्तरा (=at intervals), *conversing n. about his father, n. about his mother, n. about Shukanāsa* : अन्तरा पितृसत्कमन्तरा मातृसम्बद्धमन्तरा शुकनासमयं कुर्वन्नालापम्, K. ; (2) कदाचित्...कदाचित् (=at one time......at another time), K. ; (3) क्वचित्...क्वचित् (=2), *n. (in the region) of the clouds and n. of birds* : क्वचिद्घनानां पततां क्वचिच्च, R. III. As particle of transition : (1) अथ (or commonly) अथातः, *n. we will describe penances* : अथातो प्रायश्चित्तानि व्याख्यास्यामः, At. ; (2) अतः परम् *or* अत ऊर्ध्वम् (=after this), *n. I will tell you* : अतः परं...युष्माकं सम्प्रवक्ष्यामि, Pa. ; (3) इदानीम्, *it n. remains* : इदमिदानीमवशिष्टम्, S. iv. i. ; (4) सम्प्रति, S. iv. = but : q.v. : तु "*n. Barabbas was a robber*" : बरब्बास्तु दस्युरासीत्. Ph. : *n. and then* : (1) समये समये (=at times) ; (2) कदाचित् : v. Sometimes ; *n. and n.* : तदा तदा, D. iii.

NOW-A-DAYS : एषु दिवसेषु, V. *People n.* : इदानीन्तनाः (लोकाः), S.

NOWAY, NOWAYS, NOWISE : न कथञ्चन ; न केनापि प्रकारेण.

NOWHERE : न and क्वचित्, क्वापि, कुत्रचित्, *or* कुत्रापि, *n. else* : नान्यत्र कुत्रापि, N. iii. 67.

NOXIOUS : I. Of air, etc. : दुष्ट (f. ष्टा) : v. Injurious. II. Of animals : हिंस्र (f. स्रा).

NOXIOUSNESS : दुष्टता : v. Injuriousness.

NOZZLE : I. Lit. : नासाग्रम्. II. Of a vessel : कर्णः.

NUDE : नग्न (f. ग्ना) : v. Naked.

NUDGE (v.) : perh. स्पृशति (स्पृश्, c. 6.) (=to touch).

NUDITY : नग्नत्वम्, -ता : v. Nakedness.

NUGATORY : (1) निष्फलः (ला, लं) : v. Fruitless ; (2) निरर्थकः (का, कं) : v. Vain.

NUGGET : पिण्ड (mn.) : v. Mass.

NUISANCE : I. Of men, etc. : (1) उत्पातः ; (2) कण्टक (mn.) (=thorn), *clearing n.s* : कण्टकान् विशोधयन्, D. vii. II. In law : no equiv. : *सम्पीडनम्, *public n.* : *साधारणसम्पीडनम्.

NULL : (1) निष्फलः (ला, लं) ; (2) मोघः (घा, घं) ; (3) व्यर्थ (f. र्था) ; (4) निरर्थकः (का, कं) ; (5) विकलः (ला, लं).

NULLIFY : (1) निष्फलीकरोति, etc. ; (2) by adj.

NULLITY : I. The state : (1) निष्फलता ; (2) निरर्थकता, etc. II. Anything null : expr. by adj.

NUMB (adj.) : (1) निस्तेजस् (mfn.) ; (2) जडः (डा, डं) ; (3) स्तब्ध (f. ब्धा) ; (4) अवसन्नः (न्ना, न्नं) (?).

NUMB (v.) : जडीकरोति : v. Numb, to benumb.

NUMBER (subs.) : I. Lit. : (1) संख्या, *tell the total n. of the flock* : सकलां यूथस्य संख्यां वद, Li. ; *beyond n.* : अतीतसंख्यः (ख्या, ख्यं), Ki. ; *according to the n. of the sciences* : विद्यापरिसंख्यया, R. ; *prime n.* : *मूलसंख्या ; *theory of n.s* : *संख्यातत्त्वम् ; (2) राशिः (=quantity) *what n.* : को राशिः. II. A great n. : (1) expr. by बहु (f. ह्वी) (=many : q.v.) ; (2) सङ्घः (=crowd, multitude : q.v.), *in n. s* : सङ्घशः. III. Numerousness : (1) संख्या, *the strength of an army does not depend on its n.* : *बलानां बलं न संख्याधीनम् ; (2) बहुत्वम्. III. In gram. : वचनम्, *n. and person* : पुरुषवचने, S. k. ; *the singular n.* : एकवचनम् ; *the dual n.* : द्विवचनम् ; *the plural n.* : बहुवचनम्. IV. In pl., poetry, metre : q.v. : छन्दस् (n.). V. In. pl., *the book of n.s* : *संख्याध्यायः.

NUMBER (v.) : I. To count : q.v. : संख्याति, परि-, (ख्या, c. 2.), *by n.ing one, two, three* : एका द्वे तिस्र इति संख्यानेन, M. n. II. To give the n. of, perh. संख्याति ; संख्यां करोति, Mah. III. To reckon as one of a n. : (1) संख्याति ; (2) expr. by संख्या, *or to n. above men* : मनुष्यसंख्यामतिवर्तितुं वा, Ki. iii, 40. IV. To amount to : expr. by संख्या, *n.ing five thousand* : पञ्चसहस्रसंख्य (f. ख्या), -क (f. -का).

NUMBERLESS : असंख्य (f. ख्या) : v. Innumerable.

NUMBNESS : (1) जाड्यम् ; (2) स्तब्धता ; (3) स्तम्भः.

NUMERAL : (1) संख्या ; (2) अङ्कः (=figure).

NUMERATION : perh. संख्यानम्, परि- (after गुणनम्).

NUMERATOR : अंशः, *multiply the n.s with the denominators of other (fractions)* : तत्तदंशं परेषां छेदैर्गुणितं कुर्यात्, A. c.

NUMERICAL : expr. by comp., *n. strength* : *संख्याबलम्.

NUMERICALLY : (1) संख्यया, परि- ; (2) संख्यानेन, परि-.

NUMEROUS : बहुसंख्य (f. ख्या), -कः (का, कं) : v. Also many. Ph. : "*n. verse*" : छन्दोबद्धं पद्यम्.

NUMEROUSLY : *it was n. attended* : तत्र बहवः समागमन्.

NUMEROUSNESS : (1) बहुत्वम् ; (2) आधिक्यम् (when there is direct or implied comparison) : v. More.

NUMISMATICS : *मुद्राविज्ञानं and sim. comp.s.

NUMISMATIST, NUMISMATOLOGIST : *मुद्राविज्ञानविशारदः (दा, दं), -विद् (mfn.), etc.

NUN : ब्रह्मचारिणी (?). *Buddhist n.* : सौगतपरिव्राजिका, Ma.

NUNCIO : दूतः : v. Ambassador.

NUNNERY : विहारः (?) ; *ब्रह्मचारिणीविहारः.

NUPTIAL (adj.) : (1) by tat., *n. hall* : विवाहमण्डपः, N. ; (2) वैवाहिक (f. की), *with n. preparations* : वैवाहिकैः संविधानैः, Ku. ; (3) वैवाह (f. ही), *in proper n. hour* : युक्ते मुहूर्ते वैवाहे, Ram. ; (4) औद्वाहिक (f. की), *n. gift* : औद्वाहिकम्, M.

NUPTIAL (subs.) : gen. in pl. : उद्वाहः, -कर्मन् (n.) M : v. Marriage.

NURSE (subs.) : I. Lit. : धात्री, *wet-n.* : दोग्ध्री धात्री, Sr. ; *by Mālatī's n.'s daughter Lavangikā* : मालतीधात्रेय्या लवङ्गिकया, Ma. II. For sick

men : परिचारिका. III. Fig. : (1) पालयितृ (f. त्री); (2) सम्मावयितृ (f. त्री), *the n. of the wise* : सम्मावयिता बुद्धान्, D.

NURSE (v.t) : I. To nourish : q.v. : वर्धयति, वि- (c. of वृध्), *n.ed the plants* : वृक्षकान् व्यवर्धयत्, Ku. v. 14. II. To tend : उप-चरति, परि- (चर्, c. l.), *the wounded king was n.d by you yourself* : राजा शस्त्रपरिक्षतः त्वयोपचरितः स्वयम्, Ram. ii. 8. 14. III. To suckle : q.v. : दुग्धं पाययति (c. of पा), Sr. IV. To protect, cherish : q.v.

NURSERY : I. For children : लालनागारम् (?). II. For plants : *वर्धनस्थानम्. III. Fig. : (1) आश्रयः ; (2) कुलभवनम्, R.

NURSERY-MAN : *वर्धनस्थानपालः, लता-. N.B. पुष्पोपजीविन् (m.) may occasionlly do.

NURSING (subs.) : Of the sick : उपचारः or परिचारः : v. To nurse.

NURSLING : स्तनन्धयः : v. Infant, child.

NURTURE (subs.) : I. Nourishment : q.v. : पोषणम्. II. Instruction, education : q.v. : शिक्षा.

NURTURE (v.) : I. To nourish : q.v. : पोषयति (पुष्, c. 10.). II. To educate, bring up : q.v. : विनयति (नी, c. 1.).

NUT : no. equiv. : *अस्थिफलम्.

NUT-BROWN : perh. श्यावः (वा, वं) : v. Brown.

NUT-CRACKER : *अस्थिफलविदंशकः or -भञ्जकः.

NUTHATCH : पक्षिविशेषः.

NUT-HOOK : आकर्षणी (?).

NUTMEG : I. The plant : जातिः or जाती. II. The fruit : (1) जातीफलम् ; (2) जातिकोषम् (शम्).

NUTRIMENT : पौष्टिकम् : v. Nourishment, food.

NUTRITION : पुष्टिः : v. Nourishment.

NUTRITIOUS, NUTRITIVE : पुष्टिकरः (री, रं) : v. Nourishing.

NUTRITIOUSNESS : (1) पुष्टिकरत्वम् ; (2) पौष्टिकता ; (3) बृंहणत्वम्.

NUTSHELL perh. : कञ्चुकः or बहिरस्थि (n.). Ph. : *to lie in a n.* : perh. द्रागक्षरसाध्य (f. ध्या).

NUTTING : *अस्थिफलाहरणम्, etc. : v. To gather.

NUX VOMICA PLANT : बरम्बरा, Wilson.

NYLGAU, NYLGHAU : नीलः, "नीलांश्चैव महानीलान्", Mat.

NYMPH : I. Lit. : (1) अप्सरस् (f. : gen. in pl.) ; (2) विद्याधरी ; (3) सुरसुन्दरी. *Wood-n.* : वनदेवता, U. ; *water-n.* : जलदेवता. II. Fig. : सुन्दरी ; विलासिनी.

O

O, OH : I. In addressing : (1) हे ; (2) भो भोः, or भो भो (gen. to men), *o, courtiers* : भो भो कुलचारिणः, Vi. ; (3) अयि or अये (expr. of tenderness), *o, you unbearing* : अयि असहने, Ra. ; (4) रे or अरे (to inferiors or in contempt), *o, you fool* : अरे मूर्ख, Mr. ; (5) हा (in sorrow), *o, my father, o, my mothers, o, my dear friend Sugriva* : हा तात, हा मातरः, हा प्रियसख सुग्रीव, U ; (6) by voc. II. Of joy and surprise : (1) अहो, *oh, how grand and beautiful is earth* : अहो उदाररमणीया पृथिवी, Sa. ; (2) अयि or अये, *oh, you also don't know* : अयि त्वमपि न वेत्सि, Mah. III. Of surprise, anger, contempt : आः, *oh, I understand, very well* : आः ज्ञातं, तिष्ठ, Mu. IV. Of grief : हा : v. Alas.

OAK : a tree : सिन्दूरः, Williams.

OAKEN : (1) सिन्दूर- in comp. (?) ; (2) सिन्दूरकाष्ठमयः (यी, यं) (?).

OAKUM : perh. तलपत्रम् (comp. Bengali कालापाति).

OAR : (1) दण्डः (when the sense is clear) ; (2) क्षेपणिः, -णी.

OAR (v.) : v. To row. *O.ed* : by comp., *four-o.* : चतुर्दण्ड (f. ण्डा).

OAT, OATS : धान्यभेदः, *ओटः (use also for the seed).

OATEN : (1) by comp. ; (2) *औटः (टी, टं) ; (3) *ओटमयः (यी, यं).

OATH : (1) शपथः, *to take an o.* : शपथं करोति, D. ; *to bind with an o.* : शपथेन नियच्छति, N. s. ; *to administer an o.* : शपथं शापयति, Mit. ; *he swore thousand of o.s* : सहस्रशोऽसौ शपथानशप्यत्, B. iii. 32. ; (2) दिव्यम्. (=special oath ; ordeal : q.v.).

OATH-BREAKING (subs.) : शपथभङ्गः : v. Perjury.

OAT-MEAL : *ओटचूर्णम् or ओटक्षोदः.

OBDURACY : काठिन्यम् : v. Hardness.

OBDURATE : कठिनः (ना, नं) : v. Hard, obstinate.

OBDURATELY : कठिनम् : v. Hardly, obstinately.

OBEDIENCE : आज्ञानुवृत्तिः and sim. comp.s. ; (2) वश्यता.

OBEDIENT : (1) आज्ञाकरः (री, रं) and sim. comp.s., *your o. servant is exceedingly obliged* : सोऽयमार्येणाज्ञाकरो जनोऽत्यर्थमनुगृहीतः, D. vi. ; (2) आज्ञानुवर्तिन् (f. नी) and sim. comp.s. ; (3) वश्य (f. श्या) *or* वशग (f. गा), etc. (=submissive).

OBEDIENTLY : आज्ञायां तिष्ठत् (f. न्ती) : v. To obey.

OBEISANCE : (1) नमस्कारः ; (2) प्रणामः ; (3) प्रणतिः.

OBELISK : perh. स्तूपः ; *सूचिस्तूपः.

OBELIZE : *सूचिरेखया चिह्नयति (चिह्न , c. 10.).

OBELUS : *सूचिरेखा.

OBESE : मेदस्विन् (f. नी) : v. Fat.

OBESITY : मेदस्विता : v. Fatness, corpulence.

OBEY : *to o. one or one's order* : आज्ञाम्, निर्देशम्, etc. पालयति, अनु-, प्रति- (पाल् , c. 10.), *or* करोति (कृ, c. 8.), *or* अनुवर्तते (वृत्, c. 1.), *or* अनुविधत्ते (धा, c. 3.), *or* वचनं शृणोति (श्रु, c. 5.), *or* आज्ञायां etc. तिष्ठति (स्था, c. 1.) ; *to o. laws etc.* : अनुवर्तते : v. To follow : v. Also to disobey.

OBFUSCATE : विह्वलीकरोति : v. To bewilder.

OBFUSCATION : I. Lit. : v. To darken. II. Bewilderment : q.v. : वैक्लव्यम्.

OBITUARY : *मृत्युनिर्देशः ; मरणोल्लेखः.

OBJECT (subs.) : I. As opposed to subject : विषयः, *of the o. and the subject* : विषयविषयिणोः, S. II. An external thing : (1) द्रव्यम्, *an o. does not destroy its cause or effect* : न द्रव्यं कार्यं कारणञ्च वधति, V. d. ; (2) वस्तु (n.), *for external o.s* : बाह्यवस्तुषु, Ku. Ph. : *an o. of sense* : इन्द्रियार्थः, V. d. ; *an o. of hearing* : श्रोत्रग्रहणोऽर्थः, V. d. III. An o. of emotion or effort : (1) पात्रम्, *I was the o. of (their) looks* : अहमभूवं पात्रमालोकितानाम्, Ma. ; *(proper) and improper o.* : पात्रमपात्रं वा, Mal. ; (2) भाजनम्, *o. of love* : प्रणयभाजनम् ; (3) स्थानम् and sim. words (=place), *excellencies are o.s of adoration* : गुणाः पूजास्थानम्, U. iv. 11. ; *o. of trust* : विश्वासभूमिः, H. ; (4) with *become*, by circumlo., *becomes an o. of hatred among the people* : द्वेष्यतां याति लोके, P. : v. To become. IV. Aim, intention : (1) प्रयोजनम् : *without some o.* : निष्प्रयोजनम्, Mu. ; (2) अर्थः, *this o. is to be accomplished with another o.* : अर्थोऽयमर्थान्तरमाव्य एव, Ku. ; *and with this o.* : एतदर्थञ्च, Vi. ; (3) अभिप्रायः (=intention), *but I, understanding his o.* : अहन्तु विदिताभिप्राया, K. V. In gram. : कर्मन् (n.), *without distinguishing o. and subject* : अविशिष्टकर्तृकर्मभावम्, An. ; *taking two o. s* : द्विकर्मकः, S. k.

OBJECT (v.) : I. In gen. : expr. by verbs अभिधत्ते (धा, c. 3.), etc. (=to say) *or* मन्यते (मन्, c. 4.), etc. (=to think) and adj.s भ्रान्त (f. न्ता), असङ्गत (f. ता), अप्रामाणिक (f. की), etc. II. To expose : विवृणोति (वृ, c. 5.).

OBJECTION : (1) प्रतिवादः (?) ; (2) आपत्तिः (used in Bengali) ; (3) बाधा (=obstruction, obstacle) ; (4) by verb.

OBJECTIONABLE : दुष्टः (ष्टा, ष्टं), असङ्गतः (ता, तं), etc.

OBJECTIVE : v. Object (v.), (II).

OBJECTIVELY : expr. by adj. विषयगतः (ता, तं). (?).

OBJECTOR : expr. by verb.

OBJURGATE : भर्त्सयति (भर्त्स् , c. 10.) : v. To reprove.

OBJURGATION : भर्त्सना : v. Reproof.

OBLATE : in geo. : *अवनतः (ता, तं).

OBLATION : (1) बलिः, *offer o.s to the (divine) mothers* : मातृभ्यो बलिमुपहर, Mr. i. ; (2) नैवेद्यम् (of uncooked rice, sweetmeats etc.) ; (3) हव्यम् (in fire, gen. of *ghee*) ; (4) कव्यम् (to the *manes*).

OBLIGATION : I. Binding moral power : (1) बन्धः (=bond) ; (2) धर्मः (=duty). II. A contract : q.v. : संविद् (f.). III. Indebtedness : *under o.* expr. by ऋणिन् (f, नी) (=indebted), *or* उपकृतः (ता, तं) (=done

good to) *or* अनुगृहीतः (ता, तं) (=favoured) *or* बद्ध (f. द्धा), *his generosity lay the whole village under o.* : *ग्रामः समग्रस्तस्य दयालुतया बद्धः.

OBLIGATORY : expr. with अवश्यम् (=must : q.v.).

OBLIGE : I. To bind : बध्नाति (बन्ध्, c. 9.). II. To compel : q.v. *O.d.*=under obligation : v. Obligation (III).

OBLIGING (adj.) : दक्षिण (f. णा) : v. Also kind, good-natured.

OBLIGINGLY : दाक्षिण्येन : v. Also liberally.

OBLIGINGNESS : दाक्षिण्यम् : v. Kindness, civility.

OBLIQUE : वक्र (f. क्रा), *o. line* : वक्ररेखा ; *o. insinuation* : वक्रोक्तिः ; *o. speech* : *कथकस्य i.e. *teller's* (in opposition to वक्तुः=*speaker's* i.e. direct) उक्तिः ; *o. case* : अप्रधानकारकम्.

OBLIQUELY : वक्रम् : v. Askance.

OBLIQUENESS : Obliquity. I. Lit. : वक्रता : v. Crookedness. II. Deviation : नतिः. III. Fig., iniquity : q.v. : वक्रता.

OBLITERATE : (1) लुम्पति, वि-, आ-, अव- (लुप्, c. 6.), *my sight is o.d* : दृष्टिरालुप्यते मे, Me. ii. 44. ; (2) मार्ष्टि, परि-, प्र-, अप- (मृज्, c. 2.) : To erase.

OBLITERATION : (1) लोपः, वि-, अव-, आ- ; (2) मार्जना.

OBLIVION : विस्मृतिः : v. Forgetfulness.

OBLIVIOUS : I. Causing oblivion : स्मृतिमुष् (mfn.), स्मृतिहरः (री, रं) and sim. comp.s. II. Forgetful : q.v.

OBLONG : I. Adj. : आयतः (ता, तं). II. Subs. : आयतः, Li.

OBLOQUY : परि(री)वादः : v. Censure, reproach.

OBNOXIOUS : I. Liable, subject : q.v. : -वशः (शा, शं) in comp. II. Offensive, hateful : q.v. : गर्हितः (ता, तं).

OBNOXIOUSLY : expr. by circumlo. with adj. or pres. part.

OBOLUS : *ऐलेनः क्षुद्ररूप्यमुद्राविशेषः ; औपलः.

OBSCENE : I. In gen. : (1) अश्लीलः (ला, लं) (=indecent : q.v.) ; (2) व्रीडाकरः (री, रं) and sim. comp.s (lit.=producing shame), Sah. (3) वियातः (ता, तं) (=immodest) ; (4) न्यक्कारसंयुतः (ता, तं) (in low abuse), Mit. II. Ill-omened : अमङ्गलः (ला, लं) and sim. comp.s.

OBSCENELY : (1) अश्लीलम् (acc.) ; (2) often by comp.

OBSCENITY : I. The state : (1) अश्लीलता ; (2) व्रीडाकरता. II. Anything obscene : expr. by adj.

OBSCURATION : (1) आच्छादनम् ; (2) आवरणम्, *for o. of sight* : आवरणाय दृष्टेः, R. v. 18. ; (3) उपरोधः, R.

OBSCURE (v.) : I. Lit. : (1) आच्छादयति : v. Eclipse ; (2) आवृणोति (वृ, c. 5.), *o.ing eyesight* : लोचनमार्गमावृण्वत् (f. ती), K. vii. 42. : v. To cover. Ph. : *with eyes o.d with ichor* : मदान्धकारिताक्ष (f. क्षी), V.p. i. ix. 10. : v. To darken. II. Fig. : expr. by adj. : v. Obscure ; clear, not.

OBSCURE : I. Covered over, darkened : (1) आच्छादितः (ता, तं) ; (2) आवृतः (ता, तं) ; (3) उपरुद्ध (f. द्धा) : v. Also dark. II. Retired, unknown : अप्रसिद्ध (f. द्धा) : v. Also humble, mean. III. Not easily understood : (1) कष्टः (ष्टा, ष्टं), *o. meaning* : कष्टोऽर्थः, Kav. vii. 7. ; (2) कष्टार्थ (f. र्था) (of passage, etc.) ; (3) क्लिष्ट (f. ष्टा) (=difficult : q.v.). IV. Hidden : गूढ (f. ढा), नि-, *whose truths are o.* : निगूढतत्त्व (f. त्त्वा), Ki.

OBSCURELY : expr. by adj.

OBSCURITY : I. Darkness : q.v. II. Hiddenness, privacy : गूढता, -त्वम्, नि-. III. Unintelligibleness : कष्टार्थता. IV. Meanness : q.v. : नीचता.

OBSEQUIES : (1) अन्त्येष्टिः, -क्रिया ; (1) नैष्ठिको विधिः, R. viii. 25.

OBSEQUIOUS : छन्दोनुवर्तिन् (f. नी) : v. Also submissive.

OBSEQUIOUSLY : expr. with कृताञ्जलि (mfn.), अधिदैवतमिव, K., etc.

OBSEQUITY : छन्दोनुवर्तित्वम्, -ता : v. Also servility.

OBSERVABLE : v. Remarkable.

OBSERVANCE : I. Attention : आदरः. II. Per-

formance : पालनम्, प्रति-, अनु-. III. Rite, usage : q.v. : कर्मन् (n.).

OBSERVANT : gen. with of : expr. by verb. : v. Also attentive, careful.

OBSERVATION : I. The act : अवेक्षणम्, परि-. II. A remark : q.v. अनुशासनम् (?).

OBSERVATORY : दिगवलोकनप्रासादः (Sa. but not in the exact sense).

OBSERVE : I. To notice with care : अवेक्षते, परि- (ईक्ष्, c. 1.), *o.ing that the verb (conveys) the sense of motion* : अवेक्ष्य धातोर्गमनार्थम्, R. iii. 4. : v. To look, consider. II. To keep, obey. q.v. : पालयति, प्रति-, अनु-, (पाल्, c. 10.). III. To remark : q.v. : अभि दधाति *or* धत्ते (धा, c. 3.). IV. To humour : q.v.

OBSERVER : I. Spectator : q.v. : अवेक्षकः. II. Keeper : प्रति-पालयितृ (f. त्री), अनु-.

OBSERVING (adj.) : अप्रमत्तदृश् (mfn.) and sim. comp.s.

OBSERVINGLY : अप्रमत्तः (त्ता, त्तं) : v. Carefully.

OBSIDIAN : उपलविशेषः ; *अक्षोदः.

OBSOLETE : (1) गतव्यवहारः (रा, रं) (?) ; (2) लुप्तप्रयोगः (गा, गं) (of words etc.) (?) and sim. comp.s. : v. Also ancient.

OBSOLETENESS : (1) प्रयोगलोपः (?) and sim. comp.s. ; (2) by adj.

OBSTACLE : (1) अन्तरायः ; (2) व्याघातः ; (3) प्रतिबन्धः ; (4) बाधा ; (5) प्रत्यूहः ; (6) प्रतिष्टम्भः.

OBSTETRIC : प्रजनन- in comp. : v. Also obstetrics.

OBSTETRICIAN : प्रजननकुशलः (ला, लं), Sr. ; प्रसवकर्मनिपुण (f. णा), etc.

OBSTETRICS : गर्भिणीव्याकरणम्, Sr. : v. Midwifery.

OBSTINACY : (1) निर्बन्धः (=pertinacity) ; (2) दार्ढ्यम् (= firmness) ; (3) अविनेयता (= indocility).

OBSTINATE : (1) दृढः (ढा, ढं) (=firm), *really you are very o.* : सत्यमतिदृढासि, U. iv. ; (2) अविनेयः (या, यं) (=indocile) ; (3) निरवग्रहः (हा, हं) (=self-willed).

OBSTINATELY : (1) निर्बन्धेन ; (2) दृढम् (=firmly).

OBSTREPEROUS : expr. with कलकलः *or* कोलाहलः : v. Noisy.

OBSTREPEROUSLY : (1) कलकलैः ; (2) कोलाहलैः.

OBSTRUCT : (1) रुणद्धि *or* रुंधे, अव- (रुध्, c. 9.) (=to stop, hinder, block up), *your patience like coast o. s the Yādava-oceans* : यादवाम्भोनिधीन् रुंधे वेलेव भवतः क्षमा, Si. ; (2) बाधते, प्र-, (बाध्, c. 1.) (=to impede, trouble), *you always o. us* : सदैवास्मान् प्रबाधसे, Mah. iii. 372. 8.

OBSTRUCTION : बाधा : v. Obstacle, hindrance.

OBSTRUCTIVE : (1) बाधक (f. धिका) ; (2) बाधाकरः (री, रं) ; (3) संरोधिन् (f. नी), अव-, प्रति- ; (4) प्रतिबन्धक (f. न्धिका).

OBTAIN (v.t.) : समासादयति (c. of सद्) : v. To get, gain.

OBTAIN (v.i.) : expr. with प्रबलः (ला, लं) *or* प्रचलितः (ता, तं) (=current).

OBTESTATION : अभ्यर्थना : v. Entreaty, supplication.

OBTRUDE : हठेन *or* हठात् प्रविशति (विश्, c. 6.) (?).

OBTRUSIVE : expr. by circumlo. : धृष्ट (f. ष्टा) (=bold).

OBTRUSIVELY : (1) साबाधम् (?) ; (2) हठेन (=forcibly).

OBTUSE : I. In geo. : *o. angle* : *विषमकोणः ; अधिककोणः, K.d. II. Dull, stupid : q.v. : जडः (डा, डं).

OBTUSELY : दुर्बुद्धितया : v. Stupidly.

OBTUSENESS : जाड्यम् : v. Dullness, stupidity.

OBVERSE (subs.) : of a coin : मुखम्.

OBVIATE : दूरीकरोति : v. To prevent.

OBVIOUS : स्पष्ट (f. ष्टा) : v. Manifest.

OBVIOUSLY : स्पष्टम् : v. Evidently, plainly.

OCCASION (v.) : जनयति : v. To cause.

OCCASION (subs.) : I. Opportunity : q.v. : अवसरः. II. Incidental cause expr. with निमित्तम्. III. Need : प्रयोजनम्. IV. Incident, occurrence : घटना.

OCCASIONAL : expr. by adv.

OCCASIONALLY : (1) अन्तरान्तरा ; (2) समये समये (= at times).

OCCIDENTAL : प्रतीच्य (f. च्या) : v. Western.

OCCIPETAL : *o. bone* : *शिरःपृष्ठास्थि (n.).

OCCULT : गूढः (ढा, ढं), नि-, : v. Secret.

OCCUPANCY : भोगः : v. Possession (I).

OCCUPANT : (1) भोगकारिन् (f. णी) ; (2) भोक्तृ (f. क्त्री), परि-.

OCCUPATION : I. The act : अधिष्ठानम्. II. Possession : q.v. : भोगः. III. Employment, calling : वृत्तिः : v. Livelihood. IV. Business : q.v. : व्यापारः.

OCCUPIER : अधिष्ठातृ (f. त्री) (?) : v. Also occupant.

OCCUPY : I. To hold, cover : अधितिष्ठति (स्था, c. 1.) (?). II. To possess : q.v. : भुंक्ते (भुज्, c. 7.). III. To employ : नि-योजयति *or* युंक्ते (युज्, c. 10. and 7.), *to o. oneself* : व्याप्रियते (पृ, c. 6.) *or* with व्यापृतः (ता, तं).

OCCUR : I. To be found here and there : expr. with : अस्ति, वर्तते (वृत्, c. 1.). II. To come into the mind : मनसि उदेति (इ, c. 2.), *doubts, o.ring to her* : मनसि विकल्पानुद्गतः, N. xiii. 54. III. To happen : q v. : वर्तते.

OCCURRENCE : I. Occasional presentation : by verb : *of rare o.* : कदाचित् सम्भवति. II. Event : q.v. : घटना.

OCEAN (subs.) : (1) समुद्रः ; (2) सागरः ; (3) अर्णवः ; (4) अम्भोनिधिः, पयोधिः and sim. comp. ; (5) रत्नाकरः ; (6) वारां राशिः and sim. comp.s. (poet.).

OCEAN, OCEANIC (adj.) : (1) by comp. ; (2) सामुद्र (f. द्री).

OCHRE : (1) रक्तोपलम्, Wilson ; (2) सुवर्णगैरिकम्.

OCTAGON : (1) अष्टकोणः ; (2) अष्टभुजः ; (3) अष्टास्रः, Li.

OCTAGONAL : अष्टभुजः (जा, जं) : v. Octangular.

OCTAHADRON : *अष्टाग्रः (comp. द्वादशाग्रः, A.b.).

OCTANGULAR : (1) अष्टकोणः (णा, णं) ; (2) अष्टास्रः (स्रा, स्रं).

OCTAVE : अष्टमी, Williams.

OCTAVO : *अष्टक- in comp. : अष्टमश्नि (mfn.)

OCTENNIAL : अष्टवार्षिकः (की, कं) (in both senses).

OCTENNIALLY : अष्टमेऽष्टमे वर्षे and sim. comp.s. : v. Every.

OCTOBER : उत्तराश्विनपूर्वकार्त्तिकसंवादीयुरुपीयवर्षस्य दशमो मासः.

OCTOGENARIAN : (1) अशीतिर्वर्षस्य वर्षाणि, A. p. ; (2) अशीतिवर्षवयस्कः (का, कं) and sim. comp.s. अशीतिवर्ष (f. र्षा), P. ; (3) अशीतिकः (का, कं), Ka.

OCTOSYLLABIC : अष्टाक्षर (f. रा) ; अष्टस्वरः (रा, रं).

OCTROI : शुल्कम् (=custom).

OCULAR : (1) प्रत्यक्ष- in comp. ; (2) चाक्षुषः (षी, षं).

OCULARLY : (1) by ins : चक्षुषा, etc. : v. Eye ; (2) प्रत्यक्षतः.

OCULIST : नेत्ररोगचिकित्सकः and sim. comp.s.

ODD : I. Not even : विषमः (मा, मं). II. Remaining over and above round numbers : कतिपयः (या, यं). III. Strange, peculiar, queer : अपरूपः (पा, पं).

ODDITY : anything odd : expr. by adj. : अपरूपः (पा, पं).

ODDLY : *o. shaped* : अपरूपः (पा, पं) : v. Odd.

ODDNESS : I. Of numbers : वैषम्यम् (?). II. Singularity, strangeness : अपरूपता.

ODDS : I. Excess : आधिक्यम्. II. Inequality : वैषम्यम्. III. Advantage, superiority : q.v. : Ph. : (a) *at o.* i.e. in dispute : expr. with वैषम्यम् *or* अनैक्यम् ; (b) *o. and ends* : यत्तद्वस्तु (n.), etc.

ODE : (1) गीतम् (=song) ; (2) कविता (=poetry).

ODIOUS : (1) गर्हितः (ता, तं) ; (2) कुत्सितः (ता, तं) ; (3) घृणितः (ता, तं).

ODIOUSLY : (1) गर्हितम् ; (2) घृणितम् ; (3) कुत्सितम्.

ODIOUSNESS : (1) गर्हितता ; (2) कुत्सितता ; (3) गर्ह्यता.

ODIUM : I. Hatred : घृणा. II. Fault : दोषः.

ODONTOLOGY : दन्तव्याकरणं शारीरम् (comp. धमनीव्याकरणं शारीरम्, Sr.).

ODORIFEROUS : (1) गन्धवत् (f. ती) : v. Fragrant ; (2) गन्धवहः (हा, हं) (=bearing scent, as *o. gales*).

ODORIFEROUSNESS : गन्धवत्ता : v. Fragrance.

ODOROUS : सुरभि (mfn.) : v. Fragrant.

ODOUR : गन्धः : v. Smell. Ph. : *to be in bad o.* : अवग्रहगतः (ता, तं) : v. Disfavoured.

Of : I. Denoting relation : expr. by gen. or tat. comp., *daughter of the king of Kāsi* : काशिराजपुत्री, V. ; *speed of a chariot* : रथस्य वेगः, Sa. ; *conquest of Tripura* : त्रिपुरविजयः, Me. N.B. (a) do not use gen. when one subs. is in *apposition* with another : *all of us* : सर्वे वयम्, K. ; *entered the city of Oudh* : पुरमविशदयोध्याम्, R. ; *the island of Ceylon* : सिंहलद्वीपः, Kar. ; *in the m. of Fālguna or Chaitra* : फाल्गुने चैत्रे वा मासि, K. b. ; (b) expr. by an adj. or bah. when it introduces an attributive clause, *a man of wealth* : धनी ; *of great strength* : महाबलः (ला, लं) ; *of many kinds* : नानाविधः (धा, धं) ; (c) expr. by a deriv. when it indicates a man's abode : *a man of Oudh* : आयोध्यिकः, U. ; *nobody of this place* : न कश्चिदिहत्यः, D. : v. Inhabitant ; (d) part. in उक (except कामुक) take an acc., *killer of demons* : दैत्यान् घातुकः, S.k. II. About, concerning : q.v. : expr. by gen., *what would one say of the other* : किं भणत्वेक एकस्य, Sa. ; *do you remember of your master* : कच्चिद्भर्तुः स्मरसि, Me. III. Made of : q.v. : (1) by tat. comp., *a house of crystal* : यत्र स्फटिकहर्म्यम्, Ki. ; (2) -मयः (यी, यं), *a vessel of clay* : मृन्मयं पात्रम्, R. ; (3) by deriv., *surely my heart is of iron* : नूनं हृदयं ममायसम्. Ram. IV. In partitive sense : (1) by gen., *by one of which* : येषामेकतमेन, P. ; (2) by loc., *of the kingdoms you have seen* : भवद्दृष्टेषु राष्ट्रेषु, D. ; (3) gen. expr. by comp. when *of* follows a superlative, *best of men* : पुरुषोत्तमः (मा, मं), A.r. ; *greatest of all* : सर्वमहत् (f. तां), S. k. Ph. : *one of the wives* (=one wife) : एका भार्या, J. ; *many of these* : बह्नीमानि, Mah. V. To denote cause : expr. by ins., *of sorrow* : शोकेन, A. r. : v. From. VI. To denote descent : expr. by deriv. or by comp., *of the lunar race* : सोमवंशीयः (या, यं), Mah. ; *prince of high blood* : कुलजः कुमारः, N. Ph. : *of late* : अधुना ; *of old* : पुरा.

Off : I. Interj. : अपेहि : v. Away, begone. II. Adj. : दूरवर्तिन् (f. नी) and sim. comp.s. III. Adv. : दूरे *or* दूरतः : v. Far. IV. With verbs or adverbs : v. The several verbs, etc. V. Prep. : expr. by circumlo., *to be o. the bed* : शय्यां मुञ्चति. Ph. : (a) *o. and on* : सकासकम् (??) ; (b) *o.-hand* : विना समाधानेन (?).

Offal : उच्छिष्टम् : v. Refuse.

Offence (subs.) : I. Crime., fault : q.v. : fault : अपराधः, *punishing according to the nature of the o.* : यथापराधदण्ड (f. ण्डा), R. i. 6. ; *shall not forgive any one for a second o.* : द्वितीयमपराधं न कस्यचित् क्षमेत, V.s. ; *it is not master's o.* : नास्ति प्रभवतोऽपराधः, V. ii. II. Displeasure, resentment : q.v. : विरागः.

Offend : To sin, transgress : q.v. : (1) अपराध्यति (राध्, c. 4.), *I have o.ed in this (matter)* : अहमेवात्रापराद्धा, V. ii. ; (2) अपराधं करोति, M.n. II. To pain : q.v. : पीडयति (पीड्, c. 10.). III. To displease, affront : (1) अपराध्यति, *you have o.ed Jāmadagnya* : अपराद्धं त्वया जामदग्न्यस्य, Vi. iv. ; (2) expr. with : विरक्त (f. क्ता) (=displeased) *or* कुपितः (ता, तं) (=enraged), *and (my) master is o.ed* : सेव्यो जनश्च कुपितः, V. ii. IV. Cause to stumble : स्खलयति (c. of स्खल्).

Offender : अपराधिन् (f. नी) : v. Also guilty.

Offensive : I. Displeasing, disagreeable : दुष्ट (f. ष्टा), *o. words* : दुष्टवाक्यम् ; *o. smell* : दुष्टगन्धः. II. Injurious : पीडाकरः (री, रं) and sim. comp.s. III. Assailant : आक्रामक- in comp. (?). Ph. : *league o. and defensive* : सङ्गतः *or* काञ्चनः सन्धिः, Ka. ix. 8. ; *to act on the o.* : परामियोगं करोति (??).

Offensively : (1) सापराधम् ; (2) सदोषम् ; (3) दुष्टम्.

Offensiveness : (1) दुष्टता ; (2) पीडकता (=injuriousness).

Offer (v.t.) : I. To present as a sacrifice : (1) उपहारं करोति *or* ददाति, *if you o. your own son to the goddess* : यदि त्वमात्मनः पुत्रं भगवत्या उपहारीकरोषि, H. iii. ; (2) उपढौकते (ढौक्, c. 1.) (not religiously), *o.ed this body to Garuda* : गरुडाय स्वदेहमुपढौकितवान्, Vet. xiii. ;

(3) उपनयति (नी, c. 1.) ; *o.ed his body to the lion* : हरये स्वदेहमुपानयत्, R. ii. 59. II. To the mind : उदेति (इ, c. 2.) : v. To occur, arise. III. To propose : q.v. : उपन्यस्यति (अस्, c. 4.) (?). IV. To bid : दित्सति (desi. दा). V. To make use of : करोति, *o. violence* : बलात्कारं करोति ; *o. prayers* : स्तवं करोति. Ph. : *to o. hand (in friendship)* : बाहुं प्रसारयति, Ram.

OFFER (v.i.) : I. To arise, arrive : q.v. : उपनमति (नम्, c. 1.). II. To volunteer, promise : q.v. III. To attempt : q.v.

OFFER (subs.) : प्रस्तावः (?), *to reject an o.* : प्रस्तावं प्रत्याख्याति (?). Ph. : *to make an o. of* : दित्सति.

OFFERING (subs.) : उपहारः, *take this o.* : गृह्यतामुपहारः, H. iii. : v. Oblation, sacrifice.

OFFERTORY : उपहारस्तोत्रम् (??).

OFFICE : I. Duty, work : q.v. : कर्मन् (n.). II. An employment : q.v. (1) कर्मन् (n.) ; (2) अधिकारः, *discharged from an o.* : आक्षिप्ताधिकारः (रा, रं), Mu. ; (3) पदम् (=position) ; (4) कार्यम्. III. Place where business is transacted : no equiv. : कर्मशरणम्, कर्मकुलम्, and sim. comp.s. may be used. IV. Formulary : पद्धतिः. V. Of a house : बहिःशाला.

OFFICER : (1) कर्मचारिन् (m.) (used in Bengali) ; (2) अधिकृतः (=employee), *civil o.* : *पौराधिकृतः ; (3) नायकः (=leader).

OFFICIAL (subs.) : राजपुरुषः : v. Also officer.

OFFICIAL (adj.) : by comp., *o. life* : *अधिकृतजीवितम् ; *o. dress* : अधिकृतवेषः ; *o. duties* : अधिकृतकर्माणि.

OFFICIALNESS : in bad sense : अधिकृतरागः and sim. comp.s.

OFFICIALLY : *अधिकृतनियमानुसारेण and sim. comp.s.

OFFICIATE : कर्म करोति, *o.ing magistrate* : *कर्मकरदण्डनायकः.

OFFICIOUS : I. Meddlesome : अनधिकारचर्चाशीलः (ला, लं) and sim. comp.s. II. Kind : दक्षिण (f. णा).

OFFICIOUSLY : अनधिकारचर्चां कृत्वा and sim. comp.s.

OFFICIOUSNESS : (1) अनधिकारचर्चा ; (2) प्रागल्भ्यम् (=boldness).

OFFING : perh. अपारसमुद्रः. Ph. : *in the o.* : विदूरे गभीरे जले (?).

OFFSCOURING : उच्छिष्टम् : v. Refuse.

OFFSET : I. Lit. : प्ररोहः : v. Shoot. II. Fig. : v. Set off.

OFFSPRING : (1) सन्तानः, *desirous of o.* : सन्तानकामः (मा, मं), R. ; (2) सन्ततिः, *for o. of pure lineage* : सन्ततिः शुद्धवंश्या हि, R. i. 69. ; (3) प्रजा (f.), *quieting the people like his own o.* : प्रजाः प्रजाः स्वा इव सान्त्वयित्वा, Sa. v. 3. ; (4) प्रसूतिः, *destitute of o.* : प्रसूतिविकलः (ला, लं), Sa. vi.

OFT, OFTEN : (1) बहुशः ; (2) अनेकशः ; (3) असकृत् ; (4) अभीक्ष्णम् : v. Frequently. Ph. : (1) *how o.* : कतिशः ; (2) *as o. as......so o.* : यावतो वारान्...... तावतो वारान्.

OGLE : I. Subs : साचिविलोकितम् : v. Glance. II. Verb : साचि *or*...तिर्यक् विलोकयति : v. To glance.

OGRE : राक्षसः (f. सी).

OH : आः : v. O.

OIL (subs.) . तैलम्, *sesamum o.* : तिलतैलम्, Bha. : *cooked in o.* : तैलपक्व (f. क्वा), Bha. ; *o.-seeds* : तिलादिवस्तूनि, Bha., *or* -द्रव्याणि, *or* perh. तैलबीजानि (comp. खसबीजानां तैलम्, Bha.).

OIL (v.) : तैलेन अनक्ति (अञ्ज्, c. 7.), लेपयति (c. of लिप्), etc. : v. To besmear.

OILCAKE : (1) तैलकिट्टम् ; (2) पिण्याकः.

OILCLOTH : *तैलरञ्जितवस्त्रम्, -आस्तरणम्, etc.

OIL-COLOUR : *तैलरञ्जितरङ्गः and sim. comp.s.

OIL-MAN : (1) तैलिकः ; (2) तैलिन् (m.) ; (3) तैलकारः.

OIL-MILL, OIL-PRESS : तैलचक्रम्.

OIL-PAINTING : *तैलरञ्जितरङ्गेन चित्रितम् and sim. expr.s.

OILY : I. Lit. : (1) by comp. ; (2) तैलमयः (यी, यं) (=consisting of oil) II. Resembling oil : मसृण (f. णा). II. Supple, compliant : छन्दोऽनुवर्तिन् (f. नी).

OINTMENT : अञ्जनम्, अभि- : v. Unguent.

OLD : I. Aged : (1) वृद्धः (द्धा, द्धं), *an o. man's saying* : वृद्धस्य वचनम्, H. ; *the o. woman* : सा वृद्धा,

D.; *I am now o.*: इदानीमहं वृद्धः, H.; *an o. ox*: वृद्धोऽक्षः, Ku.; (2) स्थविरः (रा, रं); *like an o. man*: स्थविर इव, Mah.; *the king is o.*: स्थविरः स राजा, D.; *an o. maid-servant*: स्थविरदासी, Ana.; (3) प्रवयस् (mfn.): v. Age.; (4) जरत् (f. ती) (=decayed), *o. and infirm figure*: जरती तनुः, Ki. xi. 7. II. To expr. age: by comp. with -वर्ष (f. र्षा), -वत्सर (f. रा), etc., *thirteen years o.*: त्रयोदशवर्ष (f. र्षा), D. viii.: v. Age, of. Ph.: *and how o. is (he)*: कियद्वा वयः, K. III. Not new: (1) पुराणः (णा, णं), *our o. dear friend*: पुराणप्रियसुहृदस्माकम्, Ana.; *o. wine*: पुराणमद्यम्, Bha.; (2) जीर्णः (र्णा, र्णं) (=o. and rotten), *o. temple*: जीर्णदेवायतनम्, Au.; (3) चिरन्तनः (नी, नं) (of long standing), *o. butter*: चिरन्तनं नवनीतम्, Bha.: *o. friend*: चिरमित्रम्, H.; *o. servant*: चिरसेवकः, H. IV. Ancient: q.v.: पुराणः (णा, णं): *o. sages*: मुनयः पुराणाः, Vi.

OLD, OF: (1) पुरा; (2) पूर्वकाले: v. Formerly.

OLD AGE: (1) वार्द्धक्यम्; (2) स्थविरम्; (3) वार्धकम्, R. i. 8.; (4) परिणामः (=advanced age), R. viii. II.; (5) जरा (=infirm old age), D.i.

OLDEN: (1) पुराण (f. णा), *of o. custom*: पुराणस्याचारस्य, Vi. iii. 38.; (2) पुरातनः (नी, नं), *o. necklace*: पुरातनी माला, Ku.: v. Ancient, Ph.: *o. times*: पुराकालः.

OLD-FASHIONED: (1) प्राचीनः (ना, नं): v. Ancient; (2) by circumlo.

OLDNESS: I. Antiquity: (1) पुराणत्वम्, -ता; (2) पुरातनत्वम्, -ता. II. Old age: (1) वृद्धत्वम्; (2) स्थविरता.

OLEAGINOUS: (1) तैल- in comp.; (2) स्निग्ध (f. ग्धा) (=unctuous).

OLEANDER: a plant: करवीरः.

OLFACTORY: गन्धवाहिन् (f. नी) (?) (comp. वायुवहा शिरा).

OLIBANUM: (1) कुन्दुः; (2) कुन्दुरः (रुः), -कः.

OLIGARCH: *मुख्यः.

OLIGARCHIC, -AL: expr. with subs. or by circumlo.

OLIGARCHY: *मुख्यतन्त्रम्; मुख्यानां शासनम्, Ph.: *o. of bishops*: *कतिपयधर्मनायकशासनम्.

OLIO: सङ्करः: v. Also medley.

OLIVE: I. The tree: जितः, -वृक्षः (?). II. The fruit: जितम्, -फलम् (?).

OLYMPIAN, OLYMPIC: *औलुम्प (f. म्पी).

OMELET: *अण्डसारः; अण्डसाध्यखाद्यविशेषः.

OMEN (subs.): (1) निमित्तम्, *good and bad o.s*: शुभाशुभानि निमित्तानि, V. m.; (2) शकुनम्, -नः (properly from birds), सर्वशकुनसंग्रहः, V. m. 86. 4.; (3) by adj. (when the meaning is clear), *good o.*: शुभम्, इष्टम्, शस्तम्, etc.: v. Also portent.

OMEN (v.): कथयति: v. To betoken. *Well-o.ed, ill-o.ed*: v. Auspicious, inauspicious.

OMINOUS: अनिष्टशंसिन् (f. नी) and sim. comp.s.: v. Inauspicious.

OMINOUSLY: expr. by adj. or circumlo.

OMISSION: वर्जनम् (?); (2) अतिक्रमः (?); (3) उत्क्षेपः (?): v. To omit, neglect.

OMIT: (1) परित्यजति (त्यज्, c. 1.) (=to leave out); (2) अतिक्रामति (क्रम्, c. 1.) (=to pass by); (3) उत्क्षिपति (क्षिप्, c. 6.) (=to throw out).

OMNIBUS: गोष्ठीयानम्, Mr. vi.

OMNIPOTENCE: (1) सर्वशक्तित्वम्; (2) सर्वशक्तिमत्त्वम्.

OMNIPOTENT: (1) सर्वशक्ति (mfn.); (2) सर्वशक्तिमत् (f. ती); (3) सर्वशक्तिसमन्वितः (ता, तं); (4) सर्वसमर्थः (र्था, र्थं); (5) समग्रशक्ति (mfn.); etc.

OMNIPRESENCE: (1) सर्वगतत्वम्, S.; (2) सर्वत्र विद्यमानता.

OMNIPRESENT: (1) सर्वत्र विद्यमानः (ना, नं); (2) सर्वगतः (ता, तं); (3) सर्वव्यापिन् (f. नी) (=all-pervading).

OMNISCIENCE: (1) सर्वज्ञता, -त्वम्; (2) सर्ववेदित्वम् (rare).

OMNISCIENT: (1) सर्वज्ञः (ज्ञा, ज्ञं); (2) सर्वविद् (mfn.); (3) सर्ववेदिन् (f. नी); and sim. comp.s.

OMNIVAGANT: (1) सर्वगः (गा, गं); सर्वगतः (गा, गं); (3) सर्वतोगामिन् (f. नी).

OMNIVOROUS: सर्वभक्षः (क्षा, क्षं) and sim. comp.s.

ON (prep.) : I. In contact with : (1) by loc., *lying on a grass bed* : संविष्टः कुशशयने, R. ; *putting on his head* : शिरस्यारोप्य ; Vi. ; *to fall on the ground* : भूमौ पतति, Mr. ; (2) उपरि (=over : q.v.) : (with gen.), *to throw on Vairodhaka* : वैरोधकस्योपरि निपातनाय, Mu. N.B. The ins. must be used after verbs of motion : *to go on horse* : अश्वेन गच्छति, S. ; *carrying on his shoulders* : स्कन्धेनोद्वह्य, D. ; *take me to (our) house on a fresh cloud* : नय मां नवेन वसतिं पयोमुचा, V. II. =at, near : (1) by loc., *a cow-station on the Ganges* : गङ्गायां घोषः, Kav. ; *on the north* : उत्तरस्यां दिशि, Ku. ; (2) by affix तस्, *on the right* : दक्षिणतः ; *on the left* : वामतः ; *on the rear* : पृष्ठतः ; *on both sides* : उभयतः. III. At the time of : by loc., *on the first of Āshāḍha* : आषाढस्य प्रथमदिवसे, Me. ; *on the following day* : परस्मिन्नहनि (or commonly, परेद्युः). IV. = after : q.v. : by loc. abs., *on her departure* : गतायां तस्याम्, K. V. Denoting logical basis of connexion : expr. by ins., *on one condition* : एकेनाभिसन्धिना, Sa. ; *on oath* : शपथेन (?). VI. Concerning : q.v. : expr. by comp., *a treatise on spheres* : गोलप्रबन्धः, Go. VII. To denote various relations : v. The several verbs after which it is used. Miscell. : *on high* : उच्चैः ; *on a sudden* : सपदि ; *on the wing* : v. To fly ; *on the alert* : सावधानः (ना, नं) ; *on hand* : हस्तगतः (ता, तं) ; *the gods were on (the side of) Arjuna* : देवा अर्जुनतोऽभवन्, S.k.

ON (adv.) : I. After verbs : gen. not expr. II. Attached to the body : अङ्गे. Ph. : *and so on* : इत्यादि (mfn.).

ONCE : I. One time : (1) सकृत्, *even o.* : सकृदपि, K. ; (2) एकवारम्, *o. and again* : (1) असकृत् ; (2) वारं वारम् ; (3) मुहुः. II. At one time : कदाचित्. III. Formerly : q.v. : पुरा.

ONCE, AT : I. At the same time : (1) युगपत् ; (2) समकालम् ; (3) एकावसरम् ; (4) समम्, Ki. Ph. : *at o. perspicuous and deep* : प्रसन्नगम्भीरः (रा, रं), Ki. ; *at o. terrific and pleasant* : भीमकान्तः (न्ता, न्तं), B. II. Immediately : q.v. : (1) सद्यः ; (2) तत्क्षणात्.

ON DIT : (1) किल (enclitic) ; (2)......इति श्रूयते ; etc.

ONE : I. In gen. sense : (1) एकः (का, कं), *not o. of you* : भवत्सु नैकम्, N. xiv. 44. ; *in o. hollow* : एकस्मिन् कोटरे, K. ; *one-horse carriage* : एकाश्वयानम् and sim. comp.s. (?) ; (2) एकैकः (का, कं) (distributive), *takes one Dinār every day* : प्रतिदिनमेकैकं दीनारं गृह्णाति, P. ; *gave o. code to each* : एकैकां संहितामेककस्मै ददौ, B. p. *One of two* : एकतरः (रा, रं), *one of many* : एकतमः (मा, मत्), *even by o. of which* : येषामेकतमेनापि, P. v. 3. *One by one* : एकैकशः, A. r. *O. day* : एकदा, K. *At o. time* : एकस्मिन् समये, L. II. In contrast to *other or another* : एकः (का, कं), *the o. brought the kings under subjection, the other*...एको नृपतीन् वशमनयत् । अपर···, R. viii. 19. ; *one is grinding paints, another stringing flowers* : एका वर्णकं पिनष्टि । अपरा सुमनसो गुम्फति, Mr.; *their clans are fourteen ; one is derived from the mind of Brahmā, another from the Vedas, another from the fire* : तासां चतुर्दश कुलानि । एकं कमलयोनेर्मनसः समुत्पन्नम्, अन्यद्वेदेभ्यः संभूतम्, अन्यदग्नेरुद्भूतम्, K. ; *what will o. say of the other* : किं भणति एक एकस्य, Sa. ; *on the o. hand...on the other* : एकत्र...एकत्र (better अन्यत्र or अपरत्र), K. ; *on the o. hand...on the other* : एकतः···अन्यतः, Vi. Ph. : *at one time...at another time* : कदाचित्··· कदाचित्, R. III. Denoting identity : expr. by तद्, *but not the o.* : न पुनः सः, Mr. ; *I am the o.* : सोऽहमस्मि, D. : v. Same. Ph. : *all the ethical systems are at one that innocence is a cardinal virtue* : धर्मशास्त्राणामहिंसा परमो धर्म इत्यत्रैकमत्यम्, H. ; *the great-minded are one in mind, in word, in action* : मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम्, H. i. 100. IV. In connextion with rel. pro. : expr. by तद्, *I do not see o. whom she has not embraced* : न हि तं पश्यामि योऽनया नोपगूढः, K. V. Equiv. to some o., any o. : कश्चित् : v. Any, some. VI. In an indefinite sense(=men) जनः or लोकः, *one would say* : जनो or लोको वदिष्यति. Ph. : (a) *little ones* : शिशवः : v. Child ; (b) *one-eyed* : एकाक्ष (f. क्षी) or gen. काण (f. णा).

ONE ANOTHER, ONE···THE OTHER : (1) अन्योन्य: (न्या, न्यत्), *why do you eat o. a.'s flesh* : कस्मात्त्वमन्योन्यं मांसं भक्षयथ, Kar.; *placing o. a.'s attributes on o. a.* : अन्योन्यस्मिन्नन्योन्यधर्मानध्यस्य, S.; (2) इतरेतर:, (रा, रत्) *feeding o. a.* : इतरेतरं भोजयत:, S. k.; *without distinguishing one from the other* : इतरेतराविवेकेन, S.; (3) परस्पर:, (रा, रं) *all spoke to o. a.* : ऊचु: सर्वे परस्परम्, A. r.; *one with the other* : परस्परेण, R. vii. 14.

ONENESS : एकता, S. p. b. : v. Unity.

ONEROUS : (1) गुरु (f. र्वी) (=heavy); (2) दुर्भर: (रा, रं) (=oppressive).

ONESIDED : असम: (मा, मं) (=inequal) : v. Partial.

ONESIDEDNESS : असमता (=inequality) : v. Partiality.

ONION : (1) पलाण्डु:; (2) सुकन्द:.

ONLY (adj.) : (1) एक एव (एकैव, एकमेव), *I was the o. daughter born of them* : तयोरहमेकैवात्मजा समुत्पन्ना, K.; (2) एक- in comp., *(my) old infirm mother who has an o. son in me* : मदेकपुत्रा जननी जरातुरा, N.; (3) by adv. : q.v.

ONLY (adv.) : (1) केवलम्, (best equiv.), *killing me is not o. killing an animal* : न केवलं प्राणिवधो वधो मम, N.; *(but) o. (he) does not bear transgression* : केवलं न सहते विलङ्घनम्, Ki.; (2) by -मात्र in comp., *black o. in colour* : वर्णमात्रेण कृष्ण:, Me.; (3) with एव giving emphasis, *there is o. one means* : एक एवोपायोऽस्ति, K.s.

ONOMATOPŒIA : अव्यक्तानुकरणम्, S.k.

ONSET : अवस्कन्द: : v. Attack.

ONSLAUGHT : अभिघात: : v. Also invective.

ONTOLOGY : *सत्त्वविज्ञानम्; सत्त्वविचार:; and sim. comps.

ONWARD (adj.) : (1) अग्रेसर: (री, रं); (2) वर्धिष्णु (mfn.) (=increasing).

ONWARD,-S (adv.) : (1) अग्रे; (2) अग्रत:; (3) पुरत:.

ONYX : गोमेदभेद:; पीतरत्नम् (?), Bha.

OOZE (v.i.) : (1) स्रवति, परि-, (स्रु, c. 1.). *and the secret will o. out* : रहस्यञ्च स्रवति, D. ii.; (2) क्षरति (क्षर्, c. 1.); (3) रीयते (री, c. 4.) (rare).

OOZE (subs.) : क्षरितम् : v. Also flow.

OOZY (adj.) : सरस: (सा, सं) : v. Moist, wet.

OPACITY : कलुषता or कालुष्यम् : v. Transparency.

OPAL : perh. पुलक: or विमलक:, V.m. 80. 4.

OPAQUE : कलुष: (षा, षं), V.m. 82. 4. : v. Transparent.

OPE (v.) : v. Open (V.).

OPEN (v.t.) : I. To unclose : (1) वि-वृणोति, अपा-, (वृ, c. 5.), *o. the back door* : अपावृणु पक्षद्वारकम्, Mr.; *to o. the mouth* : आस्यं विवृणोति, V.p.; (2) उद्घाटयति (c. of घट्), (from some fastening, etc.), *o. the door* : उद्घाटय द्वारम्, Mr.; (3) उन्मोचयति (मुच्, c. 10.) (=to free, as from a cover) *o.ed and read it* : तदुन्मुच्य पपाठ, K.; (4) उन्मीलयति (c. of मील्) (of the eyes); (5) व्याददाते, -ददाति (दा, c. 2.) (to open wide, as the mouth); (6) प्रसारयति (c. of सृ) (=to stretch, put forth, as the hands). II. To disclose, reveal : q.v. : विवृणोति. III. To explain, expound : q.v. : विवृणोति. IV. Of roads, etc. : (1) करोति : v. To make; (2) शोधयति (c. of शुध्) (=to clear), कुर्वन्त: शोधयन्तश्च पन्थानं गहने वने, Ram. V. To begin : q.v. : प्रस्तौति (स्तु, c. 2.). VI. To lance : विध्यति (व्यध्, c. 4.), Sr. VII. Of the bowels : रेचयति (रिच्, c. 10.).

OPEN (v.i.) : I. To unclose : (1) विवृत: (ता, तं) भवति; (2) by pass. II. To appear : q.v. : आविर्भवति. III. Of flowers, etc. : उन्मीलति (मील्, c. 1.). IV. To begin : q.v. : आरमते (रम्, c. 1.).

OPEN UP : (1) विवृणोति : (2) प्रकटीकरोति.

SIN (v.) : पापं करोति, etc. : v. Sin (subs.).

SINCE (prep.) : (1) प्रभृति (with abl.), *s. seeing (you)* : दर्शनात् प्रभृति, K. ; *s. then* : तदा प्रभृति, Ku. v. 55. ; *ever s. he came to sight* : यतः प्रभृति स मम दर्शनपथं गतः, ततः प्रभृति, Sa. iii. ; (2) आ (with abl. or in comp.=from), *s. her birth* : आ जन्मनः, Sa. v. 27.

SINCE (adv.) : I.=s. then : तदा प्रभृति. II. =ago : *fifteen years s.* : इतः पूर्वं पञ्चदशवर्षे ; *long s.* expr. with : चिरम् : v. Long.

SINCE (conj.) : (1) यस्मात्, यतः *or* यत् (=as), Ki. xi. 14. ; (2) कुतः *or* कस्मात् (with abl. clause) : v. Because ; (3) हि : v. For.

SINCERE : (1) अकृत्रिम (f. मा=unaffected : q.v.) ; (2) यथार्थ (f. र्था=true, real : q.v.) ; (3) सरल (f.=simple, frank : q.v.) ; (4) विशुद्ध (f. द्धा=pure : q v.).

SINCERELY : expr. by adj. or circumlo. : v. Also guilelessly.

SINCERITY : (1) अकृत्रिमता (=unaffectedness) ; (2) विशुद्धता (=purity) ; (3) सरलता (=simplicity) ; (4) निर्व्याजता (=guilelessness) ; (5) यथार्थता (=genuineness, reality).

SINE : ज्यापिण्डः, -कः (?). Ph. : *versed s.* : उत्क्रमज्या.

SINECURE : *to hold a s. appointment*, perh. नामकर्मण्यधिकृत (f. ता).

SINEW : I. Lit. : स्नायुः. II. In pl., fig. : बलम् : v. Strength.

SINEWY : I. Lit. : स्नायुमयः (यी, यं). II. Vigorous, firm : q.v.

SINFUL : I. Of persons : (1) पापिन् (f. नी), *very s.* : पापीयस् (f. सी) ; (2) पातकिन् (f. नी) ; (3) पापात्मन् (mfn.) ; (4) पापकर्मन् (mfn.) ; (5) पापकृत् (mfn.) ; etc. II. Of acts ; पाप- in comp.

SINFULLY : expr. by circumlo.

SINFULNESS : पापपरायणता and sim. comp.s (of men) : v. Also wickedness.

SING : (1) गायति (गै, c. 1.), *I s. and dance and play* : गायामि नृत्याम्यथ वादयामि, Mah. iv. 11. 8. ; *s.s (a song) expressing different states in its four feet* : चतुष्पदवस्तुकं गायति, Mal. i. ; *sang to whom the entire Veda* : यस्मै ब्रह्मपारायणं जगौ, Vi. i. 14. ; *where with choristers s.ing out the fame of the Lord of wealth* : उद्गायद्भिर्धनपतियशः किन्नरैर्यत्र सार्धम्, Me. ii. 10. ; *the female bee sang* : मधुकराङ्गनयोज्जगे, Si. vi. 20. ; (2) of birds : कूजति (कूज्, c. 1.), *what the male cuckoo sang sweetly* : पुंस्कोकिलो यन्मधुरं चुकूज, Ku. ii. 32.

SINGE : उपदहति, परि- (दह्, c. 1.), *and my skin is s.d* : त्वक् चैव परिदह्यते, G. i. 30.

SINGER : (1) गायन (f. नी) ; (2) गायक (f. यिका) ; (3) by verb or comp.

SINGING (subs.) : I. Of men : (1) गीतिः, -तम्, *adapted to s.* : गीतिक्षम (f. मा), Sa. vii. 5. ; *time for s.* : गीतसमयः, Mr. iii. 5. ; (2) गानम् ; (3) गेयम्, *who taught you s.* : गेये को नु विनेता वाम्, R. xv. 69. II. Of birds : (1) कूजितम् *or* कूजनम् ; (2) स्वनम् (=sound), Ki.

SINGING (adj.) : I. Of men : गायत् (f. न्ती), J. II. Of birds : मधुरस्वरः (रा, रं=sweet toned), and sim. comp.s.

SINGING-MASTER : perh. गीतशिक्षकः *or* गीताचार्यः (स शिक्षयामास च गीतवादितम्, Mah. iv. 11. 12.) : v. Also musician.

SINGLE (adj.) : (1) एक (f. का) : v. Alone. Ph. : *not a s. man* : न कोऽपि ; *s. combat* : नियुद्धम्.

SINGLE (v.) : gen. with *out* : निर्दिशति : v. To point out.

SINGLE-HANDED : एक (f. का), *Śiva s. took the cities of the enemy* : एकोऽहरद्रिपुपुराणि हरः, Dh. : v. Alone.

SINGLE-STICK : (1) यष्टिः ; (2) दण्डः.

SINGLY : I. Alone : q.v. : एक (f. का). II. One by one : (1) एकैकम् ; (2) एकैकशः ; (3) प्रत्येकम्.

SINGSONG : गाथिका (?).

SINGULAR : I. Single : एक (f. का), *s. number* : एकवचनम्, Sa. II. Remarkable, unparalleled : q.v. : (1) अपूर्व (f. र्वा) ; (2) अपरूप (f. पा=odd : spe. in bad sense) : v. Also strange.

SINGULARITY : (1) अपूर्वता (uncommonness) ; (2) अपरूपता (=oddness) ; (3) विशिष्टता (=particularity).

SINGULARLY : (1) अपूर्वम् ; (2) अपरूपम् ; (3) विशिष्टम्.

SINISTER : I. Inauspicious : q.v. : अमङ्गल (f. ला). II. Crooked, wrong, vicious : q.v. : दुष्ट (f. ष्टा). III. Left : q.v. : वाम (f. मा).

SINK (subs.) : भ्रमः, Si. iii. 33. : v. Drain.

SINK (v.i.) : I. Lit. : मज्जति, नि-, परि-, (मस्ज्, c. 1.), *the vessel sank in the sea-waters* : पोतः समुद्राम्भस्यमज्जत्, D. ; *sunk in deep mire* : महापङ्के निमग्नः, H. i. ; *of the half s.ing sun* : सामि मज्जति रवौ, Ki. ix. 5. ; *sunk in the calamity from water which cannot be easily got over* : मग्नस्य तोयापदि दुस्तरायाम्, Si. xiv. 86. II. To penetrate deep : निविशते (विश्, c. 6.). III. To decrease, fall : ह्रासमुपैति (इ, c. 2.), अधिगच्छति (गम्, c. 1.), etc. IV. To go to destruction : सीदति, अव-, (सद्, c. 1.), M. : v. Also to decline.

SINK (v.t.) : I. To submerge, plunge : q.v. : मज्जयति, नि-, परि- (c. of मस्ज्), *or s. him in water* : अप्सु चैनं निमज्जयेत्, M. viii. 114. II. To dig : q.v. : खनति (खन्, c. 1.). III. To degrade, ruin : q.v. : अवसादयति (c. of सद्). Ph. : *s.ing fund* : *शोधनसारः.

SINLESS : (1) अपापः (पा, पं) ; (2) अनघः (घा, घं) ; (3) निरेजस् (mfn.) ; (4) वीतकल्मषः (षा, षं) and sim. comp.s.

SINNER : (1) पापिन् (f. नी) ; (2) पातकिन् (f. नी) ; (3) पापकर्मन् (mfn.) ; (4) पापात्मन् (mfn.) ; (5) पापकृत् (mfn.) ; etc.

SINUOSITY : (1) वक्रता ; (2) वक्रिमन् (m.) ; (3) कुटिलता.

SINUOUS : (1) वक्र (f. क्रा) ; (2) कुटिलः (ला, लं) ; (3) अरालः (ला, लं).

SIP (v.) : (1) उपस्पृशति (स्पृश्, c. 6.) ; (2) आचामति (चम्, c. 1.), *s.s the drops of sweat on your face* : आचामति स्वेदलवान् मुखे ते, R. xiii. 20.

SIP (subs.) : (1) आचमनम् ; (2) उपस्पर्शः. *To take a s.* : v. To sip.

SIPHON : a tube : *क्षेपणी, उत्-.

SIR : आर्यः, *whence have you come, s.* : कुत आर्यः, Mr. ii. ; *remove s.s* : अपसरत आर्याः, Mr. x. Ph. : *"my good s."* : भद्रमुख.

SIRE : I. Of kings : देवः. II. Of holy men : भगवत् (m.). III. Of father : तातः, Vi. IV. Author, creator : q.v.

SIREN : मोह(हि)नी (?).

SIRLOIN : *s.of beef* : गोकटिः (after Bha.).

SIRNAME : v. Surname.

SIROCCO : A WIND : *सौरवातः.

SIRRAH (interj.) : रे, रेरे, अरे, *or* अरेरे.

SISTER : (1) भगिनी (any sort of s.) ; (2) स्वसृ (f. =. : rare), R. ; (3) सहोदरी, सोदर्या *or* सगर्भा (=by the same mother). *Elder s.* : अग्रजा, *Younger s.* : अवरजा, *S.'s son* : (1) भागिनेयः ; (2) स्वस्रेयः (rare). *S.'s daughter* : (1) भागिनेयी ; (2) स्वस्रेयी *or* स्वस्रि(स्री)या (rare).

SISTER-IN-LAW : (1) ननान्दृ (f.) (=husband's sister) ; श्याली (wife's s.) ; (3) प्रजावती *or* भ्रातृजाया (=brother's wife) ; (4) यातृ (f.) (=husband's brother's w.).

SISTERHOOD : I. Lit. : भगिनीत्वम् (?). II. A society : भगिनीवर्गः, भगिनीसमाजः, etc.

SISTERLY : (1) भगिनीसन्निभः (भा, भं) and sim. comp.s. ; (2) by adv. भगिनीवत्, etc.

SIT (v.i.) : I. Lit. : (1) आस्ते (आस्, c. 2.), *s. ting on the altar* : वेदिकायामासीन (f. ना), Ku. iii. 44. ; *s. by* : उपास्ते *or* अन्वास्ते, R. i. 56. ; *s. on or in* : अध्यास्ते, R. vi. 10. ; (2) निषीदति (सद्, c. 1.), *s. when she s.s.* : निषण्णायां निषीदास्याम्, R. i. 89. : v. To sit down. Ph. : *to s. idly* : निष्कर्मन् (mfn.) तिष्ठते *or* sim. शेते (शी, c. 2. : fig.), मयाप्यस्मिन् वस्तुनि न शयानेन स्थीयते, Mr. i. II. As a court : perh. आस्ते, Mit. III. To incubate : q.v. : perh. आस्ते, उपविशति (विश्, c. 6.). IV. To fit. : q.v.

SIT (v.t.) : अध्यास्ते : v. Sit (1).

SIT DOWN : I. To take one's seat : q.v. : उपविशति (विश्, c. 6.), *s. for a moment* : मुहूर्तमुपविशतु, Sa. i. II. In mil. : expr. with तिष्ठति (स्था, c. 1.) : v. Also to besiege.

SIT UP : I. Lit. तिष्ठति (स्था, c. 1.), R. i. 89. II. To watch : जागर्ति (जागृ, c. 2.), *by s. ting up late at night* : रात्रिजागरणात्.

SITE (subs.) : I. Situation, position : (1) सन्निवेशः, *s. of the zenana* : अन्तःपुरसन्निवेशः, D. iii. ; (2) संस्थानम् *or* संस्थितिः. II. Place : भूमिः etc., *with s.s of dwelling houses* : वसतिवेश्ममहीभिः, Ki. ix. 29.

SITTING (subs.) : I. The act : expr. by verb. II. Seat : आसनम्.

SITUATE,-D : (1) निविष्ट (f. ष्टा), सं-, *s. on the banks of the Sarayū* : निविष्टः सरयूतीरे, Ram. ; (2) अवस्थित (f. ता) ; (3) संस्थित (f. ता) ; (4) -स्थ (f. -स्था) in comp.

SITUATION : I. Location : (1) निवेशः, -नम्, सं- ; (2) संस्थानम् *or* अवस्थानम् (स्थितिः). II. Post, employment : q.v. : पदम्.

SIX : षष्, *s.-faced* : षण्मुख (f. खी) ; *s. oxen* : षड्गवम् ; *with the remaining s. lotuses* : षड्भिः शेषपद्मैः, Li. ; *and s. were seen in the thread* : दृष्टं षट्कञ्च सूत्रे, Li. 24.

SIXTEEN : षोडशन्, *S.-th.* : षोडशः (शी, शं), *s.-fold* : षोडशगुणितः (ता, तं), Li.

SIXTH : (1) षष्ठ, (f. ष्ठी), *with a third, one-fifth, and a s.* : त्र्यंशपञ्चांशषष्ठैः, Li. 23. ; *he was s. in descent from the moon* : सोमाद्बभूव षष्ठोऽयम्, Mah. v. 139. 3. ; (2) षाष्ठ (f. ष्ठी) (rare). *S.-ly* : षष्ठतः.

SIXTIETH : षष्टितमः (मी, मं), "षष्टितमोऽध्यायः", Mah.

SIXTY : षष्टिः, *of s.-two and half* : सार्धद्विषष्टेः, Li. ; *s.-first* : एकषष्टितमः (मी, मं) *or, rarely* एकषष्ट (f. ष्टी), S.k. ; *s.-nine* : ऊनसप्ततिः, एकोनसप्ततिः, *or* rarely नवषष्टिः, एकान्नसप्ततिः.

SIZE (subs.) : मानम्, प्र-, परि-, *what is its s.* : यत्प्रमाणमिदम्, V. p. ii. 2. 3. : *of great s.* : अतिप्रमाण (f. णा), K. ; *befitting their s.* : स्वप्रमाणानुरूप (f. पा), Sa. i. : v. Also shape, extent, measure.

SIZED : big-s. : बृहत्प्रमाण (f. णा) : v. Size.

SKATE (subs.) : I. A fish : शंकुः, शङ्कुचिः, *or* शङ्कोचः. II. An ice-shoe : no equiv. : *नीहारपादुका, -नाली.

SKATE (v.) : *नीहारपादुकया विसर्पति (सृप्, c. 1.).

SKE(A)IN : पञ्जिः (ञ्जी), पिञ्जिः (ञ्जी), प(पि)ञ्जिका.

SKELETON : I. Lit. : (1) कङ्कालः, *mules reduced to s.* : कङ्कालशेषाः खराः, U. iii. 42. ; (2) अस्थिपञ्जरः, A. II. Fig., outline : गठनम् (??).

SKETCH (v.) : आलिखति (लिख्, c. 6.) : v. To draw, portray.

SKETCH (subs.) : per पाण्डुलेखः, -लेख्यम् ; चित्रारम्भः. (in drawing : ?), R. ii. 31. : v. Also plan, description.

SKEWER : I. Subs. : शलाका. II. Verb. : शलाकया बध्नाति (बन्ध्, c. 9.). : v. To fasten.

SKIFF : तरणी : v. Boat.

SKILFUL, SKILLED : (1) कुशलः (ला, लं), *I am s. in breaking and treating horses* : कुशलोऽस्म्यश्वशिक्षायां तथैवाश्वचिकित्सिते, Mah. iv. 2. 4. ; (2) निपुण (f. णा), *s. in conversing about mythological and historical anecdotes* : पुराणेतिहासकथालापनिपुणः, K. ; (3) विचक्षण (f. णा), *must be a s. master of horses* : ध्रुवं हयज्ञो भविता विचक्षणः, Mah. iv. 3. ; (4) प्रवीण (f. णा), *s.in painting, bold in gambling* : चित्रकर्मणि प्रवीणः, द्यूतव्यापारे प्रगल्भः, K. ; (5) पटु (f. also ट्वी) ; (6) विशारदः (दा, दं) ; (7) चतुरः (रा, रं) (=shrewd) ; (8) दक्ष (f. क्षा =dexterous) ; (9) प्रौढ (f. ढा), प्रगल्भ (f. ल्भा), विदग्ध (f. ग्धा), पेशल (f. ला) (poet.=well up) ; (10) अधीतिन् (f. नी) *or* पठितिन् (f. नी) (=well-read) ; (11) भद्र (f. द्रा=good) ; (12) अभिज्ञ (f. ज्ञा=knowing) ; etc. N.B. (1) to (11) are cons. with loc., or rarely with dat., or inf. and (12) with gen. They are all used in comp.

SKILFULLY : (1) कुशलम् ; (2) निपुणम् ; (3) चतुरम् ; (4) सपाटवम् ; (5) कौशलेन, etc.

SKILFULNESS, SKILL : (1) कौशलम्, *greatest s.* : परं कौशलम्, K. ; (2) नैपुण्यम्, *s. in stirring anecdotes* : चित्रकथानैपुण्यम्, D. ; (3) पाटवम्, *s. in riding elephants, horses, and other animals* : मातङ्गतुरङ्गादिवाहनारोहणपाटवम्, D. ; (4) प्रावीण्यम्, *not so much with their s.* : न तथोभयोः प्रावीण्येन, R. xv. 6. ; (5) वैचक्षण्यम् ; (6) निपुणता ; (7) चातुर्यम् (=cunning) ; (8) दाक्ष्यम् (=dexterity) ; (9) अभिज्ञता (=knowledge) ; etc.

SKIM (v.) : I. To remove the scum : फेनं गालयति (c. of गल्) *or* स्रावयति, वि- (c. of स्रु), *or* निर्हरति (हृ, c. 1.) (with gen.) ; II. To pass over gently : perh. परिसर्पति (सृप्, c. 1.).

SKIMMER : (1) झर्झरम्, -री, Bha. ; (2) खजा (a. ladle), Mah.

SKIM-MILK : घोलम्, "घोलं तु मथितं तक्रम्", Bha.

SKIN (subs.) : (1) चर्मन् (n.) (=animal), *covering with a tiger -s.* : व्याघ्रचर्मणा प्रच्छाद्य, H. iii. ; *splitting of the s.* (a disease) : चर्मदलम्, Bha. ; (2) त्वच् (f.) (general), *and of a serpent when the s. is cast off* : फणावतश्च त्वचि विच्युतायाम्, Ki. xvii. 45. ; *clad in the pure s. of Ruru, he…* : त्वचं स मेध्यां परिधाय रौरवीम्, R. iii. 31. ; *reduce to mere s. and bones* : त्वगस्थिमात्रशेषः (षा, षं) ; (3) अजिनम् (=hide), *s. of an elephant* : गजाजिनम्, Ku. v. 67. ; (4) दृतिः (=leather : rare) ; (5) poet. by deriv., *in a sheath of goat -s.* : पाञ्चनखे कोषे, Mah. 42. 14.

SKIN (v.) : I. To remove the s. : चर्म *or* त्वचम् अपोहति (ऊह्, c. 1.) etc. (with gen.). *S.ned* : वि- *or* अप-लोमत्वच् (mfn.), D. viii. II. Of wounds etc. : *a wound s.s over* : व्रणस्योपरि चर्म जायते.

SKIN-DEEP : चर्मगतः (ता, तं) : v. Superficial.

SKIN-FLING : बद्धमुष्टि (mfn.) : v. Miser, miserly.

SKINNY : चर्मभूतः (ता, तं) (?) : v. Lean, withered.

SKIP (v.) : प्लवते (प्लु, c. 1.) : v. To leap, frisk, omit.

SKIP,-PING (subs.) : प्लुतम् : v. Leap.

SKIRMISH : I. Subs. : डिम्बः, -आहवः. II. Verb : expr. by subs.

SKIRT (subs.) : (1) प्रान्तः : v. Border ; (2) दशा (of a garment).

SKIRT (v.) : expr. by subs. : v. To adjoin ; border.

SKITTISH : (1) चपल (f. ला) : v. Wanton ; (2) कातर (f. रा) : v. Timid.

SKITTISHNESS : (1) चपलता : v. Wantonness ; (2) कातर्यम् : v. Timidity.

SKITTLES : a play : *नवगुटिका.

SKULK (v.i.) : निभृतं तिष्ठति, (स्था, c. 1.) : v. To lurk, hide.

SKULL : (1) कर्परः ; (2) कपाल (mn.), *the old necklace of Brahmā's s.s* : पुरातनीं ब्रह्मकपालमालाम्, Ku. xii. 17. ; *a s. for begging* : भिक्षाकपालम्, K. ; (3) शिरोऽस्थि (=as capitis) ; (4) करोटिः (=3), Vi. v. 19.

SKULL-CAP : (1) शिरस्कम् ; (2) शिरस्त्रम् ; etc.

SKUNK : an animal : *गन्धवीरः.

SKY : (1) नभस् (n.), *s. -blue* : नभस्तलश्यामः (मा, मं), R. xviii. 6. ; *quickly descending from the*

s.ies : नभोविभागात्सरसावतीर्य, N. iii. 1. ; *thunder fell from a cloudless s.* : पपात वज्रं नभसो निरभ्रकात्, Ku. xv. 20 ; (2) व्योमन् (n.), *s. -touching* : व्योमस्पृश् (mfn.), Si. iv. 31. ; (3) आकाशः, *picturesque scene drawn in the s.ies without any foundation* : आकाशे रचितमभित्ति चित्रकर्म, Si. iv. 53. ; (4) गगनम्, *residents of the s.* : गगनसदः, Si. iv. 53. ; (5) अन्तरि(री)क्षम्, *then a voice from the s. loudly proclaimed* : अथान्तरिक्षे वागुच्चैः प्राह, V.p. v. 28. 21. ; (6) अम्बरम्, *s. lighting* : अम्बरविकाशिन् (f. नी), Si v. 3. ; (7) खम्, *ambling in the s.* : खे खेलगामी, Ku. vii. 49. ; (8) द्यौः (=heaven : q.v.), *s.-bird* : द्युपक्षी, Ku. xv. 14. ; (9) विहायस् (n.) ; (10) वियत् ; (11) गीर्वाणवर्त्म, K., Ki. v. 17. and sim. comp.s. (poet.).

SKYEY : आकाशनिभः (भा, भं = like the sky) ; (2) दिव्य (f. व्या = heavenly.)

SKYLARK : भरद्वाजः : v. Lark.

SKYLIGHT : *आकाशप्रकाशः : v. Window.

SLAB : शिला (= stone : q.v.).

SLACK (adj.) : शिथिल (f. ला), *with the bow-trings s.* : शिथिलज्याबन्ध (f. न्धा), Sa. ii. 6. ; (2) श्लथ (f. था), वि-, परि-, *with the ties s.* : श्लथबन्ध (f. न्धा)., V.t. : v. Also loose, slow.

SLACK,-EN (v.) : I. Trans : (1) शिथिलयति, *I shall not s. the opportunity of serving* : नाहं सेवावसरं शिथिलयिष्ये, Sa. iii. ; (2) श्लथयति (nomi.) ; (3) शिथिलीकरोति, *s.ed his hopes about the life of his father* : पितरि जीविताशां शिथिलीकरोति, K. ; (4) श्लथीकरोति. II. Intrans. : (1) शिथिलायते ; (2) शिथिलीभवति, *tie the s.ed dress* : शिथिलीभूतमाकलय दुकूलम्, K.

SLACKLY : (1) शिथिलम्, Sa. ii. 9. ; (2) श्लथम्, R. v. 69. ; (3) शैथिल्येन.

SLACKNESS : (1) शिथिलता, -त्वम् *or* शैथिल्यम्, *from s. of memory* : स्मृतिशैथिल्यात्, Sa. vii. ; (2) श्लथता, वि-, परि- (rare).

SLAG : मलम् : v. Dross.

SLAIN (adj.) : हत (f. ता), नि- etc. : v. To kill, slay.

SLAKE (v.) : I. To quench, extinguish : q.v. : प्रशमयति (c. of शम्). II. घोलयति, *refine sugar s.ed in cold water* : जलेन शीतलेनैव घोलिता शुभ्रशर्करा, Bha. III. To go out, be extinguished : q.v. : प्रशाम्यति (शम्, c. 4.).

SLAM : v. Bung.

SLANDER (subs.) : अपवादः : v. Scandal, calumny, accusation.

SLANDER (v.) : अपवदति (वद्, c. 1.) : v. To defame, calumniate, accuse.

SLANDERER : (1) असूयक (f. यिका) : v. Detracter ; (2) अपवादक (f. दिका), : v. Accuser.

SLANDEROUS : (1) by comp. ; (2) परिवादिन् (f. दिनी) ; (3) परिवादगर्भ (f. र्भा) ; (4) व्यपवादकर (f. री) ; (5) सापवाद (f. दा) ; (6) आक्षारिन् (f. णी).

SLANDEROUSLY : (1) सापवादम् ; (2) सासूयम् ; (3) परिवादगर्भम्.

SLANG : (1) प्रलापः (देशभाषारूपं लुप्तवर्णमधिकवर्णं कचिद्विकृतवर्णञ्च पदजातम्), Mah. i. 143. 19. ; *s. of the boatmen* : नाविकप्रलापः (?) ; (2) अपभाषा (?).

SLANT,-ING (adj.) : अवसर्पिन् (f. णी) : v. Also oblique.

SLANTINGLY : तिर्यक् : v. Obliquely.

SLAP (subs.) : (1) चपे(पे)टः ; (2) चपेटिका ; (3) चपेटप्रहारः.

SLAP (v.) : (1) चपेटेन हन्ति (हन्, c. 2.), प्रहरति (हृ, c. 2.), आयतं छिनत्ति (छिद्, c. 1.), etc. : v. To strike.

SLASH (v.) : I. Lit. : आयतं छिनत्ति (छिद्, c. 7.) *or* निकृन्तति (कृत्, c. 7.). II. Fig. : chiefly in s.ing : अरुन्तुद (f. दा), *when the mind is s.ed* : गाढं क्षते मनसि, Ni.

SLASH (subs.) : (1) आयतच्छेदः ; (2) महाच्छेदः ; (3) अतिच्छिन्नम्, Ni.

SLATE : *शिलाटः.

SLATE : (Adj.) *शैलाटः, -कः : v. Also tiler.

SLATTERN : v. Slut.

SLAUGHTER : (subs.) : (1) विशसनम्, *vast s.* : घोरं विशसनम् ; (2) कदनम्, *the s.er of innocent Kshatriyas* : निरपराधराजकुलकदन, Vi. iii. ; (3) घातः (= killing : q.v.), *s. of the army by the enemy* : परैः सैन्यघातः, Mah. vi. 108. 28. ; (4) घातनम्, Ku. xv. 8. ; (5) वैशसम्, *half-s.* : अर्धवैशसम्, Ku. iv. 31. : v. Destruction.

SLAUGHTER (v.) : विशसति (शस्, c. 1.), *a calf has been s.ed* : वत्सतरी विशसिता, U. iv.

SLAUGHTERHOUSE : सू(शू)ना ; *its owner* : सौनिकः.

SLAVE (subs.) : I. Lit. : दासः (f. सी), (*s.s*) *home-bred, bought, got and hereditary* : गृहजात-क्रीतलब्धपारम्परीणाः, Viv. ; *who wishes to make his 's. a free man* : यः स्वं दासमदासं कर्तुमिच्छेत्, N. s. ; *it is s.'s property, the master is not entitled to it* : तद्दासधनं स्वामी नार्हति, Viv. ; *even a free woman married by a s. becomes a s.* : दासेनोढा त्वदासी या सापि दासीत्वमाप्नुयात्, Kat. ; *a born s.* : गर्भदासः (f. सी), Mr. ; *eating female and male s.s* : दासीदासजनं भक्षयित्वा, D. vi. ; *I am your attendant s. with a thousand s. girls* : अहं दासीसहस्रेण दासी ते परिचारिका, Mah. i. 77. 22. II. Fig. (1) दासः ; (2) expr. by वश, *a s. of the passions* : इन्द्रियपरवशः (शा, शं) : v. Give way.

SLAVE (v.) : I. Trans : दासीकरोति, K. II. Intrans. : (1) दासायते. (nomi.) ; (2) दास्यं *or* दासकर्म करोति.

SLAVER (subs.) : I. A slave-merchant : दासवणिज् (m.) (?). II. A slave-ship : दासवहनपोतः, etc. (?). III. Saliva : q.v. : लाला.

SLAVER (v.) : लालायते (nomi.) ; by phrases.

SLAVERY : (1) दास्यम् ; (2) दासत्वम्, -ता ; (3) दासभावः, etc.

SLAVE-TRAFFIC, SLAVE-TRADE : दासविक्रयः.

SLAVISH : (1) दास- in comp. : v. Servile ; (2) by adv. दासवत्.

SLAVISHLY : दासवत् (lit. and fig.).

SLAVISHNESS : expr. by circumlo. : v. Servility.

SLAY (v.) : (1) मारयति (c. of मृ) : v. To kill ; (2) शातयति (c. of शद्), "तदानीकमशातयत्", Mah. vii. 157. 27. : (3) विशसति (शस्, c. 1.) : v. To slaughter ; (4) सूदयति, वि-, विनि- (सूद्, c. 10.), *s.ing many animals* : सूदयन् विविधान् मृगान्, Mah.

SLAYER : (1) विशसितृ (f. त्री) ; (2) by subs. in comp., *s. of Madhu* : मधुसूदनः ; *s. of Bala* : बलनिसूदनः, R. ix. 3. : v. Also killer.

SLEDGE : No equiv. : *श्लक्ष्णयानम्, श्लाक्ष्णम्.

SLEDGE-HAMMER : (1) मुद्गरः ; (2) महाघनः.

SLEEK : श्लक्ष्ण (f. क्ष्णा) : v. Smooth, glossy.

SLEEP (subs.) : (1) निद्रा, *overtaken by s.* : निद्रया गृहीतः, Va ; *I was overpowered with s.* : निद्रया परामृष्ये, D. ; *to go to s.* : निद्रां याति *or* गच्छति, K. ; *to break s.* : निद्रां भनक्ति *or* भिनत्ति, Ma. n. ; *does not s. comes to us today* : आवयोर्निद्राद्य किमु नोपसरते, N. ; *was sent to long s.* (i.e. death) ; दीर्घनिद्रां प्रवेशितः, R. xii. 18. ; *without having s.* : अनुपजातनिद्र (f. द्रा), K. ; *very sound s.* : अतिपक्वनिद्रा, D. ; *dead s.* : घोरनिद्रा, K. ; *aroused from s.* : विनिद्र (f. द्रा), B. ; (2) rarely स्वप्नः, स्वापः, *or* सुप्तिः, *in s.* : स्वप्ने, D. ; *fond of s.* : प्रियस्वप्न (f. प्ना), K. xii. 81. ; (3) शयनम्, *went to s.* : शयनमगमत्, Ram. ii. 92. 24.

SLEEP (v.) : (1) स्वपिति, प्र-, अव-, सम्-, (स्वप्, c. 2.) (lit. and fig.), *I will go and s. in the gatehouse* : द्वारशालायां गत्वा स्वप्स्यामि, Mr. ; *s.ing at proper time* : यथाकालं स्वपन्, R. ; (2) निद्राति (द्रा, c. 2.), *slept pressing each other* : पीडनं विदधतौ निदद्रतुः, N. ; (3) निद्रायते, (nomi.), Mah. ; (4) शेते (शी, c. 2.) (prop.=to lie down) (lit. and fig.), *s.ing calmly* : विश्रब्धं शयानम्, Mah. ; *I will not be s.ing over it* : मयास्मिन्वस्तुनि शयानेन न स्थीयते, Mu. ; *s.ing with the face down* : अवमूर्द्धशयः, S. k. ; (5) संविशति (विश्, c. 6.) (=शेते), *shall s. on the left side* : वामपार्श्वेन संविशेत्, Sr.

SLEEP-PRODUCING : (1) स्वापन (f. नी), प्र-, R. vii. 61. ; (2) निद्राजनन (f. नी) *or* -जनक (f. निका), M. n. ; (3) निद्राकर (f. री) ; and sim. comp.s.

SLEEPER : I. Lit. : (1) expr. by verb ; (2) निद्रालु (mfn.) ; (3) शयालु (mfn.). II. A beam : *संवेशतुला.

SLEEPILY : (1) सनिद्रम्, Si. xi. 18. ; (2) expr. by adj. निद्रावशः (शा, शं), निद्राभिभूतः (ता, तं).

SLEEPINESS : नैद्रतन्द्रा : v. Sleep, sleepy.

SLEEPING (subs.) : शयनम् ; (2) rarely स्वापः, सुप्तिः, *or* स्वप्नः.

SLEEPING-DRAUGHT : निद्राजनकमौषधम् (see Bha. on "निद्रानाशः").

SLEEPING-HOUSE : (1) शयनगृहम् ; (2) स्वप्ननिकेतनम् and sim. comp.s (rare), B. xi. 17.

SLEEPING-PARTNER : भोगसहकारिन् (f. णी).

SLEEPLESS : (1) नष्टनिद्र (f. द्रा), and sim. comp.s, *passed the night s. ly* : उत्सन्ननिद्रा क्षपां क्षपितवती, K. ; (2) निर्निद्र (f. द्रा : rare). N.B. विनिद्र and उन्निन्द्र are commonly applied to *awaking after sleep.*

SLEEPLESSNESS : (1) निद्रानाशः (as a disease), Bha. ; (2) निर्निद्रता ; (3) निद्राभावः and sim. comp.s.

SLEEPY : I. Inclined to sleep : (1) निद्रावशः (शा, शं) ; (2) निद्राभिभूतः (ता, तं) ; (3) निद्रा-परतन्त्र (f. न्त्रा), M. n. ; (4) निद्राविधेयः (या, यं), R. vii. 62. ; and sim. comp.s. Ph. : *to feel s.* : (=wish to sleep) : (1) सुषुप्सति ; (2) शिशयिषते, Si. xi. 22. ; (3) निदिद्रासति, Si. xi. 4. II. Causing sleep : निद्राप्रद (f. दा), Bha.: v. Sleep-producing. III. Belonging to sleep : नैद्र (f. द्री), "नश्यन्नैद्रतन्द्रः" Si. xi. 5.

SLEET : Perh. तुषारवर्षः.

SLEEVE : (1) पिप्पलः (?), Wilson ; (2) आस्तरणम् (? ; comp. Astin). Ph. : *to laugh in one's s.* : अन्तर् हसति (हस् , c. 1.) : v. To laugh.

SLEIGH : no equiv. : *श्लक्ष्णयानम् ; श्लाक्ष्णम्.

SLEIGHT : *s. of hand* : perh. हस्तलाघवम् : v. Also jugglery.

SLENDER : (1) तनु (f. also न्वी), प्र-, *a s. girl* : तन्वी, R. vi. 25. ; *a s. plant* : तन्वी लता, R. xiii. 32. ; *having s. command of language* : तनु-वाग्विभव (f. वा), R. i. 9. ; *to make s.* : तनू-करोति, R. vi. 80. ; (2) कृश (f. शा), परि-, *having a s. belly* : कृशोदर (f. री), Ku. v. 42. ; *having s. limbs* : कृशाङ्ग (f. ङ्गी), N. iii. 11. ; *by s. results* : कृशेन फलेन, Sa. vi. 11. : v. Also small, feeble.

SLENDERLY : (1) तनु, प्र- ; (2) कृशम्, परि- ; (3) by adj. : v. Also little.

SLENDERNESS : (1) तनुता, -त्वम्, Ku. iv. 13. ; (2) कृशता, -त्वम्, परि- ; (3) कार्श्यम्, परि- ; (4) तानवम् (rare).

SLICE : Subs. : I. खण्ड (mn.) : v. Bit, piece. II. Verb : खण्डीकरोति : v. To cut up.

SLIDE (v.) : I. To glide, move : q.v. : विस-र्पति (सृप् , c. 1.). II. To slip : q.v.

SLIDE, -ING (subs.) : I. The act : विसर्पः, -णम्. II. The place : अवसर्पः *or* विसर्पः. III. In machinery : *विसर्पः.

SLIGHT (adj.) : (1) तनु (f. also न्वी) : v. Slender ; (2) अल्प (f. ल्पा) : v. Little. Ph. : *not the s. est* : न मनागपि : v. Least ; *in a s. degree* : ईषत् : v. Little (adv.).

SLIGHT (v.) : उपेक्षते (ईक्ष् , c. 1.) : v. To disregard, neglect.

SLIGHT (subs.) : उपेक्षा : v. Disregard, neglect, contempt.

SLIGHTER : उपेक्षक (f. क्षिका) : v. Also despiser.

SLIGHTINGLY : (1) सावज्ञम् ; (2) अनादृत्य : v. Contemptuously.

SLIGHTLY : ईषत् : v. Little, somewhat.

SLIGHTNESS : (1) तनुता : v. Slenderness ; (2) अल्पता : v. Smallness.

SLILY : (1) छलेन ; (2) चतुरम् (=cunningly).

SLIM : तनु (f. also न्वी) : v. Slender.

SLIME : श्यानकर्दमः and sim. comp.s. : v. Mud.

SLIMINESS : (1) श्यानता ; (2) चिक्कणता : v. Slimy.

SLIMY : (1) श्यान (f. ना) ; (2) चिक्कण (f. णा= glossy) ; (3) पङ्किल (f. ला=muddy).

SLING (subs.) : I. For throwing : (1) गोफणा (?), Wilson ; (2) दोला (? : used in Bengalee). II. For bandage : *श्लथालम्बः.

SLING (v.) : I. To throw : q.v. : क्षिपति (क्षिप्, c. 6.). II. To hang : q.v. : उद्बध्नाति (बन्ध, c. 9.).

SLINK : व्यपयाति (या, c. 2.) : v. To creep away, flee.

SLIP (v.i.) : I. Lit. : स्खलति (स्खल् , c. 1.), *her feet s. ping at every step* : पदे पदे प्रस्खलन्ती, K. II. Fig. : स्खलति, प्र-, *letting words s.* : वचनानि स्खलयन्, Ku. iv. 12. : v. Also to fall. *To let s.* : क्षिपति, अव-, (क्षिप् , c. 6.=to throw : q v.), *opportunities s* : क्षिप्तकाल (f. ला), Sa. iii. 27. III To s. off : स्रंसते (स्रंस् , c. 1.), *the Gāṇḍiva s.s off from my hand* : गाण्डीवं स्रंसते हस्तात्, G. i. 30. IV. To s. away : व्यपयाति (या, c. 2.) : v. To escape, flee. V. To s. in : अलक्षितम् आ-विशति, समा- (विश्, c. 6.).

SLIP (v.t.) : I. To let s. : q.v. : क्षिपति (क्षिप्, c. 6.). II. To convey secretly : अलक्षितं ददाति (दा, c. 3.) : v. To put. III. To let loose : q.v. : मुञ्चति (मुच्, c. 6.).

SLIP (subs.) : I. Lit. : (1) स्खलनम् ; (2) स्खलितम्. II. Fig., mistake, fault : q.v. : स्खलनम् *or* स्खलितम्, *how shall I cover this s.* : केनेदं स्खलितं प्रच्छादयामि, K. ; *when there is s. of tongue* : गोत्रेषु स्खलितो यदा भवति, Sa. vi. 4. III. A twig : q.v. : विटपः. IV. Of paper etc. : खण्ड (mn. : ?).

SLIPPER : पादुका : v. Shoe.

SLIPPERINESS : पिच्छिलता : v. Slippery.

SLIPPERY : I. Lit. : पिच्छिल (f. ला), *in the battle-field s. with mud. (formed by) blood* : रणाङ्गने शोणितपङ्कपिच्छिले, Ku. xvi. 50. II. Unstable, uncertain : q.v. : अस्थिरः. III. Of men : चपलः (ला, लं), Sa. ii.

SLIPSHOD : fig. : perh. शिथिल (f. ला= slack).

SLIT : Subs. : दीर्घच्छेदः. II. Verb : दारयति (दॄ, c. 10.) : v. To send.

SLOGAN : क्ष्वेडितम् : v. Shout.

SLOOP : पोतविशेषः.

SLOP (subs.) : I. Water carelessly thrown : expr. by circumlo. II. In pl., common clothes : स्थूलपटः. III. Dirty water : q.v. : अमेध्यं जलम्.

SLOPE (subs.) : (1) अवसर्पिणी भूः, -मिः (=declivity) ; (2) प्रवणः (णा, णं), Wilson ; (3) perh. अवसर्पः.

SLOPE (v.) : I. Trans. : (1) प्रवणीकरोति ; (2) आवर्जयति (वृज्, c. 10.). II. Intrans. : (1) प्रवणीभवति ; (2) अवसर्पति (सृप्, c. 1.).

SLOPING (adj.) : (1) प्रवण (f. णा) ; (2) अवसर्पिन् (f. णी).

SLOPPY (adj.) : पङ्किल (f. ला) : v. Muddy.

SLOTH : I. Idleness : q.v. : तन्द्रा, *sleep, s.* : निद्रा, तन्द्रा, H. i. 33. II. The animal : no equiv. : *तन्द्रावहः.

SLOTHFUL : (1) तन्द्रित (f. ता), *without being s.* : अतन्द्रिता सा, Ku. v. 14. ; (2) तन्द्रालु (mfn.) ; (3) अलसं (f. सा=idle : q.v.).

SLOTHFULLY : (1) by adj. ; (2) तन्द्रया ; (3) आलस्येन (=idly), *or* अलसम् (Si. viii. 7.).

SLOTHFULNESS : (1) तन्द्रालुता ; (2) तन्द्रा (=sloth).

SLOUCHING (adj.) : प्रलम्ब (f. म्बा, =hanging down : ?).

SLOUGH (subs.) : I. Of a snake ; (1) निर्मोकः, *to cast off s.* : निर्मोकं विमुञ्चति, R. xvi. 17. ; (2) कञ्चुकः, *a venomous snake with the s. shorn off* : विगलत्कञ्चुकः पन्नगेन्द्रः, Vi. vi. 53. II. Of a wound : perh. कञ्चुकः *or* कोषः (comp. vernacular). III. A deep miry place : महापङ्कः.

SLOUGH (v.) : स्खलति (स्खल्, c. 1.), *in the third week, it dries and s.s off* : ततस्तृतीये सप्ताहे शुष्यति स्खलति स्वयम्, Bha.

SLOVENLINESS : perh. अव्यवस्था : v. Carelessness, negligence.

SLOVENLY : perh. अव्यवस्थितः (ता, तं) : v. Careless, negligent.

SLOW : (1) मन्द (f. न्दा), *s. motion* : मन्दगतिः, P.h. ; *s. digestion* : मन्दाग्निः, Sr. ; *having s. poison* : मन्दविषः, J. ; *being s. I did not see that my companions would perceive it* : सखीजनोऽप्युपलक्षयतीति मन्दया न लक्षितम्, H. ; *to help s. minds* : मन्दात्मानुजिघृक्षया, K. ; *are not s.* : न मन्दायन्ते, Me. i. 41. ; (2) मन्थर (f. रा), *the s. maid* : मन्थरा, Ram. ; *s. to recognize* : प्रत्यभिज्ञानमन्थर (f. रा), Sa. iv. ; (3) विलम्बित (f. ता=delayed), *quick and s.* : द्रुतविलम्बित-, P.h.

SLOWLY : (1) मन्दम् *or* मन्दं मन्दम्, Me. i. 9. ; (2) मन्थरम्, Ki. iv. 17. ; (3) by comp. ; *s. pressed* : मन्दाक्रान्त (f. न्ता). Ph. शनैः *or* शनैः शनैः, K.

SLOWNESS : (1) मन्दता ; (2) मान्द्यम् ; (3) मन्थरता (rare).

SLOW-WORM : *मन्थरः.

SLUG : v. Snail.

SLUGGARD, SLUGGISH : (1) *तन्द्रालु (mfn.) : v. Slothful ; (2) मन्द (f. न्दा) : v. Slow.

SLUGGISHLY : (1) by adj. ; (2) मन्दम् : v. Slowly.

SLUGGISHNESS : (1) तन्द्रालुता ; (2) मान्द्यम् (slowness) ; (3) जाड्यम् (=stupor).

SLUICE : I. Flood-gate : *रोधद्वारम्. II. Stream : q.v. : प्रवाहः.

SLUMBER : I. Subs. : स्वापः : v. Sleep. II. Verb : स्वपिति (स्वप्, c. 2.) : v. To sleep.

SLUR : I. Subs. : कलङ्कः : v. Stain, disgrace. II. Verb. : कलङ्कयति (nomi.) : v. To soil, pollute, disgrace.

SLUT : (1) अविनीता ; (2) बन्धकी ; (3) दुःशीला ; etc.

SLUTTISH : अविनीत (f. ता) : v. Untidy, careless.

SLY : (1) धूर्त (f. र्ता) : v. Rogue ; (2) चतुर (f. रा) : v. Cunning ; (3) दाम्भिक (f. की) : v. Hypocrite.

SLYNESS : (1) धूर्तता ; (2) चतुरता ; (3) दाम्भिकता : v. Sly.

SMACK (v.i.) : *it s.s of meat* : आमिषगन्धि (mfn.) Sa. : v. To smell, taste.

SMACK (v.t.) : I. To make a sharp noise : आस्फोटयति (स्फुट्, c. 10.). *or* आस्फोटनं करोति. II. To slap : q.v. III. To kiss noisily : perh. रभसेन चुम्बति (चुम्ब्, c. 1.), Ki. ix. 47.

SMACK (subs.) : I. Loud kiss : perh. रभसचुम्बितम्. II. Savour : (1) स्वादः (=taste : q.v.) ; (2) गन्धः (=smell : q.v.). III. Cracking : आस्फोटनम्.

SMALL (adj.) : I. In gen. : (1) क्षुद्र (f. द्रा : not of quantity), *s. craft* : क्षुद्रनौः ; *s. whirlwind* : क्षुद्रनिर्घातः, K. ; *s. enemy* : क्षुद्रारातिः, Ve. iii. ; (2) अल्प (f. ल्पा=little : q.v.), *and my intellect of s. range* : क्व चाल्पविषया मतिः, R. i. 2. ; *at a very s. price* : अल्पीयसा मूल्येन, D. iii. Ph. : *in a s. degree* : ईषत्, : v. Little (adv.), somewhat. II. Of the voice : v. Weak, low.

SMALL (subs.) : perh. क्षुद्रभागः, *s.s* : perh. क्षुद्रवासस् (n.).

SMALLAGE : शाकभेदः ; *भूगर्भा.

SMALLNESS : (1) क्षुद्रता, -त्वम्, *from the s. of woman's nature* : क्षुद्रतया स्त्रीस्वभावस्य, K. ; (2) अल्पता, -त्वम्, : v. Littleness ; (3) नीचता (=lowness).

SMALL-POX : (1) वसन्तः, -रोगः ; (2) शीतला (prob. =goddess of s.), *attacked with s.* : देव्या शीतलयाक्रान्ताः, Bha.

SMALL-TALK : संकथा : v. Chat, conversation.

SMART (adj.) : I. Sharp : q.v. : तीक्ष्ण (f. क्ष्णा), II. Cunning, skilful : q.v. : चतुर (f. रा). III. Witty : (1) रसिक (f. का) ; (2) सरस (f. सा). IV. Elegant, lively : q.v. : प्रफुल्ल (f. ल्ला).

SMART (subs.) : (1) तीव्रवेदना and sim. comp.s. ; (2) शूलम्.

SMART (v.) : expr. by circumlo. : *my heart is s.ing from disgrace* : न्यक्कारो हृदि वज्रकील इव मे तीव्रं परिस्पन्दते, Vi. v. 22.

SMARTLY : (1) तीक्ष्णम् : v. Sharply ; (2) तूर्णम् : v. Quickly ; (3) शोभनम्. : v. Beautifully ; (4) सरसम् (=wittily).

SMART-MONEY : no equiv. : *शूलशोधः *or* शूलधनम्.

SMARTNESS : (1) तीक्ष्णता : v. Sharpness ; (2) लाघवम् : v. Quickness, dexterity ; (3) वैदग्ध्यम् : v. Skilfulness ; (4) रसिकता (=wittiness) ; (5) शोभा : v. Beauty ; (6) वेगः : v. Impetuosity.

SMASH (v.) : (1) मथ्नाति (मन्थ्, c. 9.), *shall I not s. the hundred Kauravas* : मथ्नामि न कौरवशतम्, Ve. i. 15. ; *of s.ing misfortunes* : प्रमाथिनीनां विपदाम्, Ki. iii. 14. ; (2) मृद्नाति, अव-, परि-, सं-, अभि-, (मृद्, c. 9.), *s.ed their armies* : बलान्यमृद्नात्, R. xviii. 5. ; (3) दलयति *or* दालयति, वि-, परि-, (दल्, c. 10.), *s.ed his head* : मूर्द्धानमदालयत्, B. ; (4) पोथयति, अव-, (पुथ्, c. 10.), Mah.

SMASH (subs.) : (1) प्रमाथः ; (2) विमर्दः, -नम् ; (3) दलनम्, परिदलनम्.

SMATTERER : (1) वार्त्तामात्रावबोधिन् (f. नी) ; (2) पल्लवग्राहिन् (f. णी) ; etc.

SMATTERING (subs.) : *s. of knowledge* : (1) वार्त्तामात्रावबोधः, D. ii., and sim. comp.s ; (2) पल्लवग्राहिता.

SMEAR : लिम्पति, वि-, (लिप्, c. 6.) : v. To besmear, annoint. : *s. over*, i.e. to set out : लुम्पति, वि- (लुप्, c. 6.).

SMELL (subs.) : I. The sense : घ्राणम्, *perceivable by s.* : घ्राणग्राह्य (f. ह्या), Par. II. The act : घ्राणम्, आ-, उपा-, *the sense of s.* : घ्राणेन्द्रियम्, K. ; *the faculty of s.* : घ्राणशक्तिः. III. Scent, odour : q.v. गन्धः, *having the s. of fish* : मत्स्यगन्ध (f. न्धा), Mah. ; *s. of wine* : मद्यस्य *or*

मधुमधो गन्धः, Bha. ; *cannot bear even the s. of others* : नान्यस्य गन्धमपि सहन्ते, Si. v. 42.

SMELL (v.t.) : I. Lit. : घ्राति, आ-, उपा-, अभि-, अव- (घ्रा, c. 2.), *I smelt the diffusing scent of a flower* : विसर्पन्तं कुसुमगन्धमभ्यजिघ्रम्, K. II. Fig. गन्धं प्राप्नोति (आप्, c. 5.). (with gen.).

SMELL (v.i.) : expr. with गन्धः, *it s.s of flesh* : इदमामिषगन्धं वाति, Sa. v.; *s.ing like fat* : वसागन्ध (f. न्धा), Ve. iii. ; *strong-s.ing* : उग्रगन्ध (f. न्धा), Bha. *or* उद्गन्धि (mfn. : G. A. 25.); *honey-s.ing* : मधुगन्धिन् (f. नी), Bha. ; *s.ing elephant* : गन्धद्विपः, R. vi. 7.

SMELLING (subs.) : v. Smell. Ph. : *s.-bottle* : *गन्धकूपी.

SMELT (subs.) : मत्स्यविशेषः ; *गन्धमीनः.

SMELT (v.) : विद्रावयति (c. of द्रु) (?) : v. To melt, fuse.

SMELTER : लौहद्रावकः (?) : v. Melter.

SMILE (subs.) : (1) स्मितम्, *with a s.* (i.e. s.ing) : सस्मितम्, D.v. ; (2) विहसितम्, (rare) ; (3) ईषद्धास्यम्, मन्दहासः, and sim. comp.s.

SMILE (v.) : (1) स्मयते (स्मि, c. 1.), *and I s.d a little* : अहञ्च किञ्चिदस्मैषि, D. v. ; *s.d looking at me and went away* : मामभिवीक्ष्य स्मित्वा प्रातिष्ठत, D. ii. ; (2) विहसति (हस्, c. 1.), *said s.ing gently* : मन्दं मन्दं विहस्याब्रवीत्, K. : v. Also to laugh.

SMILE ON : i.e. to favour : q.v. : अनुगृह्णाति (ग्रह्, c. 9.).

SMILING (adj.) : I. Lit. : (1) स्मेरः (रा, रं), Ku. v. 70. ; (2) सस्मितः (ता, तं) ; (3) स्मयमानः (ना, नं), *I replied s.* : मया स्मयमानेनाभिहितम्, D. ii. ; (4) स्मितः (ता, तं), *with a s. countenance* : स्मितमुख (f. खी), D. ii. II. Joyous : प्रफुल्ल (f. ल्ला).

SMILINGLY : (1) सस्मितम् ; (2) विहस्य : v. To smile.

SMIRCH : मलिनयति (nomi.) : v. To soil.

SMIRK : I. Subs. : विकृतं स्मितम्. II. Verb. : expr. by subs.

SMITE (v.) : I. To strike, kill : q.v. : हन्ति (हन्, c. 2.). II. Of love : expr. by मदनबाणहतः (ता, तं) and sim. comp.s, *s.ten by love, I set out for Srāvasti* : अहं पञ्चबाणवश्यः श्रावस्तीमभ्यवर्तिषि, D.v.

SMITH : (1) शिल्पिन् (m.) ; (2) -कारः, in comp., *iron-s.* : अयस्कारः.

SMITHY, SMITHERY : (1) शिल्पशाला ; (2) कर्मशाला, and sim. comp.s.

SMOCK, -FROCK : स्थूलशाटी, -टिका (?).

SMOKE (v.t.) : I. As tobacco : (1) पिबति, (पा, c. 1.), *s.ing a cigar* : परिपीतधूमवर्तिः, K. ; (2) सेवते, (सेव्, c. 1. : habitually), Bha. II. To purify by s. : धूमे(पे)न शोधयति (c. of शुध्) : v. To purify. III. To dry by s. : धूमे(पे)न शोषयति (c. of शुष्) : v. To dry.

SMOKE (v.i.) : धूमा(पा)यते (nomi.), *making the quarters s.* : धूमाययन् दिशः, Mah. iii. 38. 30.

SMOKE (subs.) : I. Lit. : धूमः(पः), *dark like s.* : धूमधूम्र (f. म्रा), R. xv. 16. ; *forming clouds of s.* : धृतधूममण्डलः, Ki. xvi., 59. ; *where there is s., there is fire* : यतो धूमस्ततो वह्निः. II. Fig. : '*ending in s.*' : perh. शून्यगर्भ (f. र्भा).

SMOKELESS : (1) निर्धूम (f. मा) ; (2) विधूम (f. मा), *of s. lustre* : विधूमरोचिः, M.n. on Si i. 2. ; (3) धूमहीन (f. ना) ; and sim. comp.s.

SMOKER : (1) धूमप (f. पा) *or* पायिन् (f. नी) ; (2) धूमसेविन् (f. नी).

SMOKY : I. Smoking : (1) धूमा(पा)यमान (f. ना) ; (2) सधूम (f. मा). II. Full of smoke : (1) सधूम (f. मा) ; (2) धूमावरुद्ध (f. द्धा) ; (3) धूमबहुल (f. ला) ; and sim. comp.s. III. Like s. : (1) धूमाभ (f. भा), and sim. comp.s ; (2) धूम्र (f. म्रा). IV. Smelling or tasting like s. : (1) धूमगन्ध (f. न्धा : of smell) ; (2) धूमस्वाद (f. दा) ; (3) by adv. : धूमवत् : v. To savour.

SMOOTH (adj.) : (1) सम (f. मा=equal, equable, level : q.v.), *although the ground is s.* : भित्तौ समायामपि, Sa. vi. 16. ; *naturally s., glossy, and black* : निसर्गसमस्निग्धनीलः, D. vi. ; (2) श्लक्ष्ण (f. क्ष्णा = glossy), *quieting by s. words* : शान्त्वयन् श्लक्ष्णया वाचा, Mah. iii. 37. 56. : v. Mild, soft.

SMOOTH (v.) : (1) समीकरोति : v. To level ; (S) श्लक्ष्णीकरोति (in other senses) ; (3) श्लक्ष्णयति (nomi. = 2).

SMOOTHLY : (1) समम् ; (2) श्लक्ष्णम् (=softly) ; (3) सुखेन (easily).

SMOOTHNESS : (1) समता ; (2) श्लक्ष्णता (=glossiness, softness) ; (3) शान्तता (=quiet) ; (4) स्वच्छता (=clearness).

SMOTHER (v.) : I. To suffocate : q.v. II. To suppress : q.v. : प्रतिस्तभ्नाति (स्तम्भ्, c. 9.). III. To smash : q.v. : मृद्नाति (मृद्, c. 9.).

SMOULDER : (1) अन्तर् ज्वलति, (ज्वल्, c. 1.) *or* स्फुरति (स्फुर्, c. 1.), *s.ing rage* : अन्तःस्फुरत्कोपानलः, Vi. v. 21.

SMUGGLE : expr. by circumlo., *by s.ing goods* : प्रतिषिद्धानि भाण्डानि निर्हरतः, M. viii. 399. : v. To import, export.

SMUGGLER : expr. by circumlo.

SMUT (subs.) : I. Obscene language : अश्लीलम्. II. मलम्. III. Lamp-black : मसी.

SMUT, SMUTCH (v.) : मलिनयति (nomi.) : v. To soil, blacken.

SMUTTY : (1) अश्लील (f. ला) : v. Obscene ; (2) मलिन (f. ना) : v. Dirty.

SNACK : I. Equal share : q.v. : समांशः : v. Half. II. Hasty repast : लघ्वाहारः, and sim. comp.s.

SNAFFLE : I. Subs. : खलीनम् : v. Bit. II. Verb. : perh. खलीनयति (nomi.) ; खलीनं ददाति (दा, c. 3. : with loc.), P.

SNAIL : I. Lit. ; शम्बूकः. II. Fig. : मन्थर (f. रा).

SNAKE : (1) सर्पः, *s. -sacrifice* : सर्पयज्ञः, Mah. ; *I have been bitten by a s.* : सर्पेणास्मि दष्टः, Mal. iv. ; (2) अहिः (=poisonous s.), *all venomous s.s. are poisonous* : अहयः सविषाः सर्वे, K. s. xiii. 84. ; *s.-catcher* : आहितुण्डिकः, Mu. ii. ; (3) भुजङ्गः, भुजगः *or* भुजङ्गमः, *draws out a s. from the basket* : भुजङ्गमाकर्षति पेटिकायाः, V.t. ; (4) नागः ; (5) पन्नगः ; (6) उरगः ; (7) व्यालः (rare), *s.-catcher* : व्यालग्राही, Mu. ii. Ph. : *extricated himself from the coils of s.* : मोचयामास स्वदेहं भोगबन्धनात्, V.p. v. 7. 42. ; *bending the middle fold of the expanded hood* : आनम्य मध्यमं फणम्, V.p.v. 7. 43. ; *sending forth poison with (their) fangs without interruption* : विषमाशीभिरनारतं वमन्तः, Si. xx. 42.

SNAKE-ROOT : *सर्पौषधिः (?).

SNAKE-WORSHIPPER : नागोपासकः (शेषोपासक : in San. 48, शेष=chief of s.s.).

SNAKY : (1) by comp. ; (2) by सर्पवत् etc. (=like a snake). Ph. : *a s. person* : भुजङ्गः (f. ङ्गी), V.t.

SNAP (v.t.) : I. To strike : (1) स्फोटयति (स्फुट्, c. 10.), *shall not s. (the fingers)* : नास्फोटयेत्, M. iv. 64. ; (2) स्फालयति, आ- (स्फल्, c. 10. : as the bow), *s.ping of the bow-string* : ज्यास्फालनम्, Sa. ii. 4. II. To break up : q.v. : (1) स्फोटयति (c. of स्फुट्) ; (2) त्रोटयति (c. of त्रुट्).

SNAP (v.i.) : I. To break suddenly : त्रुट्यति (त्रुट्, c. 4.). II. To make a sharp sound : कणति (कण्, c. 1.). II. To bark : q. v. : भषति (भष, c. l.) IV. To aim : लक्ष्यीकरोति. V. To bite : q.v. : दशति (दन्श्, c. 1 : with acc.).

SNAP, -PING (subs.) : I. As of fingers : (1) आस्फोटनम् ; (2) मोटनम्. II. As of bows : आस्फालनम् *or* आस्फालितम्. III. Barking : भषितम्. IV. Bite : q.v. : दंशः. V. Sudden breaking : (1) त्रोटनम् ; (2) स्फोटनम्.

SNAP-DRAGON : the game : द्राक्षास्फोटनम्.

SNAPPISH : I. Lit. : दंशनशील (f. ला), and sim. comp.s. II. Peevish : q.v. : कर्कश (f. शा).

SNARE (v.) : पाशे पातयति (c. of पत्) : v. To ensnare.

SNARE (subs.) : (1) पाशः, *to lay s.s* : पाशान् योजयति ; *caught in s.s* : पाशैर्बद्धः, H. i. ; (2) वागुरा, *having fallen into the s.s of bad men* : दुर्जनवागुरासु पतितः, P. i. 3. ; (3) जालम् (=net), *rogues live by s.s* : जालोपजीविनो धूर्ताः, K. s. xxiv. 199. ; (4) उन्माथः (a trap).

SNARL (v.) : (1) भषति (भष्, c. 1.=bark : q.v.) ; (2) घर्घरं गर्जति, (गर्ज्, c. 1.=roll : q.v.) : v. Also to murmur, complain.

SNARLER : (1) भषक (f. षिका) ; (2) कर्कश (f. शा harsh, peevish : q.v.).

SNATCH (v.) : (1) आच्छिनत्ति (छिद्, c. 7.), *s.es away in our presence* : मिषतामाच्छिनत्ति नः, Ku. ii. 46. ; (2) आक्षिप्य गृह्णाति (ग्रह्, c. 9.),

M.n. ; (3) हरति, अप-, (हृ, c. 1.=to rob.) ; (4) मुष्णाति (मुष्, c. 9.=to filch) ; (5) उन्मूलयति (=to uproot).

SNATCH (subs.) : I. Lit. : expr. by verb. II. Fig. : *by s.es* : खण्डशः ; *s.s of moonlight* : कादाचित्कचन्द्रिका (?).

SNATCHING (adj.) : Covetous : q.v. : गृध्नु (mfn.).

SNEAK : छन्नम् अपसर्पति (सृप्, c. 1.) : v. To withdraw, privately.

SNEAKING (adj.) : fig. : कुत्सितवृत्ति (mfn.) : v. Mean, low.

SNEAKINGLY : (1) कृपणवत् ; (2) दासवत् (=servile).

SNEER (v.) : अवहसति (हस्, c. 1. : with acc.) : v. To deride, ridicule.

SNEER, SNEERING (subs.) : अवहासः : v. Derision, ridicule.

SNEERINGLY : (1) सावहासम् ; (2) अवहस्य : v. Derisively.

SNEEZE (v.) : क्षौति (क्षु, c. 2.) ; (2) by subs.

SNEEZE, SNEEZING (subs.) : (1) क्षुतम्, *s. -producer* : क्षुताभिजननः, A. ; (2) क्षवः, -क्षुः, Sr. ; (3) क्षुत् (f.) ; (4) छिक्का ; (5) हक्किः.

SNIFF : v. To inhale, snuff, smell.

SNIP (v.) : I. Lit. : अग्रं *or* अग्रभागं छिनत्ति (छिद्, c. 7.) : v. To cut, tap. II. To pilfer : q.v. : मुष्णाति (मुष्, c. 9.).

SNIPE : the bird : वटेरः, वटेरकः (?).

SNIVEL (subs.) : (1) नासामलम् ; (2) सिंहानम्(णम्) ; सिंघाणम्.

SNIVEL (v.) : I. To run at the nose : expr. by मलं स्रवति (स्रु, c. 1. : with abl. of nose), *s.ing* : नासास्रवः, Sr. II. Whine : क्रन्दति (क्रन्द्, c. 1.) : v. To cry.

SNOB, -BISH : perh. : सभ्यम्मन्य (f. न्या), भद्रमानिन् (f. नी), etc.

SNOOZE : v. Nap.

SNORE (v.) : I. घर्घरायते (nomi.). II. Subs. : *snoring* : घर्घरः, -शब्दः.

SNORT : I. Verb. : फु(फू)त्कारं मुञ्चति (मुच्, c. 6.) : अनवरतपरिस्फुरत्प्रोथपुटोन्मुक्तफुत्कारेणातिजवापीतमनिलमिव नासिकाविवरेणोद्वमन्तम्, K. II. Subs. : फु(फू)त्कारः *or* फु(फू)त्कृतम्.

SNOUT : पोत्रम्, Ki. xiii. 3. Hence a *boar* is पोत्रिन्.

SNOW (subs.) : (1) हिमम्, *the abode of s.* : हिमालयः ; *s.-bound* : हिमसंरुद्ध (f. द्धा), Mat. ; *s.-capped summit* : हिमच्छन्नमहाशृङ्गम्, Mat. ; *the whole surface covered with s.* : हिमानुलिप्तसर्वाङ्ग (f. ङ्गी), Mat. ; *fall of s.* : हिमपातः, Mat. ; *heap of s.* : हिमानी, Ki. iv. 38. ; हिमपुञ्जः, Mat. ; *s.-white* : हिमगौर (f. री) ; Ki. v. 17. ; (2) तुषारः, *flow of s.* : तुषारस्रुतिः, Ku. i. 6. ; *showering s.* : तुषारवर्षी, R. xiv. 84. ; *s.-water* : तुषारजलम्, Ki. ix. 5. ; (3) तुहिनम्, *s.-like* : तुहिनसदृश (f. शी), Mat. ; (4) प्रालेयम्, *s.-cold* : प्रालेयशीत (f. ता), Si. iv. 64.

SNOW (v.) : *it s.s* : हिमं etc. पतति (पत्, c. 1.).

SNOWY : (1) by comp., *s. mountain* : हिमाद्रिः ; *s.-famed* : तुहिनयशस् (mfn.), Mat. 114. 19. ; (2) हैम (f. मी) ; (3) महाहिम (f. मा=very s.) ; (4) हिमवत् (f. ती=having snow) ; etc.

SNUB : perh. पराभवति (भू, c. 1.) : v. Also to chide, censure.

SNUB-NOSE : (1) चिपिटनासा ; (2) नतनासिका. *S.d* : (1) नतनासिक (f. का) ; (2) अवटीट (f. टा) ; (3) अवनाट (f. टा) ; (4) अवभ्रट (f. टा).

SNUFF (subs.) : I. Powdered tobacoo : नस्यम्, *to take s.* : नस्यं गृह्णाति, Bha. II. Burnt candle-wick : perh. छत्रम् ; दग्धवर्तिः.

SNUFF (v.) : I. To inhale, smell : q.v. II. to take out s. : छत्रम् अपनयति (नी, c. 1.). *S. out* : v. To extinguish.

SNUFF-BOX : (1) नस्यधानी ; (2) नस्याधारः ; etc.

SNUFFERS : no prop. equiv. : कर्तरिका.

SNUFFLE (v.) : perh. घुरघुरायते (nomi.), K.

SNUG : I. Compact : q.v. : संहत (f. ता). II. Secret, retired : q.v. : गूढ (f. ढा). III. Comfortable, convenient : q.v.

SNUGGLE : संश्लिष्य शेते (शी, c. 2.) : v. To lie down.

SNUGLY : I. Comfortably : सुखेन. II. Closely : संश्लिष्य. III. Secretly : गूढम्.

SO (interj.) : तिष्ठ *or* तिष्ठ तिष्ठ (from स्था).

SO (adv. conj.) : I. In gen : (1) तथा, *as Vishnu alone is known as the best of men, so the*

sages know me (alone) to be the performer of hundred sacrifices : हरिर्यथैकः पुरुषोत्तमः स्मृतः, तथा विदुर्मां मुनयः शतक्रतुम्, R. iii. 49. ; *not so much before…as* : तथा न पूर्वं…यथा, Ki. viii. 41. ; *so scorched by the rays of the sun* : तथातितप्तं सवितुर्गभस्तिभिः, Ku. v. 21. ; *you should act so that you are not laughed at by men* : तथा प्रयतेथा यथा नोपहस्यसे जनैः, K. ; *let him be entirely so* : तथाविधस्तावदशेषमस्तु सः, Ku. v. 82. ; *be it so* : तथास्तु, Pra. iii. ; (2) एवम्, *as sparks from burning fire are scattered in every direction, so* : …यथाग्नेर्ज्वलतः सर्वा दिशो विस्फुलिङ्गा विप्रतिष्ठेरन्, S. 10. ; *and so of Vishnu* : एवं हरेश्च, Li. 241. ; *my child, it is so or a (mere) joke* : अयीदमेवं परिहासो (वा), Ku. v. 62. ; *don't say so* : मा मैवम्, Mu. i. ; *it is so, but…* : एवमेतत्, किन्तु…, Vi. 6. ; *when the chief of divine sages said so* (i.e. as described above) : एवमुक्तवति देवऋषीन्द्रे, N. v. 37. ; (3) तद्वत् (=in like manner : gen with यद्वत्), S. iii. 3. 9. II. Of degree : expr. by words meaning such : *she is so pretty* : ईदृशं रूपलावण्यम्; *so excellent* : ईदृग्गुणोपेतः (ता, तं), Ki. xi. 41. ; *so insufferable* : ईदृशं सुदुःसहम्, Ki. i. 43. ; *of so great-minded men* : तादृशानां महात्मनाम्, K. N.B. *so great, so little*, is gen. expr. by sim. *such, his erudition is so great* : ईदृशं तस्य पाण्डित्यम् ; *be so good as to…*is expr. by अनुगृह्णाति (=to favour) *or* भद्रतया (=out of goodness) ; *ever so* : v. However. III.=So that : expr. by तथा…यथा, "*were let loose, s. truth be in the field*" : तथा मुच्येरन् यथा भुवि सत्यमाविर्भवति : v. Also provided that.

SO AND SO : अमुकः (की, कं), *of such and such a king, son of s.* : अमुकपुत्रस्यामुकस्य महीपतेः, Vy.

SO-CALLED : नामन्, in comp. : v. Name.

SO FAR : I. With *as* : यावत् (f. ती), *so far as lies in my power* : यावच्छक्तिः, Ka. II. Abs. : एतावत् *or* इयत् (f. ती), *so far and no further* : एतावन्नाधिकम्. III. With *from* expr. with आस्ताम् (=let, alone) *or* दूरतः, *far from seeing* : दूरे तद्दर्शनम्. K. s. 25.31.

SO FORTH : v. So on.

SO LONG : I. Abs. : एतावत्कालम्, and sim. comp.s. II. With *as* or in cor. with *as long as* : expr. by यावत्…तावत्, *so l. as I live, I wish* …यावत् प्राणिमि तावत्…इच्छामि, K.

SO MANY : I. Abs. : (1) इयत् (f. ती) : (2) एतावत् (f. ती). II. With *as many* : (1) तावत् (f. ती) ; (2) तति (in pl. with यति : rare).

SO MUCH : I. Adj. : v. Much, so. II. Adv. : (1) ईदृक् ; (2) एतादृक् ; (3) तादृक् *or* तथा (in cor. with *as* : तादृक् with यादृक् and तथा with यथा), *Arjuna did not regret so m. at the bad omen as for their emptiness* : तेनानिमित्तेन तथा न पार्थस्तयोर्यथा रिक्ततयानुतेपे, Ki. xvii. 40. ; (4) by adj., *those who ask do not feel so m. shame as those who give* : न तादृशी भवति याचमानानां यादृशी ददतां लज्जा, K. Ph. : *so m. the better, the worse for him* : perh. एतत्तावच्छोभनम्, अशोभनमेव.

SO ON, SO FORTH : expr. by -आदि in comp.

SO SOON : I. Abs. : v. So (II). II.=As soon : q.v.

SO SO : I.=Well, well : बाढम्. II. Moderately, passably : q.v.

SO THEN : अतः : v. Then, therefore.

SOAK : (1) मज्जयति, नि- (c. of मस्ज्=sink) : मज्जयित्वा सितापके, Bha. ; (2) स्थापयति (c. of स्था=to put), माषाणां दालयस्तोये स्थापितास्त्वक-कञ्चुकाः, Bha. *S. through* : v. To drench, wet.

SOAP : I. Subs. : *सावनम्. II. Verb. सावनेन मार्ष्टि *or* मार्जयति, परि-, सं-, प्र-, (मृज्, c. 2. and 10.).

SOAPY : I. Soft : q.v. : स्निग्ध (f. ग्धा). II. Sneaking : q.v.

SOAR (v.) : उत्-पतति (पत्, c. 1.) : v. To fly up, rise.

SOB (v.) : फू(फु)त्करोति, *I spoke s.bing* : फुत्कृत्य तमवदम्, K. ii.

SOB,-BING (subs.) : (1) फुत्कारः ; (2) फुत्कृतम् ; (3) गद्गदः.

SOBBINGLY : (1) फू(फु)त्कृत्य ; (2) गद्गदगिरा and sim. comp.s.

SOBER : I. Not addicted to drinking : न पान-प्रसक्त (f. क्ता) and sim. comp.s. II. Not drunk : न मत्त (f. त्ता), क्षीव (f. वा) III.

Calm, quiet q.v. : शान्त (f. न्ता). IV. Grave, sedate : q.v. : धीर, गम्भीर (f. रा).

SOBERLY : I. Calmly, coolly : expr. by adj. : शान्त (f. न्ता). II. Discreetly, gravely : विविच्य. III. Moderately : मितम्.

SOBERNESS, SOBRIETY : I. Temperance : q.v. : संयमः. II. Calmness, gravity : q.v. : धैर्यम्.

SOBRIQUET : उपनामन् (n.) : v. Also nickname.

SOCIABILITY, SOCIABLENESS : (1) सङ्गप्रियता (of men in general) ; (2) मधुरालापिता (=affability); (3) संसर्गार्हता (=fitness to be associated).

SOCIABLE : (1) सङ्गप्रिय (f. या) and sim. comp.s. (=fond of society) ; (2) मधुरालापिन् (f. नी= affable : q.v.) ; (3) संसर्गार्ह (f. र्हा), and sim. comp.s. (=fit to be associated).

SOCIAL : I. Pertaining to society : (1) by comp. ; (2) सामाजिक (f. की). II. Sociable : q.v.

SOCIALIST : *समसंसर्गवादिन् (f. नी), and sim. comp.s.

SOCIETY : I. Association : q.v. : सङ्गः, *fondness for s. of good men* : सत्संगप्रियता, Vi. ii. 22. II. Social union : (1) समाजः ; (2) समवायः. III. For particular purpose : (1) समाजः, *s. of sages* : ऋषीणां समाजः, P. i. ; (2) समितिः, *addressed the s.* : समितिं बभाषे, Bh. xii. 13. ; (3) सदस् (n.), *eloquence in s.* : सदसि वाक्पटुता, H. ; (4) सभा ; (5) समज्या ; (6) परिषद् *or* संसद् (f) ; (7) समित्.

SOCK : *पादावरणम्, and sim. comp.s.

SOCKET : आधारः (=receptacle : q.v.).

SOD : शाद्वलम्, *covered with s.* शाद्वल (f. ला).

SODA : *क्षारकः, *s.-water* : क्षारोदम्.

SODALITY : बन्धुता : v. Fellowship, fraternity.

SODOMITE : (1) पुंसि मैथुनकारिन् (m.) ; (2) पुरुषमेहिन् (m.) : etc.

SODOMY : (1) पुंसि मैथुनम्, M. xi. 68., *or* -गमनम्, V.s. ; (2) पुरुषमेहः, Y. ii. 298. ; (3) गुदमैथुनम्, K.b. ; and sim. comp.s.

SOFA : पर्यङ्कः (a sort of s.) : v. Seat (1).

SOFT : (1) मृदु (f. also द्वी=mild, gentle : q.v.), *s. like the accasia* : शिरीषमृद्वी, Br. vi. 34. ; *s. by nature but still strong* : मृदु प्रकृत्या च ससारमेव च, Ku. v. 19. ; (2) कोमल (f. ला), *soft-feathered bed* : हंसतूलगर्भकोमलशय्या, D. ii. ; *s. style* : कोमला रीतिः, Kav. ix. ; (3) मृदुल (f. ला=1), *s. flower* : मृदुलं पुष्पम्, M.n. ; (4) पेलव (f. वा : rare), Ku. v. 4. ; (5) स्निग्ध (=smooth, glossy : as of s. words) ; (6) श्लक्ष्ण (f. क्ष्णा) : v. Smooth ; (7) मधुर (f. रा) : v. Sweet ; (8) मसृण (f. णा=5), *s. steps* : मसृणचरणपातः, Ma. n. iii. 18. ; *s.mouthed* : मसृणवाणी, Gi. x. 7.

SOFT (adv.) : v. Softly.

SOFTEN : (1) आर्द्रीकरोति (=melt : q.v.), *his heart being softened* : आर्द्रीकृतहृदयः, K. ; (2) expr. by adj. or nomi.

SOFTLY : (1) मृदु ; (2) कोमलम् ; (3) मृदुलम् ; (4) पेलवम् ; (5) स्निग्धम् ; (6) श्लक्ष्णम् ; (7) मधुरम् ; (8) मसृणम् : v. Soft.

SOFTNESS : (1) मृदुलता *or* मार्दवम्, *s. of Brāhmins* : ब्राह्मण्यमार्दवम्, P. ; (2) कोमलता ; (3) मृदुलता ; (4) पेलवता ; (5) स्निग्धता ; (6) श्लक्ष्णता *or* मधुरता ; (7) माधुर्यम् ; (8) मसृणम्.

SOHO (interj.) : हंहो : v. O.

SOIL (subs.) : I. Ground : भूमिः *or* भूः, *good s.* : उत्कृष्टभूमिः, K. ii. p. ; *rich s.* : सारवती भूः, गुणवती भूमिः, Ka. ix. 18., iv. 50. ; *gravelly, stony, snaky s. is no s.* : सशर्करा सपाषाणा सव्याला चेति भूरभूः, Ka. iv. 53. ; *s. whose irrigation does not depend on heaven* : अदेवमातृका भूः, Ka, iv. 52. ; *native s.* : जन्मभूमिः : v. Land, earth. II. Dirt, stain, dung : q.v. : मलम्.

SOIL (v.) : I. To stain, pollute : q.v. : (1) मलिनयति (nomi.), *dust does not s. (it)* : न रजांसि मलिनयन्ति ; (2) कलुषयति. II. To manure : सारं ददाति (दा, c. 3. : with loc.).

SOJOURN : अवतिष्ठते (स्था, c. 1. : v. To reside, stay).

SOJOURN, -ING (subs.) : (1) आस्थानम् ; (2) अवस्थितिः : v. Stay, residence.

SOJOURNER : (1) अवस्थायिन् (f. नी) ; (2) आगन्तुक (f. का=new comer).

SOLACE : I. Subs. : सा(शा)न्त्वनम्, -ना : v. Consolation, comfort. II. Verb : शा(सा)न्त्वयति,

: उप-, परि- [शा(सा)न्त्व्, c. 10. : v. To console].

SOLAND or **SOLAN-GOOSE** : हंसविशेषः.

SOLAR : (1) by comp., *s. dynasty* : सूर्यवंशः ; *s. day* : सूर्याहः, Gan. ; *s. rays* : अर्ककिरणाः, Vi. ; (2) सौर (f. री) ; (3) सावन (f. नी).

SOLDER : I. Verb : संदधाति (धा, c. 3.). II. Subs. : सन्धिः : v. Also cement.

Veer : I. Intrans. : परावर्तते (वृत्, c. 1.). II. Trans. : परावर्तयति (c. of वृत्) : v. To turn, change.

Vegetable (subs.) : for table : शाक (mn.), *we shall now speak of v.s* : शाकान्यत ऊर्ध्वं वक्ष्यामः, Sr.

Vegetable (adj.) : (1) उद्भिद् (mfn.) ; (2) उद्भिज्ज (f. ज्जा) ; (3) औद्भिद (f. दी), *the v. kingdom is fourfold* : औद्भिदन्तु चतुर्विधम्, C. s. (Sr. uses उद्भिज्ज in a different sense).

Vegetate : I. To grow, come out : q.v. : उद्भिद्यते (pass. भिद्). II. Fig. : perh. शाकवृत्तिमुपजीवति, etc.

Vegetation : I. Germination : उद्भेदः. II. Plants : उद्भिद् (mfn.).

Vehemence : चण्डता, प्र-, उत्-, : v. Sharpness, speed.

Vehement : चण्ड (f. ण्डा), प्र-, उत्- : *v. wind* : चण्डमरुत्, Ki. xvii. 44. : v. Sharp, strong.

Vehemently : (1) चण्डम्, प्र-, उत्- ; (2) by comp. : v. Also sharply, strong.

Vehicle : I. Carriage : q.v. : यानम्. II. Medium : द्वारम्.

Veil (v.) : अवगुण्ठयति (गुण्ठ्, c. 10.), *with the body covered and (head) v.ed* : संवीताङ्गोपगुण्ठित, M. iv. 49. : v. To cover.

Veil (subs.) : अवगुण्ठनम्, *let me remove your v.* ;

अपनेष्यामि तावत्तेऽवगुण्ठनम्, Sa. v.: v. Also cover, screen.

VEIN : I. Animal : (1) शिरा (gen. term) ; (2) धमनी (=artery) ; (3) नाडी. II. Of leaves : शिरा, K. III. Of stones : रेखा *or* लेखा, *full of v.s* : रेखाकीर्ण (f. र्णा), V. m. 82. 4. IV. Fig.: stream, train : q.v. : स्रोतस् (n.). V. Temper : q.v. : स्वगतिः.

VEINED, VEINY : (1) शिराल (f. ला) (?) ; (2) by comp.

VELOCITY : (1) जवः ; (2) वेगः : v. Speed.

VENAL : *v. beauty* : पण्यस्त्री ; *v. prostitute* ; *v. services* : भृतकसेवा ; *v. servant of Minerva* : ज्ञानपण्यो वणिक्, Mal. : v. Also corrupt.

VENALITY : (1) धनभेद्यता ; (2) by circumlo. : v. Also corruption.

VEND : विक्रीणीते : v. To sell.

VENDER : विक्रयकारिन् (f. णी) : v. Seller.

VENDIBLE : विक्रेय (f. या) : v. Saleable.

VENERABLE : (1) पूज्यतम (f. मा) : v. Reverent, respectable.

VENERATE : समभ्यर्चयति (अर्च्, c. 1.) : v. Revere, respect.

VENERATION : अर्चा : v. Reverence, respect.

VENEREAL : *v. disease* : योनिरोगः, Sr. ; *v.* (i.e. aphrodisiac) *treatment* : वाजीकरो विधिः, Bha.

VENESECTION : (1) शिराव्यधः, Sr. ; (3) शिरावेधः.

VENGEANCE : प्रतिहिंसा : v. Revenge.

VENIAL : (1) लघु (f. also घ्वी=light) ; (2) मर्षणीय (f. या=forgivable).

VENISON : (1) मृगमांसम् ; (2) हारिणं मांसम् ; etc.

VENOM : विषम् : v. Poison.

VENOMOUS : सविष (f. षा) : v. Poisonous.

VENT (v.) : विसृजति (सृज्, c. 6.) : v. Emit, throw.

VENT (subs.) : I. In gen. : छिद्रम् : v. Aperture, hole. II. Sale : q.v.

VENTILATE : I. To fan. : q.v. : वीजयति (वीज्, c. 10.). II. To cause air to pass : *the house is well v.d* : वायुप्रसारबहुलं गृहम्. III. To circulate : प्रचारयति (c. of चर्).

VENTILATION : I. Lit. : वायुप्रसारः and sim. comp.s. II. Fig. : प्रचारः.

VENTILATOR : I. A machine : वायुप्रसारिणी (?). II. Publisher : प्रचारक (f. रिका).

VENTRICLE : कोष:(ः) ; *fourth v.* : चतुर्थकोशः.

VENTRILOQUISM : (1) गात्रवाणी ; (2) उदरवाकः.

VENTRILOQUIST : गात्रवादिन् (f. नी) and sim. comp.s.

VENTURE (subs.) : I. Bold undertaking : साहसम्. II. Risk : सङ्कटम्. Ph. : *at a venture* : सहसा : v. Suddenly.

VENTURE : I. To risk : q.v. II. To attempt : q.v. Ph. : *nothing v. nothing gain* : उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः, H. 36.

VENTURESOME, VENTUROUS : साहसिक (f. की) : v. Bold, dangerous.

VENUE : स्थानम् : v. Place.

VERACIOUS : (1) सत्यवादिन् (f. नी) ; (2) सत्यवाच् (mfn.) ; (3) सत्यगिर् (mfn.) ; (4) सत्यशील (f. ला), etc.

VERACITY : (1) सत्यवादित्वम्-, ता ; (2) सत्यभाषणम् ; etc.

VERANDAH : (1) वरण्डः ; (2) निष्काशः.

VERB : (1) धातुः (verbal root), *intransitive v.* : अकर्मको धातुः, Kaṇada ; *although the v. 'to do' is transitive* : यद्यपि कृधातोः सकर्मकत्वमस्त्येव ; (2) क्रिया (conjugated).

VERBAL : I. Oral : (1) वाचिक (f. की), *now I wish to hear the v. message* : वाचिकमिदानीं श्रोतुमिच्छामि, Mu. v. ; (2) वाचनिक (f. की). II. Of words : (1) by comp. ; (2) शाब्दिक (f. की) ; (3) शाब्द (f. ब्दी). III. Literal : q.v.: पदानुपदिक (f. की ?).

VERBALLY : I. Orally : वाचा, and sim. expr.s. II. Lit. : पदानुपदम्.

VERBATIM : (1) पदानुपदम् ; (2) यथाव्याहृतम् ; etc.

VERBENA : सुगन्धितृणविशेषः.

VERBIAGE, VERBOSITY : (1) वाग्विस्तारः ; (2) वाक्प्रपञ्चः ; (3) भूयसी वाक्, Si. ii. 23. ; etc.

VERBOSE : (1) वाग्बहुल (f. ला) ; (2) विस्तीर्ण (f. र्णा=frolics).

VERDANT : (1) हरित (f. ता) : v. Green ; (2) शाद्वल (f. ला) : v. Grassy.

VERDICT : निर्णयः : Decision, opinion.

VERDIGRIS : ताम्रकिट्टम्, ताम्रमलम्, etc.

Verdure : (1) शाद्वः ; (2) शाद्वलता : *v. of* = verdant : q.v.

Verge (subs.) : I. Border, edge : प्रान्तः. II. Rod : दण्डः. Ph. : *on the v. of ruin* : पतनोन्मुख (f. खी) : v. About.

Verge (v.) : I. To incline, slope : q.v. : लम्बते (लम्ब्, c. 1.). II. Fig. : *v.ing on middle age* : मध्यमोपान्ते वयसि वर्तमानयोः, Va.

Verger : (1) दण्डिन् (m.) ; (2) दण्डधरः ; (3) वेत्रिन् (m.).

Verification : (1) by verb ; (2) समर्थनम्, ना : v. Also examination.

Verify : (1) प्रमाणयति (nomi.) ; (2) समर्थयति (nomi.), *I would v. this proverb*··· : इति लोकवादं समर्थयेयम्, D. vi. : v. Also to prove, establish.

Verily : (1) सत्यम् : v. Indeed, truly ; (2) नूनम् : v. Certainly.

Verisimilar, verisimilitude : v. Probable, probability.

Veritable, verity : v. True, truth.

Vermilion ; I. Lit. : सिन्दूरम्. II. Fig. : शोण (f. णा) : v. Red.

Vermilion (v.) : सिन्दूरेण रञ्जयति, अभि-, अनु- (रञ्ज्, c. 10.).

Vermin : कृमिः *or* कृमयः (m. pl.).

Vernacular : I. Adj. : जन्म- in comp. : v. Native, country. II. Subs. : (1) मातृभाषा ; (2) भाषा (when sense is clear).

Vernal : (1) वसन्त- in comp. ; (2) वासन्त (f. न्ती) ; (3) वासन्तिक (f. की) ; etc.

Versatile : I. Unsteady : q.v. : चञ्चल (f. ला). II. Readily applied to various subjects : *of v. genius* : सर्वदक्ष (f. क्षा) : v. Skilful.

Verse : I. Poetry : q.v. : कविता. II. Stanza : श्लोकः. Ph. : *a poem of seven hundred v.s* : सप्तशती. III. Metrical line : (1) चरणम् ; (2) पादः ; (3) पदम्.

Versed : (1) अभिज्ञ (f. ज्ञा) : v. Knowing ; (2) विशारद (f. दा) : v. Proficient.

Versicle : क्षुद्रकविता, and sim. comp.s.

Versification : छन्दोबन्धः ; श्लोकरचना ; and sim. comp.s.

Versifier : (1) कवयितृ (f. त्री) ; (2) पद्यरचयितृ (f. त्री) and sim. comp.s.

Versify : (1) कवयति (nomi.), Bho. ; (2) पद्यं करोति, etc.

Version : authorized *v.* : *परिनिश्चितव्याख्या वृत्तिः : v. Translation.

Vertebra : पृष्ठवंशास्थि (n.) ; (2) मांससन्धिः (?).

Vertebraty,-e : (1) कशेरुमत् (f. ती) ; (2) पृष्ठवंशयुत (f. ता) and sim. comp.s.

Vertex : शीर्षम् : v. Top, summit.

Vertical : I. Upper : q.v. : ऊर्ध्वतन (f. नी). II. Perpendicular : q.v. Ph. : *v. circle* : दृग्वृत्तम् ; *v. parallax* : दृग्लम्बनम् ; *prime v.* : सममण्डलम्, Su.

Vertically : (1) अधोमुखम् ; (2) अवाङ्मुखम् : v. Also perpendicularly.

Vertigo : भ्रमरम् : v. Dizziness.

Very (adj.) : I. Real, actual : q.v. : expr. by adv. सत्यम् etc. II. Same : q.v., *he is the v. man* : अयं सः. III. Emphatic : expr. with एव, *it is the v. same forest* : एतत्तदेव हि वनम्, U. ii. 22. ; *these are the v. same mountains* : एते त एव गिरयः, U. ii. 23. ; *this very day* : अद्यैव, Ve. iv. 1.

Very (adv.) : (1) अति- in comp., *v. scarce* : अतिदुर्लभ (f. भा) ; (2) सु- in comp. (=good), *v. many* (=good many) : सुबहु (mfn.) ; *v. far*, (=good distance) : सुदूरम् ; *v. hot* (=well heated) : सुतप्त (f. प्ता) ; (3) by comp. or super., *v. heavy rain* : बंहीयसी वृष्टिः, Si. iii. 6. ; *v. quick* : क्षेपीयस्, Vi. v. 15. ; *v. swift* : द्रुततर (f. रा), Si. xi. 8. ; *v. big* : विपुलतर (f. रा), Si. xi. 5. : v. Also exceeding, extremely.

Vesicle : perh. कोषकः ; क्षुद्रकोषः ; etc.

Vesicular : I. Lit. : कोषकमय (f. यी). II. Hollow : q.v.

Vesper : I. Evening : q.v. : सन्ध्या. II. Evening star : सायन्तनी तारा.

Vessel : I. A receptacle : (1) पात्रम् ; (2) भाजनम्. II. A ship : q.v. : यानपात्रम्. III. Of the body : नाडिः(डी) : v. Vein, etc.

Vest (subs.) : I. Gen. : वस्त्रम् : v. Garment. II. Spe. : चोलः -ली.

VEST (v.) : I. To clothe : q.v. II. To invest : q.v.

VESTAL : I. Lit. : prob. वास्तव (f. वी : वास्तु =Gr. estia, L. vesta). II. Pure, chaste : q.v.

VESTED (adj.) : as rights : व्यवस्थित (f. ता) : v. Fixed.

VESTIBULE : देहलिः(ली) : v. Also porch.

VESTIGE : चिह्नम् : v. Mark, trace.

VESTMENT, VESTURE : वासस् (n.) : v. Dress, clothes.

VESTRY : भाजनशाला (?) and sim. comp.s.

VETCH : a plant : (1) द्विदलम् ; (2) द्विपत्रम्.

VETERAN : *v. soldiers or v.s* : योधाः परिवृद्धयुद्धाः ; *v. skill* : पक्वकौशलम् ; *v. politician* : अभ्यस्तनीतिशास्त्र (f. स्त्रा), B. xii. 14. com. : v. Experienced, old.

VETERINARY : *v. surgeon* : (1) पशुचिकित्सकः ; (2) शालिहोत्रज्ञो वैद्यः, (a class of), P. v. 10. ; *v. art* : पशुचिकित्सा.

VETO : I. Prohibition : प्रतिषेधः. II. To prohibit : प्रतिषेधयति (सिध्, c. 1.).

VEX : (1) बाधते (बाध, c. 1.) : v. To harass ; (2) कोपयति (c. of कुप्) : v. To enrage ; (3) पीडयति (पीड्, c. 10.) : v. To pain.

VEXATION : कष्टम् : v. Distress ; (2) दुःखम् : v. Pain ; (3) क्लेशः : v. Trouble ; (4) बाधा, (rare).

VEXATIOUS : (1) बाधक (f. धिका) ; (2) कष्टद (f. दा) ; (3) क्लेशकर (f. री) ; etc.

VEXATIOUSLY : expr. by pres. part. or circumlo.

VIAND : अन्नम् : v. Food.

VIATICUM : (1) पाथेयम् ; (2) सम्बलम् (=provisions).

VIBRATE : I. Intrans. : दोलायते (nomi.) : v. To swing, move. II. Trans. : भ्रामयति (c. of भ्रम्) : v. To roll, swing.

VIBRATION : (1) आन्दोलनम् ; (2) दोलायितम् ; (3) स्फुरितम् (?).

VICAR : I. Substitute : प्रतिनिधिः. II. An officer : *अन्वाचार्यः.

VICARAGE : I. Residence : *अन्वाचार्यवासः, etc. II. The benefice : *अन्वाचार्याधिकारः or simp. अधिकारः (when sense is clear).

VICARIOUS : expr. by comp. or gen.

VICE : I. Wickedness : (1) अधर्मः ; (2) पापम् : v. Sin. II. Fault : दोषः : v. Also demerit, passion. III. An instrument : संदंशः. IV. =in the place of : स्थले or स्थाने with gen.

VICE-CHANCELLOR : *उपप्राड्विवाकः ; *अनुधर्मशासकः.

VICEGERENT : प्रतिनिधिः : v. Deputy.

VICEROY : (1) भोगपतिः, (=governor) ; (2) राजप्रतिनिधिः (?) ; etc.

VICEROYAL : expr. by comp. *V. ty* : भोगपतिशासनम् (=government).

VICINAGE : सन्निधानम् : v. Neighbourhood.

VICIOUS : I. Defective, imperfect : q.v. II. Wicked, corrupt. : q.v. : दुष्टः (ष्टा, ष्टं), Mit. III. Unruly : (1) दुष्टः (ष्टा, ष्टं) : *v. elephant* : दुष्टहस्ती, Mr. ii. ; (2) व्यालः (ला, लं), Ki.

VICIOUSLY : (1) दुष्टतया : (2) दुष्टम् ; (3) by circumlo.

VICIOUSNESS : (1) दुष्टता,-त्वम् ; (2) व्यालत्वम्,-ता (of amimals) ; (3) दुर्वृत्तता,-त्वम् (=wickedness).

VICISSITUDE : (1) परिवृत्तिः (=change) ; (2) विपर्ययः (=reverse).

VICTIM : I. Lit. : बलिः : v. Sacrifice, offering. II. Fig. : expr. by verb : v. To destroy, cheat.

VICTIMIZE : उपहारीकरोति : v. To offer, sacrifice.

VICTOR, VICTRESS : (1) जेतृ (f. त्री), वि- (gen. with gen., acc. with acc.), *v. of armies* : विजेतारं सेनाः, Vi. iv. 18. ; (2) जयिन् (f. नी), *the v.s over titans.* : असुरविजयिनः, Vi. ii. ; (3) जिष्णु (mfn. : rare), Si. xii. 3.

VICTORIOUS : (1) वि-जयिन् (f. नी), *v. prowess* : विजयि वीर्यम्, Vi. i. 8. ; (2) जैत्र (f. त्री), *v. hymns* : जैत्रानुवाकान्, Vi. iii. 23. ; (3) जित्वर (f. री : rare) : v. Also to conquer, vanquish.

VICTORIOUSLY : expr. by circumlo.

VICTORY : जयः, वि- ; *to gain a v.* : विजयं प्राप्नोति, Ki. xviii. 43. ; *eager for v.* : जयैषिन् (f. णी),

R. iii. 57. Ph. : *v. to your majesty* : विजयस्व राजन्, Sa. v. ; जय जय जय महाराज, N. xix. 2.

VICTUAL : I. In pl. : खाद्यसामग्री : v. Also food. II. Verb : v. To supply, give.

VICTUALLER : खाद्यद्रव्यविक्रेतृ (f. त्री). and sim. comp.s.

VICTUALLING-HOUSE : खाद्यशाला, and sim. comp.s. (?).

VIE WITH : स्पर्धते (स्पर्ध्, c. 1.) : v. To emulate, rival.

VIEW (subs.) : I. Sight : q.v. : दृष्टिः. II. Prospect, appearance : q.v. : दृष्टिः. III. Opinion, judgment : q.v. : मतम्. IV. Design, intention : q.v. : आशयः. Ph. : *with what v.* : किमुद्दिश्य ; *with this v.* : एतदर्थम्. V. Notion, mind : q.v. : धीः, *of liberal v.s* : उदारधीः (n. धि).

VIEW (v.) : समीक्षते (ईक्ष्, c. 1.) : v. To see, look, descry.

VIEWLESS : (1) अदृष्ट (f. ष्टा=unseen) ; (2) अदृश्य (f. श्या=invisible) ; etc.

VIGIL : (1) जागरणम् ; (2) जागर्या ; (3) जागर्तिः (rare).

VIGILANCE : I. Vigil : q.v. II. Carefulness : q.v. : अवहितत्वम्.

VIGILANT : I. Lit. : जागरूक (f. का). II. Fig. : (1) जागरूक (f. का) ; (2) अवहित (f. ता) : v. Careful.

VIGILANTLY : (1) सावधानम् ; (2) अप्रमादेन ; (3) by adj.

VIGOROUS : (1) तेजस्विन् (f. नी) ; (2) ओजस्विन् (f. नी) ; (3) ऊर्जस्वल (f. ला) : v. Strong, powerful, vehement.

VIGOROUSLY : (1) चण्डम् : v. Vehemently, sharply ; (2) बलवत् ; v. Strongly : (3) तरसा (=speedily).

VIGOROUSNESS : (1) तेजस्विता ; (2) ओजस्विता ; (3) ऊर्जस्वलत्वम् ; (4) वीर्यवत्ता, etc.

VIGOUR : (1) वीर्यम् : v. Strength ; (2) तेजस् (n.) : v. Spirit.

VIKING : v. Pirate.

VILE : अधन्य (f. न्या) : v. Low, base,

VILELY : अधन्यम् : v. Lowly, basely.

VILENESS : अधन्यता, -त्वम् : v. Lowness, baseness.

VILIFICATION : कुत्सनम् : v. Deformation, calumny.

VILIFIER : कुत्सयितृ (f. त्री) : v. Defamer, detractor.

VILIFY : कुत्सयति (कुत्स्, c. 10.) : v. To defame.

VILLA : ग्राम्यं गृहम्, and sim. comp.s (?).

VILLAGE (subs.) : (1) ग्रामः, *head of a v.* : ग्रामाध्यक्षः, V.s. ; ग्रामणीः, M.n. ; *head of ten v.s* : दशाध्यक्षः, V.s.

VILLAGE (adj.) : (1) ग्राम- in comp., *v. priest* : ग्रामयाजकः ; (2) ग्राम्य (f. म्या) ; (3) ग्रामीण (f. णा), *v. women* : ग्रामीणवध्वः, Si. xiii. 37. ; (4) ग्रामीयः (या, यं) ; (5) ग्रामिकः (f. की).

VILLAGER : (1) ग्रामिन् (m.) ; (2) ग्रामिकः ; (3) ग्रामवासिन् (m.) and sim. comp.s ; (4) by adj., *saw v.s drinking spirit* : ग्राम्यानपश्यत् कपिशं पिपासतः, Si. xii. 38. ; *invited by the v.s* : ग्रामीणैर्निमन्त्रिताः, P. v. 5.

VILLAIN : दुर्वृत्त (f. त्ता) : v. Rogue.

VILLAINOUS : दुर्वृत्त (f. त्ता) : v. Roguish, wicked.

VILLAINY, VILLAINOUSNESS : दुर्वृत्तता : v. Roguery, wickedness.

VILLEIN : (1) दासः (=slave) ; (2) प्रजाः (=subject).

VINDICATE : (1) प्रतिपादयति (c. of पद्=establish : q.v.) ; (2) प्रमाणीकरोति (=to prove) ; (3) रक्षति (रक्ष्, c. 1.=defend) ; (4) समर्थयति (अर्थ्, c. 10.=support).

VINDICATION : (1) प्रतिपादनम् ; (2) प्रमाणीकरणम् ; (3) परिरक्षणम् ; (4) समर्थनम्, for dif. : v. To vindicate.

VINDICATOR, -Y : (1) प्रतिपादक (f. दिका) ; (2) परिरक्षक (f. क्षिका) ; (3) समर्थयितृ (f. त्री) ; etc.

VINDICTIVE : प्रतिकारपरायण (f. णा) : v. Revengeful.

VINDICTIVELY : expr. by adj. or circumlo.

VINDICTIVENESS : (1) प्रतिकारपरायणता ; (2) प्रतिजिघांसता ; etc.

VINE (subs.) : द्राक्षा, -लता, *mountain v.* : पर्वतजा द्राक्षा, Bha.

VINERY : द्राक्षागृहम्, and sim. comp.s ?.

VINEGAR (1) शुक्तम्, *v. is digestive* : शुक्तं पाचनम्, Bha. ; (2) चुक्रम् ; (3) शौक्तिकम्.

VINEYARD : (1) द्राक्षावाटिका ; (2) द्राक्षाक्षेत्रम्, etc.

VINOUS : I. Of vine : by comp.s. : *v. spirit* : द्राक्षारिष्टम्, Bha. II. Wine : by comp. : v. wine.

VINTAGE : I. Produce : द्राक्षा. II. Season : द्राक्षाहरणकालः and sim. comp.s.

VINTNER : (1) मद्यविक्रेतृ (f. त्री) and sim. comp.s. ; (2) शौण्डिक (f. की=caste).

VIOLATE : I. To transgress, break : q.v. : लङ्घयति, उत्- (लङ्घ्, c. 10.). II. To ravish, defile : q.v. : धर्षयति, (धृष्, c. 10.).

VIOLATION : I. Transgression : q.v. : (1) लङ्घनम्, उत्- ; (2) व्यतिक्रमः ; (3) भङ्गः (=breach). II. Defilement, rape : q.v. : धर्षणा.

VIOLATOR : I. Transgressor : उल्लङ्घक (f. ङ्घिका). II. Defiler : q.v. : धर्षक (f. र्षिका).

VIOLENCE : I. Force, strength : q.v. : बलम्. II. Vehemence, speed : q.v. : तरस् (n.). III. V. to chastity : बलात्कारः. IV. Any outrage : (1) साहसम्, *highest v.* : उत्तमं साहसम्, N.s. ; *one who abets v.* : यः साहसं कारयति, Y. ; (2) सहोबलम् (rare), Mit.

VIOLENT : I. Vehement : प्रचण्ड (f. ण्डा) ; (2) उग्र (f. ग्रा) : v. Sharp. ; (3) गाढ (f. ढा) : v. Deep ; (4) गुरु (f. also र्वी) : v. Heavy; (5) प्रबल (f. ला) : v. Strong, powerful. II. Outrageous : साहसिक (f. की). Ph. : *v. end* : दारुणः परिणामः ; *v. death* : अपघातः.

VIOLENTLY : चण्डम् : v. Vehemently ; (2) प्रचण्डम् ; (3) प्रसभम् ; (4) उग्रम् : v. Sharply ; (5) अतीव ; v. Exceedingly.

VIOLET (subs.) : I. The flower : पुष्पविशेषः. II. A colour : नीललोहित (f. ता ?).

VIOLIN : (1) सा(शा)रङ्गी ; (2) पिनाकी.

VIPER : दण्डशूकः (lit. and fig. ; ?).

VIRAGO : I. A female warrior : स्त्रीयोधी. II. A vixen : q.v.

VIRGIN (subs.) : (1) कुमारी ; (2) कन्या (=girl).

VIRGIN (adj.) : I. Lit. : (1) by comp. ; (2) कौमार (f. री : rare). II. Fig. : शुद्ध (f. द्धा), वि- : v. Chaste, pure.

VIRGINITY : (1) कौमारम्, *he who deprived my v.* : यः कौमारहरः, Kav. ; (2) कुमारीत्वम् ; (3) कन्यात्वम्.

VIRGO : the sign : कन्या, -राशिः.

VIRILE : (1) पुरुष- in comp. ; (2) पौरुष (f. षी) ; (3) पौरुषेय (f. यी).

VIRILITY : पुंस्त्वम् ; (2) पुरुषत्वम् ; (3) पुंशक्तिः ; etc.

VIRTUAL : (1) वास्तव (f. वी) ; (2) वास्तविक (f. की) ; (3) by adv.

VIRTUALLY : (1) वस्तुतः ; (2) यथार्थतः (=really, truly : q.v.).

VIRTUE : I. In gen : (1) धर्मः, *v. and vice* : धर्माधर्मौ, Par. 161. ; *riches alone (will be) the show of all v.s* : धनमेवाशेषधर्महेतुः, V. p. iv. 24. 22. ; (2) पुण्यम् (as opposed to sin.). II. Excellence, merit : q.v. : गुणः. III. Strength, power : q.v. : शक्तिः.

VIRTUOUS : I. Of men : (1) धार्मिक (f. की) ; (2) कर्मशील (f. ला) ; (3) साधु (f. also ध्वी= good) ; (4) पुण्यात्मन् (mfn.) ; etc. Ph. : *a v. woman* : सती : v. Chaste. II. Of acts etc. : (1) धर्म्य (f. र्म्या) ; (2) पुण्य (f. ण्या) ; (3) साधु (f. also ध्वी) ; etc.

VIRTUOUSLY : (1) धर्मतः ; (2) धर्मेण ; (3) धर्मानुसारेण ; etc.

VIRULENCE : (1) कटुता : v. Bitterness ; (2) उग्रता : v. Sharpness.

VIRULENT : (1) उग्र (f. ग्रा) : v. Sharp ; (2) कटु (mfn.=bitter).

VIRULENTLY : (1) उग्रम् : v. Sharply ; (2) चण्डम् : v. Violently.

VIRUS : विषम् (=poison : q.v.).

VISAGE : (1) आस्यम् : v. Face ; (2) आकारः : v. Countenance.

VISCERA : अन्त्राणि (n. pl.), *to remove the v.* : निरन्त्रयति (nomi.).

VISCID, VISCOUS : (1) श्यान (f. ना) ; (2) सान्द्र (f. न्द्रा) ; (3) शीन (f. ना : rare).

VISCIDITY : (1) श्यानता ; (2) सान्द्रता ; (3) शीनता (rare).

VISIBILITY : (1) दृश्यता ; (2) दृष्टिगम्यता ; (3) दृगोचरता ; etc.

VISIBLE : (1) दृश्य (f. श्या) ; (2) दृग्गोचर (f. रा) ; (3) दृष्टिगम्य (f. म्या) ; etc. : v. To see, sight.

VISIBLY : I. Lit. : प्रत्यक्षम्, प्रत्यक्षतः. II. Apparently : q.v. : प्रकाशम्.

VISION : I. Sight : q.v. : दृष्टिः. II. An apparition : छाया : v. Shade, spectre.

VISIONARY (adj.) : (1) काल्पनिक (f. की) ; (2) अवास्तव (f. वा =unreal).

VISIT (subs.) : (1) साक्षात्कारः ; (2) दर्शनम्, सं- (=seeing) ; (3) अभ्यागमः (=coming).

VISIT (v.) : (1) पश्यति (दृश्, c. 1.) : v. To see. ; (2) अभ्येति (इ, c. 2.) : v. To come ; (3) साक्षात्करोति, *you should be v.ed* : त्वमेव साक्षात्करणीयः, Si. i. 31.

VISITANT, VISITOR : अभ्यागत (f. ता) : v. Guest.

VISITATION : I. Visit : q.v. II. Inspection : परीक्षणम्. III. Of nature etc. (in bad sense): दुर्विपाकः.

VISTA : वीथी : v. Avenue.

VISUAL : (1) दृष्टि- in comp. ; (2) दृष्टिगत (f. ता) ; (3) चाक्षुष (f. षी).

VITAL : I. Lit. : by comp., *v. air* : प्राणवायुः : v. Life, spirit. Ph. : *v. part* : मर्मन् (n.). II. Essential, necessary : q.v.

VITALITY : (1) जीवनम् (=life : q.v.) ; (2) सजीवत्वम् (as of plants) ; (3) स्पन्दितम् (of limbs).

VITALLY : I. Lit. : expr. by circumlo. II. Essentially, particularly : q.v.

VITALS : I. Lit. : मर्माणि (n. pl.). II. Fig. : आलम्बः : v. Support.

VITIATE : दूषयति (c. of दुष्) : v. To corrupt, pollute, destroy.

VITIATION : दूषणम् : v. Corruption, pollution, destruction.

VITREOUS : (1) काचज (f. जा etc.=produced from glass) ; (2) काचमय (f. यी =consisting of glass.) ; (3) काचाभ (f. भा etc.=resembling glass).

VITRIFY : काचीकरोति (?).

VITRIOL : I. Blue : (1) तुत्थम्, -कम् ; (2) वितुन्नकम् (rare). II. Green : (1) कासी(शी)सम् ; (2) पुष्पकम् (rare).

VITUPERATE : आक्षिपति (क्षिप्, c. 6.) : v. To censure, revile.

VITUPERATION : आक्षेपः : v. Censure, reproach.

VIVACIOUS : प्रफुल्ल (f. ल्ला) : v. Lively, active.

VIVACIOUSLY : (1) प्रफुल्लम् : v. Cheerfully ; (2) तेजसा (=vigorously).

VIVACIOUSNESS, VIVACITY : (1) प्रफुल्लता (=cheerfulness) ; (2) तेजस्विता (=vigorousness).

VIVA-VOCE : *v. examination* : मौखिकपरीक्षा.

VIVID : (1) विचित्र (f. त्रा =picturesque) ; (2) विशद (f. दा =clear).

VIVIDLY : विचित्रम् ; (2) विशदम् ; (3) by circumlo.

VIVIFY : जीवयति (c. of जीव्) ; (2) सजीवीकरोति ; (3) जीवनं ददाति (दा, c. 3.).

VIVIPAROUS : (1) जरायुजः (जा, जं), Sr. ; (2) जीवजः (जा, जं), Up.

VIXEN : I. A quarrelsome woman : कलहप्रिया and sim. comp.s II. A she-fox.

VIXENISH : (1) खिङ्गिरी ; (2) खिखिवधूः ; etc.

VOCABLE : (1) शब्दः (=word) ; (2) वचनम् (=term).

VOCABULARY : (1) अभिधानम् ; (2) कोषः ; (3) शब्दार्णवः.

VOCAL : I. Lit. : (1) वाग्विशिष्ट (f. ष्टा) and sim. comp.s (=endowed with voice) ; (2) वाचिक (f. की =oral : q.v.). II. Sonorous : q.v.

VOCATION : (1) वृत्तिः ; (2) व्यवसायः ; (3) कर्मन् (n.) : v. Business.

VOCATIVE : (1) सम्बोधनम् ; (2) सम्बुद्धिः.

VOCIFERATE : उत्क्रोशति (क्रुश्, c. 1.) : v. To shout, cry out.

VOCIFERATION : उत्क्रोशः : v. Noise, shout.

VOCIFEROUS : महाशब्द (f. ब्दा) and sim. comp.s.: v. Noisy, tumultuous.

VOCIFEROUSLY : महाशब्देन : v. Noisily, tumultuously.

VOGUE : व्यवहारः, *words in v.* : व्यवहृताः शब्दाः ; *it is not in v. here* : नात्रैष्यो व्यवहारः ; (2) रीतिः (=fashion).

VOICE : I. In gen. : स्वरः, *the Brahmin's v. has been changed with fear* : भीतिभिन्नस्वरो ब्राह्मणः ; *it seems to be the distressed v. of Mādhavya*, अये माधव्यस्येवार्तस्वरः, Sa. vi. II. Opinion : मतम्, *with one v.* : ऐक्यमत्येन ; *he has no v. in the matter* : न तद्धस्तगतमिदम्. III. In gram. : वाच्यम्, *active v.* : कर्तृवाच्यम् ; *Passive v.* : कर्मवाच्यम् ; *reflective v.* : कर्मकर्तृवाच्यम् ; *neuter v.* : भाववाच्यम्.

VOID (adj.) : I. Empty, vacant : q.v. : शून्य (f. न्या). II. Devoid : q.v. : *v. of anything* : अकिञ्चन (f. ना). III. Null, invalid : (1) निरर्थक (f. का) ; (2) अकिञ्चित्कर (f. रा), असिद्ध (f. द्धा). Ph. : *such a document is v.* : तदप्रमाणं लिखितम्, N. s.

VOID (subs.) : (1) शून्यम् ; (2) रिक्तम् ; (3) शून्यं स्थानम् ; etc.

VOID (v.) : I. To empty : q.v. : शून्यीकरोति. II. To nullify : निष्फलीकरोति. III. To emit, discharge : q.v. : उत्सृजति (सृज्, c. 6.). Ph.: *to v. excrements* : (1) गुवति (गु, c. 6.) ; (2) हदति (हद्, c. 1.).

VOIDABLE : perh. निरसनीय (f. या), विवर्जनीय (f. या), etc.

VOLATILE : I. Passing into air : वायुपरिणामशील (f. ला) and sim. comp.s. II. Fickle : q.v. : चञ्चल (f. ला).

VOLATILITY : I. Lit. : वायुपरिणामशीलता. II. Fickleness : चञ्चलता.

VOLCANIC : expr. by comp.s. or circumlo.

VOLCANO : आग्नेयगिरिः (?), ज्वालामुखः (?) ; and sim. comp.s.

VOLITION : संकल्पः : v. Will.

VOLLEY : वर्षः, *v. of stones* : अश्मवर्षः : v. Shower, discharge.

VOLUBILITY : I. Lit. : चञ्चलता. II. Fluency : q.v. : वाचालता.

VOLUBLE : I. Lit. : चञ्चल (f. ला). II. Fluent : q.v. : वाचाल (f. ला), Me. ii. 33. Ph. : *having v. tongue* : चपलजिह्व (f. ह्वा).

VOLUME : Of books : खण्ड (mn.) : v. Also book. II. Of solids : अन्तर्गतं घनफलम्, Li. 176. III. Collection, *v. of smoke* : धूमावलिः (ली), Ku. ; धूमसंहतिः, Ki. ; *v. of dust* : धूलिसंघातः ; *v. of water* : अम्बुराशिः.

VOLUMINOUS : विस्तीर्ण (f. र्णा) : v. Large, extensive.

VOLUNTARILY : (1) कामतः ; (2) इच्छापूर्वकम् ; (3) संकल्पपुरःसरम्, etc.

VOLUNTARY : expr. by adv. : v. Also intention, spontaneous.

VOLUNTEER (subs.) : स्वेच्छासैनिकः (?).

VOLUNTEER (v.) : अयाचितमर्पयति (c. of ऋ) *or* उपानयति (नी, c. 1.).

VOLUPTUARY : (1) विषयासक्त (f. क्ता) ; (2) विषयसङ्गिन् (f. नी) ; (3) भोगनिरत (f. ता), etc.

VOLUPTUOUS : I. Sensual, licentious : इन्द्रियसुखनिरत (f. ता) and sim. comp.s. II. Luxurious, charming : q.v. : मनोहारिन् (f. णी).

VOLUPTUOUSLY : expr. by adj. or circumlo.

VOLUPTUOUSNESS : I. Sensuality : इन्द्रियसुखनिरतिः, -आसङ्गः, and sim. comp.s. II. Luxuriousness, pleasantness : मनोहारिता.

VOLUTE : perh. आवर्तः, -र्तम्.

VOMIT (v.) : (1) वमति (वम्, c. 1.), *v.ed blood* : रक्तं ववमुः, B. ; (2) छर्दयति (छर्द्, c. 10. : rare), *blood drunk and then v.ed* : पीतच्छर्दितरक्त-, Vi. i. 35. *V. up* : (1) उद्वमति ; उद्गिरति (गॄ, c. 6.).

VOMIT : (subs.) : I. Matter vomited : (1) वान्तम् ; (2) छर्दितम् (rare). II. An emetic : वमनम्, *to give a v.* : वमनं ददाति *or* sim. वामयति (c. of वम्), Bha.

VOMITING (subs.) : वमनम् ; (2) वान्तिः ; (3) छर्दनम् *or* छर्दितम् (rare) ; (4) वमथुः (rare).

VOMITIVE : (1) वमनम् (f. नी), *give a v.* : वमनं पाययति, Sr. ; (2) वान्तिकर (f. री) ; (3) वान्तिद (f. दा) ; etc.

VORACIOUS : घस्मर (f. रा), *the women of Madra are v.* : घस्मरा मद्रिका इति, Mah. : v. Greedy, gluttonous.

VORACIOUSNESS, VORACITY : (1) घस्मरता ; (2) औदरिकता : v. Also greediness, gluttony.

VORTEX : (1) आवर्तः ; (2) आवर्तनी ; (3) भ्रमिः.

VOTARY : (1) भक्त (f. क्ता) ; (2) by comp., *v.ies of Śiva* : शैवाः : v. Also worshipper.

VOTE : (subs.) : no equiv. : सम्मतिः (=approval) may be used.
VOTE (v.) : I. To give v. : सम्मतिं ददाति (दा, c. 3. : ?). II. To elect : q.v. : वृणोति (वृ, c. 5.). III. To provide, supply : q.v. : उपकल्पयति (क्लृप्, c. 10.).
VOTER : सम्मतिदायिन् (f. नी) and sim. comp.s.
VOTIVE : भक्तिपूर्वमुपाहृत (f. ता=offered) *or* समाहित (f. ता=put).
VOUCH : I. To call upon to witness : साक्षीकरोति. II. To attest, confirm : q.v. : दृढयति (nomi.).
VOUCHER : Lit. I. expr. by verb. II. A document : प्रमाणपत्रम्.
VOUCHSAFE : I. To permit : q.v. : अनुजानाति (ज्ञा, c. 9.). II. To deign, condescend : q.v. : प्रसीदति (सद्, c. 1.).
VOW (subs.) : (1) व्रतः, -तम् (=religious), *breach of v.* : व्रतभङ्गः, K. ; (2) संकल्पः (=resolution) ; (3) प्रतिज्ञा (=promise).
VOW (v.) : प्रतिज्ञां करोति, *Arjuna v.ed his death* : गाण्डीविना तस्य वधः प्रतिज्ञातः, Ve. ii. : v. To promise.
VOWEL : (1) स्वरः, *short v.* : ह्रस्वस्वरः ; (2) अच् (t.t), *ending in a v.* : अजन्त (f. न्ता), S.k.
VOYAGE (subs.) : (1) समुद्रयानम् (by sea) ; (2) जलयात्रा (by water).
VOYAGE (v.) : expr. by subs.
VULGAR : (1) ग्राम्य (f. म्या=rustic), *you will know that men are not v.* : अग्राम्यतां मनुष्याणां ज्ञास्यसि, K. ; *although the words......are v.* : अत्र......शब्दा ग्राम्या अपि, Kav. vii. ; (2) असभ्य (f. भ्या=not civilized) ; (3) जघन्य (f. न्या=low, mean).
VULGARISM : I. Of manners : ग्राम्या रीतिः, Kav. ix. 13. Of words : ग्राम्यः शब्दः.
VULGARITY : (1) ग्राम्यत्वम् ; (2) असभ्यता ; (3) जघन्यता : v. Vulgar.
VULGARLY : I. Commonly : q.v. : साधारणतः. II. Meanly, lowly : expr. by comp.
VULGARIZE : (1) ग्राम्यीकरोति.
VULNERABLE : (1) भेद्य (f. द्या) ; (2) वध्य (f. ध्या=assailabe). Ph. : *v. point or part* : छिद्रम् *or* रन्ध्रम् ; *well guarding all v. points* : सुनिभृतछिद्रम्, Ka. xviii. 25.
VULPINE : I. Lit. : by comp. : v. Fox, jackal. II. Artful, crafty : धूर्त (f. र्ता).
VULTURE : I. Lit. : (1) गृध्रः ; (2) शकुनः (comp., शकुन in B.). II. Fig. : perh. गृध्रः (from गृध् : comp. धनिभिर्विबकैर्गृध्नस्तधौर्वार्जितं धनम्, D. viii.
VULTURINE : (1) comp. ; (2) गार्ध्र (f. ध्री : rare).

W

WAD : I. Subs. : लोष्टम् (?). II. Verb : लोष्टयति (nomi : ?).
WADDLE : (1) खेलति (खेल्, c. 1.=play) ; (2) चरति (चर्, c. 1.=move). *W.ing* : हंसगति (mfn.) and sim. comp.s
WADE : कष्टेन गच्छति (गम्, c. 1.=to go : q.v.) *or* तरति (तॄ, c. 1.=cross : q.v.).
WAFER : no equiv. : वैमारम्.
WAFT : I. To drive : q.v. : वाहयति (c. of वह्). II. To float : q.v. : प्लवते (प्लु, c. 1.).
WAG (v.t.) : (1) चालयति (c. of चल्=move), *w.ging of tail* : लाङ्गूलचालनम्, H. ii. 42. ; (2) विधूनयति (धू, c. 10.=shake), *by w.ging their tails* : लाङ्गूलविधूननैः, M.n. on Ku. i. 13.
WAG (v.i.) : (1) चलति (चल्, c. 1.=move) ; (2) धुवति (धू, c. 6.=shake).
WAGER : I. Subs. : (1) पणः, *counter w.* : प्रतिपणः, Mah. ii. 60. 7. ; (2) ग्लहः, *description of different kinds of w. s* : ग्लहप्रभेदवर्णनम्, D. ii. II. Verb. : (1) पणते (पण्, c. 1.), *one who has no property cannot w. another's property* : अस्वो ह्यशक्तः पणितुं परस्वम्, Mah. ii. 67. 47. ; (2) ग्लहते (ग्लह्, c. 1.), Mah. ii. 61. 1.
WAGES : I. Lit. : वेतनम् : v. Salary. II. Fig. : मूल्यम् : v. Price.
WAGGERY : v. Roguery, criticism.
WAGGISH : v. Mischievous, frolicsome, witty.
WAGON : प्रवहणम् : v. Cart, carriage.
WAGTAIL : a bird : (1) खञ्जनः ; (2) खञ्जखेलः ; (3) खञ्जरीटः.

WAIF : अभिज्ञातस्वामिकं *or* अस्वामिकं द्रव्यम्.

WAIL : शोचति (शुच्, c. 1.) : v. To lament, bewail.

WAILING (subs.) : परिदेवनम् : v. Lamentation, cry.

WAIN : गोवहनम् : v. Cart, carriage.

WAINSCOT : no equiv. : फलकिनी may be used.

WAIST : मध्य (mn.), *having slender w.* : कृशमध्य *or* तनुमध्य (f. ध्या), M.n. on Ku. i. 39.

WAISTCOAT : no equiv. : उरश्छोल: may be used.

WAIT (v.) : (1) प्रति- ईक्षते, अप- (ईक्ष्, c. 1.), *w. for a short time* : कालः कश्चित् प्रतीक्ष्यताम्, Ku. ii. 54. ; (2) प्रति-पालयति परि-, अनु-, (पाल्, c. 10.), *where will you w. for me* : क पुनर्मां भवत्यः प्रतिपालयिष्यन्ति, V. i. ; (3) तिष्ठति (स्था, c. 1. =to stay : q.v.) ; (4) सहते (सह्, c. 1. =bear up), *w. for two months* : सहस्व मासद्वयम्, D. i.

WAIT ON or UPON : I. To attend : (1) उपतिष्ठते (स्था, c. 1.), *I will w. on the king* : उपस्थास्यामि राजानम्, Mah. iv. 2. 1. ; (2) उप-आस्ते, अनु- (आस्, c. 2.), *w.ed on by Arundhatī* : अन्वासितमरुन्धत्या, R. i. 56. ; (3) उपचरति (चर्, c. 1.) ; (4) सेवते, उप-, (सेव्, c. 1.). II. To await : q.v.

WAITER : I. An attendant : परिवेषक (f. षिका). II. A tray : q.v.

WAIVE : त्यजति, परि-, (त्यज्, c. 1.) : v. To relinquish, abandon.

WAIVER : in law : आक्षेपः : v. Abandonment.

WAKE (subs.) : I. Lit. : जागरणम्. II. Track : पदवी.

WAKE (v.) : I. Trans. : प्रबोधयति (c. of बुध्) : v. To awake, arouse. II. Intrans. : बुध्यते, प्र-, वि- (बुध्, c. 4.) : v. To awake.

WAKEFUL : (1) जागरूक (f. का) ; (2) जागरणशील (f. ला) ; etc.

WAKEFULNESS : (1) जागरणम् ; (2) जागर्या ; (3) जागरूकत्वम्, -ता ; etc.

WALK (v.) : पादाभ्यां चरति (चर्, c. 1.), गच्छति (गम्. c. 1.) *or* क्रामति (क्रम्, c. 1.) : v. To go, to move. *W. to and fro* : परिक्रामति.

WALK, WALKING (subs.) : पादचारः : and sim. comp.s. *W. about* : परिक्रमः, -मम्, *W. for amusement* : विहारः *or* विहरणम्.

WALKER : पादचारिन् (f. णी) and sim. comp.s : v. Above.

WALL : I. Of a house : (1) भित्तिः ; (2) कुड्यम्. II. An inclosing w. : (1) प्राकारः ; (2) वरणः ; (3) सालः. Ph. : (a) *to drive to the w.* : अवसादयति (c. of सद्) ; (b) *to go to the w.* : अवसीदति (सद्, c. 1.).

WALL (v.) : प्राकारेण आवृणोति (वृ, c. 5.) : v. To surround.

WALLET : (1) गोणी (=sack) ; (2) भस्त्रा (=bag).

WALLOW : (1) लुठति (लुठ्, c. 1.=roll) ; (2) क्रीडति (क्रीड्, c. 1.=sport).

WALNUT : I. The tree : अक्षोटः (also आखोटः). II. The fruit : अक्षोटम्.

WALRUS : नक्रः (?).

WALTZ (subs.) : I. A dance : प्रतिलोमानुलोमत्वम् ; *आवर्तनम्. II. A music : *आवर्तनसङ्गीतम्.

WALTZ (v.) : expr. by subs. and करोति.

WAN : विवर्ण (f. र्णा) : v. Pale, languid.

WAND : (1) दण्डः ; (2) यष्टिः ; (3) वेत्रम्.

WANDER : (1) भ्रमति *or* भ्राम्यति, परि- (भ्रम्, c. 1. and 4.), *w.ed about the world* : परिबभ्राम मेदिनीम्, V.p. ; (2) अटति (अट्, c. 1.), *w.ing through forest again and again* : अटाट्यमानोऽरण्यानीम्, B. iv. 2.

WANDERER : (1) भ्रमणकारिन् (f. णी), परि- ; (2) परिभ्रामक (f. मिका) etc.

WANE (subs.) : (1) ह्रासः ; (2) क्षयः : v. Decrease, decay.

WANE (v.) : (1) ह्रासमुपैति (इ, c. 2.) ; (2) क्षयं गच्छति (गम्, c. 1.) ; etc.

WANING (adj.) : (1) by comp., *w. fortnight* : क्षयपक्षः, Ki. ii. 27. ; (2) क्षयिन् (f. णी) ; (3) ह्रासगामिन् (f. नी) ; etc.

WANNESS : विवर्णता : Paleness, languor.

WANT (subs.) : I. Destitution, absence : (1) अभावः, *w. of money* : धनाभावः ; (2) राहित्यम् ; (3) रहितता, त्वम् ; (4) हीनता, त्वम्. N.B. (2) to (4) chiefly in comp. II. Indigence, poverty :

q.v. : दारिद्र्यम्. III. Anything wanted : अभावः, *to supply w.s* : अभावं पूरयति. IV. Need : प्रयोजनम्.

WANT (v.) : I. To be without : हीयते, परि- (pass. of हा), *nothing is w.ing in you* : आर्यस्य किमपि न परिहास्यते, Sa. i. ; *w.ing in riches* : धनहीन (f. ना) : v. Devoid of. II. To require, need : (1) अपेक्षते (ईक्ष्, c. 1.), *that it would w. other visible illustrations* : येनान्यम् दृष्टं निदर्शनमपेक्षेत, S. i. 4. ; (2) आकाङ्क्षति (काङ्क्ष्, c. 1.), *here it w.s* उपेक्षितुम् : अत्र उपेक्षितुमित्याकाङ्क्षति, Kav. vii. III. To long for, wish : q.v. : वृणोति or वृणुते (वृ, c. 5.), *whatever she w.ed she found brought to her* : यद्येव वव्रे तदपश्यदाहृतम्, R. iii. 6.

WANTON (adj.) : I. Sportive : विलासिन् (f. नी specially of men). II. Unrestrained : अनियन्त्रित (f. ता). III. Luxuriant : प्रचुर (f. रा).

WANTON (v.) : विलसति (लस्, c. 1.), *w.ed with her*: तया सह विललास, H.

WANTONLY : I. In gen. : सविलासम्. II. Without restraint : अनियन्त्रितम्.

WANTONNESS : (1) विलासः ; (2) विलासिता : v. Also sportiveness.

WAR (subs.) : (1) संग्रामः ; (2) समरः ; (3) रणम् ; (4) सम्प्रहारः ; (5) संयुगः ; (6) आजिः ; (7) सम्परायः ; (8) विग्रहः : v. Also battle. Ph. : *w. cry.* : (1) सिंहनादः ; (2) क्ष्वेडा or क्ष्वेडितम्, -नादः ; etc.

WAR (v.) : (1) विगृह्णाति (ग्रह्, c. 9. : lit. and fig.) ; (2) संग्रामयति, -ते (rare) ; (3) संग्रामं करोति, etc. : v. Also to fight.

WARBLE : कूजति (कूज्, c. 1.) : v. To sing.

WARBLER : expr. by verb : v. Also singer.

WARD (subs.) : I. Custody, protection : q.v. : रक्षा. II. Opposed to guardian : perh. रक्षितो बालः. III. Of a town etc. : विभागः. IV. In fencing : अपसारणम्.

WARD (v.) : निवारयति (वृ, c. 10.) : v. To prevent, dispel.

WARDEN : रक्षक (f. क्षिका) : v. Keeper, guard.

WARDER : (1) रक्षक (f. क्षिका=guard) ; (2) दौवारिक (f. की=gatekeeper : q.v.).

WARDROBE : I. A closet ; वस्त्राधानम्, and sim. comp.s. II. Clothes : q.v. : वासांसि (n. pl.).

WARE, WARES : पण्यम् : v. Commodity, goods.

WAREHOUSE : *पण्याधानम्, द्रव्यनिधानम् and sim. comp.s.

WARFARE : युद्धम् : v. War, battle.

WARILY, WARINESS : v. Cautiously, cautiousness.

WARLIKE : I. Disposed to war : (1) रणप्रिय (f. या), युद्धदुर्मद (f. दा) and sim. comp.s. ; (2) युयुत्सु (mfn.=desirous of w.). II. Military : q.v. : सांग्रामिक (f. की).

WARM (adj.) : I. Hot : q.v. : तप्त (f. प्ता). II. Fig. : चण्ड (f. ण्डा) : v. Vehement, sharp. III. Rich : q.v. Ph. : *to be or feel w.* : घर्ममनुभवति.

WARM (v.t.) : तापयति, -ते, प्र-, सं-, (c. of तप्), *w. yourself* : स्वगात्राणि प्रतापयस्व, P. iii. 19. : v. To heat.

WARM (v.i.) : fig. : (1) दीप्यते (दीप्, c. 4.) ; (2) by adj.

WARM-HEARTED : (1) सरलहृदय (f. या) ; (2) सहृदय (f. या).

WARMLY : I. Lit. : उष्णम्. II. Vehemently : चण्डम्. III. Cordially : साग्रहम्.

WARMTH : I. Heat : q.v. : उत्तापः. II. Vehemence : q.v. : चण्डता. II. Zeal, enthusiasm : q.v. : उत्साहः.

WARN : (1) सतर्कयति (nomi. : ?) ; (2) उपदिशति (दिश्, c. 6.=advice).

WARNING : (1) सतर्कः (?) ; (2) उपदेशः (=advice : q.v.).

WARP (subs.) : तानः, V. d. i. I. 24.

WARP (v.) : I. Trans. : आवर्तयति (c. of वृत्) : v. To turn, bend, deprave. II. Intrans. : आवर्तते (वृत्, c. 1.).

WARRANT (subs.) : I. Authority : क्षमता. II. The writ : क्षमतापत्रम् (?).

WARRANT (v.) : I. To authorize : क्षमतां ददाति. II. To justify : समर्थयति (अर्थ्, c. 1.). III. To assure : q.v.

WARRANTY : perh. प्रत्ययपत्रम् and sim. comp.s.

WARREN : (1) शशकभूमिः etc. (for rabbits : ?).

WARRIOR : (1) भटः ; (2) योधः ; (3) योद्धृ (m.) : v. Also hero.

WART : किणः (= scar, corn).

WARY : अप्रमत्त (f. त्ता) : v. Cautious, careful.

WASH (v.) : (1) धावते *or* धावयति (धाव्, c. 1. and 10.), *w. (his) feet* : पादौ धावस्व, Mr. iii.; (2) क्षालयति, प्र- (क्षाल्, c. 10.), *w.ing in water* : जलक्षालनम्, K.; *to w. out infamy* : अयशः प्रक्षालयति, Mah. ; (3) नेनेक्ति *or* नेजयति, निर्- (निज्, c. 3. and 10. : rare).

WASH (subs.) : I. W.ing. : (1) धावनम् ; (2) क्षालणम्, प्र- ; (3) नेजनम् निर्-. II. A lotion : लेपः, वि-, आ-. III. Marsh, fen : q.v.

WASHHAND BASIN : हस्तधावनभाजनम्, and sim. comp.s.

WASHHAND STAND : धावनभाजनाधारः, and sim. comp.s. (?).

WASHERMAN : (1) रजकः ; (2) नेजकः, निर्-, Y. ii. 141. ; (3) वस्त्रधावकः.

WASHERWOMAN : (1) रजकी ; (2) रजकवधूः ; etc. ; v. Above.

WASP : (1) वरटा ; (2) गन्धोली.

WASPISH : Irritable, passionate.

WASTE (v.t.) : I. To wear, impair : (1) क्षिणोति, परि-, अव-, प्र-, सं- (क्षि, c. 5.), *without w.ing the body* : तनुमक्षिण्वन्, M. ii. 100. ; *he is to be w.d* : परिक्षीयत एवासौ, H. ii. 95. ; (2) अवचिनोति (चि, c. 5.), *if (it) is afterwards w. d.* : अर्वाक् चेदपचीयते, Mit. II. To ruin, destroy : q.v. : क्षिणोति, *it does not w. the reputation of warriors* : न तद्यशः शस्त्रभृतां क्षिणोति, R. ii. 40. III. To squander : q.v. : क्षपयति (c. of क्षि), *when the night was w.d* : अथ क्षीणायां क्षपायाम्, K. : v. To pass, spend, throw away.

WASTE (v.i.) : (1) क्षीयते (pass. of क्षि) ; (2) अपचीयते, (pass. of चि) ; (3) क्षयं याति (या, c. 2.) ; etc., *it gradually w.s* : स्तोकं स्तोकं क्षयं याति, Mr. x. 2.

WASTE (subs.) : I. In gen. : (1) क्षयः, *in the case of immoveables shall be made to pay the w.* : स्थावरस्य क्षयं दाप्यः, N. s. ; (2) अपचयः, *increase and w.* : उपचयापचयौ, Mit. ; (3) अपव्ययः (= squandering) ; (4) क्षेपः (= throwing away). II. W. land : (1) खिलम्, *cultivation of w.* : खिलकर्षणम्, Viv. ; (2) खिलभूमिः and sim. comp.s.

WASTE (adj.) : Of lands : *(land) that lies w. for one year is half-w.* : एकवर्षपतितमर्धखिलम्, Viv. : v. Waste (subs. : II.). II. Desolate, empty, desert : q.v.

WASTEFUL : (1) अपव्ययिन् (f. नी) ; (2) वृथाव्ययिन् (f. नी) ; etc. : v. Prodigal.

WASTE-PIPE : (1) परि(री)वाहः ; (2) उच्छिष्टजलनाली.

WATCH (subs.) : I. Keeping awake : जागरणम्. II. Protection : q.v. : रक्षा. III. Guard : q.v. : रक्षिन् (m.). IV. Of time : (1) प्रहरः ; (2) यामः. V. A time-piece : कालमापः.

WATCH (v.) : I. To observe : अवधत्ते (धा, c. 3.). II. To tend, wait on : q.v. : उपास्ते (आस्, c. 2.). III. To guard, protect : रक्षति (रक्ष्, c. 1.).

WATCH (v.i.) : I. To be awake : जागर्ति (जागृ, c. 2. : lit. and fig.). II. To wait : q.v. : प्रतीक्षते (ईक्ष्, c. 1.). *To w. over* : पर्यवेक्षते (ईक्ष्, c. 1.) : v. To look into.

WATCHFUL : I. Of men : v. Wakeful. II. Of nights etc. : जागर- *or* प्रजागर- in comp.

WATCHFULLY : (1) सजागरम् : v. Also carefully, cautiously.

WATCH-HOUSE, WATCH-BOX : (1) उद्घाटः (?) ; (2) पिठरम् (?).

WATCH-MAKER : कालमापकार (f. री) and sim. comp.s.

WATCHMAN : (1) रक्षिन् (f. णी), आ- ; (2) रक्षक (f. क्षिका) ; (3) प्रहरिन् (f. णी).

WATCHWORD : perh. प्रत्ययवाच् (f.) : v. Also signal.

WATER (subs.) : Lit. : (1) जलम्, *cool w.-drinking* : शीतलजलपानम् ; *rain- w.* ; वृष्टिजलम् ; *sea-w.* : सामुद्रं जलम् ; *how to purify bad w.* : दुष्टजलस्य निर्दोषीकरणोपायः, Bha. ; (2) वारि (n.) ; (3) अम्बु (n.) ; (4) सलिलम् ; (5) आपः (f. pl.) ; (6) उदकम् ; (7) अम्भस् (n.) ; (8) पयस् (n.) ; (9) तोयम् ; (10) नीरम् ; (11) पानीयम्. Ph. : *by land and*

ex.: जलेन च जलेन च ; *it will not hold w.* : जलमपि प्रमाणकोटिं प्रवेष्टुमिच्छे, D. x. 1. ; *first w.* : जलौघो मणिः (?), V. m. 82. 5. II. Urine : q.v. : प्रस्रावः, *to make w.* : प्रस्रावं or मूत्रं करोति, An.

Water (v.t.) : I. To wet with w. : (जलेन, सलिलेन, etc.) सिञ्चति, अभि-, प्र-, (सिच्, c. 6.), *is w.ing the Mādhavī plant* : माधवीलतां सिञ्चति, Sa. i. ; *richly w.ed with tears* : बाष्पायिता नेत्रजलसेकैः, B. xi. 5. ; *these trees have been w.ed* : उदकं लम्भिता एते वृक्षाः, Sa. i. II. To give w. : जलम् etc. पाययति (c. of पा) ; *he w.ed the horses* : हयान् पाययामास वारि सः, Mah. vii. 100. 15. ; *place for w.ing horse* : अश्वानामुदपानम्, Mah. vii. 99. 58.

Water (v.i.) : I. Of the eyes : वारि मुञ्चति (मुच्, c. 6.). II. Of the mouth : लालायते (nomi.).

Water-carrier : (1) जलवाहकः ; (2) उदवाहः, and sim. comp.s.

Water-clock : कपालयन्त्रम्, Su. xiii. 23.

Water-closet : *शौचकोष्ठः.

Water-cress : शाकभेदः.

Watered : *well w.* : जलभूयिष्ठ (f. ष्ठा) and sim. comp.s ; *w. by rivers* : नदीमातृक (f. का).

Waterfall : (1) प्रपातः ; (2) जलप्रपातः.

Water-fowl, water-hen : जलकुक्कुटः (f. टी).

Watering-place : I. Lit. : प्रपा. II. A sanatorium : जलसेवनम् (नी).

Water-lily : कमलम् : v. Lotus.

Waterman : I. Boat-man : नाविकः. II. Water-carrier : q.v.

Water-melon : I. The fruit : (1) गोडुम्बम् ; (2) सेटु (n.) ; तरम्बुजम्. II. The plant : (1) गोडुम्बः ; (2) सेटुः.

Water-mill : जलप्रणोद चक्रम्, जलचलच्चक्रम्. etc.

Water-pot : (1) घटः ; (2) कमण्डलुः ; (3) कलसः (large w.).

Waterproof : जलाभेद्य (f. द्या) and sim. comp.s.

Water-snake : (1) जलव्यालः ; (2) जलसर्पः ; etc.

Waterspout : (1) उदकजः (?) ; (2) जलस्तम्भः (?, Akshoy).

Waterwheel : नदीचक्रम् (?).

Waterworks : perh. जलकर्मन् (n.) *or* जलीयकर्मन् and sim. comp.s.

Watery : (1) by comp. ; (2) जलमय (f. यी) and sim. comp.s. (=consisting of, abounding in, water) ; (3) जलीय (f. या) etc. (=of w.).

Wattle : I. Hurdle : काष्ठबन्धः. II. Of cocks : कुक्कुम्.

Wave (subs.) : (1) तरङ्गः, *large w.s* : बृहत्तरङ्गान्, R. ; (2) ऊर्मिः, *w. crowned* : ऊर्मिमालिन् (f. नी) ; (3) भङ्गिः : v. Also billow.

Wave (v.t.) : (1) धूनयति (धू, c. 10.=shake : q.v.) ; (2) चालयति (c. of चल्=move : q.v.).

Wave (v.i.) : (1) धूयते (pass. of धु.) : v. Shake ; (2) चलति (चल्, c. 1.) : v. To move.

Waver : दोलायते (nomi.), *with w.ing mind* : दोलायमानचेतसा ; *w.ing* : अकृतनिश्चय (f. या = unsettled, unsteady : q.v.) : v. Also to reel.

Wavy : (1) तरङ्गित (f. ता), *w. bank* : तरङ्गितं सैकतम्, Ki. iv. 6. ; *making the banners w.* : तरङ्गितालम्बितकेतुसन्ततिः, Ki. xiv. 28. ; (2) ऊर्मिमत् (f. ती) ; (3) ऊर्मिमालिन् (f. नी) ; (4) भङ्गिमत् (f. ती), M. n. ; etc.

Wax (subs.) : I. Of bees : (1) सिक्थम् ; (2) मधूच्छिष्टम्. II. For sealing : लाक्षा. III. Of the ear : (1) तोकम् ; (2) कर्णमलम्.

Wax (v.) : I. Intrans. : वर्धते (वृध्, c. 1.) : v. To increase. II. Trans. : लिम्पति (लिप्, c. 6.) : v. To besmear.

Waxen, waxy : (1) सिक्थमयः (यी, यं =made of wax) ; (2) सिक्थाक्त (f. क्ता =coated with wax.) ; (3) सिक्थाभ (f. भा =like w.).

Way : I. Road : (1) मार्गः, *to give w.* : मार्गं ददाति, Mr. x. ; *to lead the w.* : मार्गमादिशति, Sa. v. ; (2) पन्थाः, *tell me the w. which leads to the hermitage of Agastya* : अगस्त्याश्रमस्य पन्थानं ब्रूहि, U. ii. ; *tread in improper w.s* : अपथे पदमर्पयन्ति, R. ix. 74. ; (3) अध्वन् (m.), *going a little w.* : गत्वा कश्चिदध्वानम्, K. ; *accidentally in the w.* : अध्वनि दैवयोगात्, R. v. 60. ; (4) वर्त्मन् (n.), *one who has lost his w.* : प्रनष्टवर्त्मन् (mfn.), K. ; *women go the w. of their husbands* : प्रमदाः पति-

वर्त्मगा:, Ku. iv. 33. Ph. : *I have come such a long w.* : एतावतीं भूमिमायात:, K. ; *this w. your majesty* : इतो इतो देवी, V. ii. ; *did you not see (meet) the Queen on the w.* : न खल्वन्तरे त्वया दृष्टा देवी, Sa. vi. ; *make w.* : अन्तरमन्तरम्, Mr. x. ; *which w. is the wretch gone* : कतमेन दिग्विभागेन गत: स जाल्म: ? V. i. ; *right of w.* : गमनाधिकार:. II. Device : q.v. : उपाय:. III. Manner, method : q.v. : प्रकार:. Miscell. : *in two, three, many w.s* : द्विधा, त्रिधा, बहुधा ; *by w. of illustration* : निदर्शनरूपेण.

Wayfarer : (1) पथिक: ; (2) अध्वनीन: ; (3) अध्वन्य: ; (4) अध्वग:.

Waylay : पथि अवस्कन्दते (स्कन्द्, c. 1.=attack : q.v.). or निभृतं प्रतीक्षते (ईक्ष्, c. 1.=wait : q.v.).

Wayside : expr. by comp., *w. trees* : मार्गशाखिन: R. i. 45. : v. Border.

Wayward : प्रतीप (f. पा) : v. Perverse, wilful, forward.

Wayworn : (1) अध्वश्रान्त (f. न्ता); (2) अध्वना परिक्लान्त (f. न्ता), Ki. xi. 2. ; and sim. comp.s.

We : वयम्. Ph. : *here are we* : इमे स्म:, Sa. iv.

Weak : (1) दुर्बल (f. ला), *the strong would have roasted the w.* : अपक्ष्यन् दुर्बलान् बलवत्तरा:, M. vii. 20. ; *w. digestion* : दुर्बलोऽग्नि:, Bha. ; (2) अबल (f. ला), *eating their own w. brothers* : अबलस्वकुलाशिन:, N. ii. 10. ; (3) बलहीन (f. ना), S. ; (4) क्षीणबल (f. ला), Bha. ; and sim. comp.s : v. Also feeble, slender, decay. Ph. : *w. point* : दोष: (fault : q.v.), छिद्रम् (=hole : q.v.).

Weaken : (1) दुर्बलीकरोति ; (2) बलक्षयं करोति (with gen.) ; (3) बलं हरति (हृ, c. 1.=remove : q.v.) *or* क्षिणोति (क्षि, c. 5.=waste : q.v.).

Weakly : I. Adj. : क्षीणबल (f. ला) : v. Weak. II. Adv. : (1) दुर्बलम् ; (2) by adj. or circumlo. : v. Also in vain.

Weakness : I. In gen. : (1) दुर्बलता, -त्वम् *or* दौर्बल्यम्, *w. of a king* : दौर्बल्यं राज्ञ:, M. viii. 171. ; *w. of the senses* : इन्द्रियाणां दौर्बल्यम्, Bha. ; (2) अबल (rare), *strength and w. of the enemy* : अरिबलाबलम्, M. n. on Si. ii. 36. ; (3) बलहीनता and sim. deriv. s. II. Foible, fault : q.v. : व्यसनम्.

Weal : I. Welfare, happiness : q.v. : क्षेमम्. Ph. : *for the public w.* : प्रकृतिहिताय, Sa. vii. II. Mark of a blow : क्षतचिह्नम्.

Wealth : I. Riches : (1) धनम् (=pro. money), *what is the use of w. (to one) who does not give, does not eat* : धनेन किं यो न ददाति नाश्नुते, H. ; (2) वसु (n.=1), *not only the w. of the monarch* : वसु तस्य विभोर्न केवलम्, R. ; (3) विभव: ; (4) वैभवम् ; (5) ऐश्वर्यम् ; (6) सम्पत्ति: (=property) ; (7) वित्तम् (=1). II. Prosperity : q.v.

Wealthy : महाधन (f. ना) : v. Rich.

Wean : I. Lit. : स्तन्यं त्याजयति, परि- (c. of त्यज्) *or* हापयति, परि- (c. of हा) *or* विसर्जयति (c. of सृज्). II. Fig. : वियोजयति (युज्, c. 10) *or* विघटयति (घट्, c. 10.) : v. To separate.

Weapon : (1) शस्त्रम्, *when victory was not intercepted by w.s* : शस्त्रैरव्यवधीयमानविजय:, Vi. v. 51. ; (2) अस्त्रम् (properly a missile), *various w.* : विविधमस्त्रम्, Ki. xviii. 46. ; (3) आयुधम् ; (4) प्रहरणम् ; (5) हेति: (rare).

Wear (subs.) : I. Waste : q.v. : क्षय:, परि-, अव-. II. Dress : q.v. : वासस् (n.). III. Dam : बन्ध:.

Wear (v.t.) : I. To put on : q.v. : धरति *or* धारयति (धृ, c. 1. and 10), *ornaments worn by women during the life-time of their husbands* : पत्यौ जीवति य: स्त्रीभिरलङ्कारो धृतो भवेत्, Mit. ; *clothes etc., worn by a father.* : पितृधृतं वस्त्रादिकम्, Mit. Ph. : *w.ing apparel* : परिधानवासस्, (n.) and sim. comp.s. II. To impair : क्षिणोति (क्षि, c. 5.) : v. Waste.

Wear (v.t.) : क्षीयते (pass. of क्षि) : v. To waste.

Wear off : (1) नश्यति (नश्, c. 4.) : v. Destroy ; (2) अपगच्छति (गम्, c. 1.) : v. To go away.

Wear out : I. By use : (1) जीर्णीकरोति ; (2) जर्जरीकरोति. II. Intrans. : जीर्यति, परि- (जॄ, c. 4.) ; (2) जीर्णीभवति ; (3) जर्जरीभवति. III. To fatigue, tire : q.v. : श्रामयति, अव- (c. of श्रम्).

WEARIED : (1) क्लान्त (f. न्ता) ; (2) परिक्लान्त (f. न्ता) : v. Fatigued.

WEARINESS : (1) क्लमः ; (2) क्लान्तिः : Fatigue.

WEARISOME : (1) श्रमजनन (f. नी) ; (2) आयासकर (f. री) ; (3) खेदजनक (f. निका) ; etc.

WEARY (adj.) : I. Fatigued : q.v. : क्लान्त (f. न्ता). II. Wearisome.

WEARY (v.) : आयासयति (c. of यस्) : v. To fatigue.

WEASAND : v. Windpipe, throat.

WEASEL : (1) नकुलः ; (2) बभ्रुः (rare).

WEATHER (v.) : I. To air : q.v. : II. To sail to the windward of : प्रतिवातमतिक्रामति (क्रम्, c. 1.) : v. To cross. III Fig. : तरति (तॄ , c. 1.) : v. To cross, bear, sustain.

WEATHER (subs.) : (1) by circumlo. ; (2) कालः (=time : q.v.) ; (3) दिनम्. Ph. : *bad w.* : दुर्दिनम्, वार्दलम् ; *good w.* : सुदिनम्.

WEATHER-BEATEN : (1) वाताहत (f. ता : by wind) ; (2) झञ्झाहत (f. ता : by hurricane); etc.

WEATHERCOCK : वायुप्रदर्शिनी and sim. comp.s.

WEATHER-GLASS : वायुयन्त्रम्.

WEATHER-WISE : वातादिलक्षणविद् (mfn.) and sim. comp.s.

WEAVE : वयति, प्र- (वे, c. 1.), *w.ing cloth* : पटं वयन्तौ, Mah. i. 3. 140.

WEAVER : (1) तन्तु(त्र)वायः (पः) ; (2) कुवि(पि)न्दः ; (3) पट्टकारः, -कः.

WEB : I. gen. : जालम्. II. Of the eye : पटलम्.

WEB-FOOTED : जालपादः (f. दा) ; *a w. animal* : कश्चिज्जालपादः, D. i.

WED : परिणयति (नी, c. 1.) : v. To marry.

WEDDED : Fig. : आसक्त (f. क्ता) : v. Attached.

WEDDING : विवाहः : v. Marriage.

WEDLOCK : विवाहः : v. Marriage.

WEDNESDAY : (1) बुधवारः ; (2) बुधवासरः ; (3) सौम्यवारः.

WEED (subs.) : I. A noxious plant : (1) कक्षः, *to take up w.s* : कक्षमुद्धरति, M. vii. 110. ; (2) तृणादिकम्, R. t. ; (3) perh. अगच्छः. (comp. Bengalee आगाछा). II. Widow's dress : perh. विधवावसनम्, D.v. ; चीरम् *or* चीवरम् (prop. rag).

WEED (v.) : उद्धरति (हृ, c. 1.) ; (2) निर्दाति *or* -द्यति (दा, c. 2. or दो, c. 4.).

WEEDER : (1) निर्दातृ (f. त्री), M. vii. 110. ; (2) कक्षोद्धर्तृ (f. र्त्री) and sim. comp.s.

WEEK : सप्ताहम्, *every w.* : सप्ताहात् सप्ताहात्, Sr ; *w.-day* : वारः.

WEEKLY : I. Adj. : साप्ताहिक (f. की). II. Adv. : सप्ताहे सप्ताहे.

WEEN : मन्यते (मन्, c. 4.) : v. To think.

